श्रीमत्+वाग्भटविरचिते अष्टाङ्गहृदये चिकित्सितस्थानम्।

प्रथमः+अध्यायः।

अथ+अतः+ ज्वरचिकित्सितं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

आमाशयस्थः+ हत्वा+अग्निं सामः+ मार्गान् पिधाय यत्।

विदधाति ज्वरं दोषः+तस्मात्+कुर्वीत लङ्घनम्॥1॥

प्राग्रूपेषु ज्वरादौ वा, बलं यत्नेन पालयन्।

बलाधिष्ठानम्+आरोग्यम्+आरोग्यार्थः क्रियाक्रमः॥2॥

लङ्घनैः क्षपिते दोषे दीप्ते+अग्नौ लाघवे सति।

स्वास्थ्यं क्षुत्तृड् रुचिः पक्तिः+बलम्+ओजः+च जायते॥3॥

तत्र+उत्कृष्टे समुत्क्लिष्टे कफप्राये चले मले।

सहृल्लासप्रसेकात्+न+द्वेषकासविषूचिके॥4॥

सद्योभुक्तस्य सञ्जाते ज्वरे सामे विशेषतः।

वमनं वमनार्हस्य शस्तं कुर्यात्+तत्+अन्यथा॥5॥

श्वासातीसारसम्मोहहृद्रोगविषमज्वरान्।

पिप्पलीभिः+युतान् गालान् कलिङ्गैः+मधुकेन वा॥6॥

उष्णाम्भसा समधुना पिबेत्+सलवणेन वा।

पटोलनिम्बकर्कोटवेत्रपत्रोदकेन वा॥7॥

तर्पणेन रसेन+इक्षोः+मद्यैः कल्पोदितानि वा।

वमनानि प्रयुञ्जीत बलकालविभागवित्॥8॥

कृते+अकृते वा वमने ज्वरी कुर्यात्+विशोषणम्।

दोषाणां समुदीर्णानां पाचनाय शमाय च॥9॥

दोषेण भस्मनेव+आग्नौ छन्ने+अन्नं न विपच्यते।

तस्मात्+आदोषपचनात्+ज्वरितान्+उपवासयेत्॥10॥

तृष्णक्+अल्पाल्पम्+उष्णाम्बु पिबेत्+वातकफज्वरे।

तत्+कफं विलयं नीत्वा तृष्णाम्+आशु निवर्तयेत्॥11॥

उदीर्य च+अग्निं स्रोतांसि मृदूकृत्य विशोधयेत्।

लीनपित्तानिलस्वेदशकृन्मूत्रानुलोमनम्॥12॥

निद्राजाड्यारुचिहरं प्राणानाम्+अवलम्बनम्।

विपरीतम्+अतः शीतं दोषसङ्घातवर्द्धनम्॥13॥

उष्णाम्+एवं गुणत्वे+अपि युञ्ज्यात्+न+एकान्तपित्तले।

उद्रिक्तपिते दवथुदाहमोहातिसारिणि॥14॥

विषमद्योत्थिते ग्रीष्मे क्षतक्षीणे+अस्रपित्तिनि।
घनचन्दनशुण्ठ्यम्बुपर्पटोशीरसाधितम्॥15॥
शीतं तेभ्यः+ हितं तोयं पाचनं तृड्ज्वरापहम्।
ऊष्मा पित्तात्+ऋते न+अस्ति ज्वरः+ न+अस्ति+ऊष्मणा विना ॥16॥
तस्मात्+पित्तविरुद्धानि त्यजेत् पित्ताधिके+अधिकम्।
स्नानाभ्यङ्गप्रदेहान्+च परिशेषं च लङ्घनम्॥17॥
अजीर्णः+ इव शूलघ्नं सामे तीव्ररुजि ज्वरे।
न पिबेत्+औषधं तत्+हि भूयः+ एव+आमम्+आवहेत्॥18॥
आमाभिभूतकोष्ठस्य क्षीरं विषमहेः+इव।
सोदर्दपीनसश्वासे जङ्घापर्वास्थिशूलिनि॥19॥
वातश्लेष्मात्मके स्वेदः प्रशस्तः, सः+ प्रवर्तयेत्।
स्वेदमूत्रशकृद्वातान् कुर्यात्+अग्नेः+च पाटवम्॥20॥
स्नेहोक्तम्+आचारविधिं सर्वशः+च+अनुपालयेत्।
लङ्घनं स्वेदनं कालः+ यवाग्वस्तिक्तकः+ रसः॥21॥
मलानां पाचनानि स्युः+यथावस्थं क्रमेण वा।
शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम्॥22॥
नेष्यते तेषु हि हितं शमनं यत्+न कर्शनम्।
तत्र सामज्वराकृत्या जानीयात्+अविशोषितम्॥23॥
द्विविधोपक्रमज्ञानम्+अवेक्षेत च लङ्घने।
युक्तं लङ्घितलिङ्गैः+तु तं पेयाभिः+उपाचरेत्॥24॥
यथास्वौषधसिद्धाभिः+मण्डपूर्वाभिः+आदितः।
षडहं वा मृदुत्वं वा ज्वरः+ यावत्+अवाप्नुयात्॥25॥
तस्य+अग्निः+दीप्यते ताभिः समिद्भिः+इव पावकः।
प्राक्+लाजपेयां सुजारां सशुण्ठीधान्यपिप्पलीम्॥26॥
ससैन्धवां, तथा+अम्लार्थी तां पिबेत्+सहदाडिमाम्।
सृष्टविड् बहुपित्तः+ वा सशुण्ठीमाक्षिकां हिमाम्॥27॥
बस्तिपार्श्वशिरःशूली व्याघ्रीगोक्षुरसाधिताम्।
पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः॥28॥
सिद्धां ज्वरातिसार्यम्लां पेयां दीपनपाचनीम्।
ह्रस्वेन पञ्चमूलेन हिक्कारुक्श्वासकासवान्॥29॥
पञ्चमूलेन महता कफार्तः+ यवसाधिताम्।
विबद्धवर्चाः सयवां पिप्पल्यामलकैः कृताम्॥30॥

यावगूं सर्पिषां भृष्टां मलदोषानुलोमनीम्।
चविकापिप्पलीमूलद्राक्षामलकनागरैः॥31॥
कोष्ठे विबद्धे सरुजि पिबेत्+तु परिकर्तिनि।
कोलवृक्षाम्लकलशीधावनीश्रीफलैः कृताम्॥32॥
अस्वेदनिद्रः+तृष्णार्तः सितामलकनागरैः।
सिताबदरमृद्वीकासारिवामुस्तचन्दनैः॥33॥
तृष्णाच्छर्दिपरीदाहज्वरघ्नीं क्षौद्रसंयुताम्।
कुर्यात्+पेयौषधैः+एव रसयूषादिकान्+अपि॥34॥
मद्योद्भवे मद्यनित्ये पित्तस्थानगते कफे।
ग्रीष्मे तयोः+वा+अधिकयोः+तृट्छर्दिः+दाहपीडिते॥35॥
ऊर्ध्वं प्रवृत्ते रक्ते च पेयां न+इच्छन्ति तेषु तु।
ज्वरापहैः फलरसैः+अद्भिः+वा लाजतर्पणान्॥36॥
पिबेत्+सशर्कराक्षौद्रान् ततः+ जीर्णे तु तर्पणे।
यवाग्वां वा+ओदनं क्षुद्वान्+अश्नीयात्+भृष्टतण्डुलम्॥37॥
दकलावणिकैः+यूषै रसैः+वा मुद्गलावजैः।
इति+अयं षडहः+ नेयः+ बलं दोषं च रक्षता॥38॥
ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशस्यते।
कषायः+ दोषशेषस्य पाचनः शमनः+अथवा॥39॥
तिक्तः पित्ते विशेषेण प्रयोज्यः, कटुकः कफे।
पित्तश्लेष्महरत्वे+अपि कषायः सः+ न शस्यते॥40॥
नवज्वरे, मलस्तम्भात्+कषायः+ विषमज्वरम्।
कुरुते+अरुचिहृल्लासहिध्माध्मानादिकान्+अपि॥41॥
सप्ताहात्+औषधं केचित्+आहुः+अन्ये दशाहतः।
केचित्+लघ्वन्नभुक्तस्य योज्यम्+आमोल्बणे न तु॥42॥
तीव्रज्वरपरीतस्य दोषवेगोदये यतः।
दोषे+अथवा+अतिनिचिते तन्द्राः+तैमित्यकारिणि॥43॥
अपच्यमानं भैषज्यं भूयः+ ज्वलयति ज्वरम्।
मृदुः+ज्वरः+ लघुः+देहः+चलिताः+च मला यदा॥44॥
अचिरज्वरितस्य+अपि भेषजं योजयेत्+तदा।
मुस्तया पर्पटं युक्तं शुण्ठ्या दुःस्पर्शया+अपि वा॥45॥
पाक्यं शीतकषायं वा पाठोशीरं सवालकम्।
पिबेत्+तद्वत्+च भूनिम्बगुडूचीमुस्तनागरम्॥46॥

यथायोगम्+इमे योज्याः कषाया दोषपाचनाः।
ज्वरारोचकतृष्णास्यवैरस्यापक्तिनाशनाः॥47॥
कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी।
पटोलं सारिवा मुस्ता पाठा कटुकरोहिणी॥48॥
पटोलनिम्बत्रिफलामृद्वीकामुस्तवत्सकाः।
किराततिक्तम्+अमृता चन्दनं विश्वभेषजम्॥49॥
धात्रीमुस्तामृताक्षौद्रमर्धश्लोकसमापनाः।
पञ्च+एते सन्ततादीनां पञ्चानां शमना मताः॥50॥
दुरालभामृतामुस्तानागरं वातजे ज्वरे।
अथवा पिप्पलीमूलगुडूचीविश्वभेषजम्॥51॥
कनीयः पञ्चमूलं च पित्ते शक्रयवाघनम्।
कटुका च+इति सक्षौद्रं मुस्तापर्पटकं तथा॥52॥
सधन्वयासभूनिम्बं वत्सकाद्यः+ गणः कफे।
अथवा वृषगाङ्गेयीशृङ्गबेरदुरालभाः॥53॥
रुग्विबन्धानिलश्लेष्मयुक्ते दीपनपाचनम्।
अभयापिप्पलीमूलशम्याककटुकाघनम्॥54॥
द्राक्षामधूकमधुकरोध्रकाश्मर्यसारिवाः।
मुस्तामलकह्रीबेरपद्मकेसरपद्मकम्॥55॥
मृणालचन्दनोशीरनीलोत्पलपरूषकम्।
फाण्टः+ हिमः+ वा द्राक्षादिः+जातीकुसुमवासितः॥56॥
युक्तः+ मधुसितालाजैः+जयति+अनिलपित्तजम्।
ज्वरं मदात्ययं छर्दिं मूर्च्छां दाहं श्रमं भ्रमम्॥57॥
ऊर्ध्वगं रक्तपित्तं च पिपासां कामलाम्+अपि।
पाचयेत्+कटुकां पिष्ट्वा कर्परे+अभिनवे शुचौ॥58॥
निष्पीडितः+ घृतयुतः+तद्रसः+ ज्वरदाहजित्।
कफवाते वचातिक्तापाठारग्वधवत्सकाः॥59॥
पिप्पलीचूर्णयुक्तः+ वा क्वाथः+छिन्नोद्भवोद्भवः।
व्याघ्रीशुण्ठ्यमृताक्वाथः पिप्पलीचूर्णसंयुतः॥60॥
वातश्लेष्मज्वरश्वासकासपीनसशूलजित्।
पथ्याकुस्तुम्बरीमुस्ताशुण्ठीकट्तृणपर्पटम्॥61॥
सकट्फलवचाभार्ङ्गीदेवाह्वं मधुहिङ्गुमत्।
कफवातज्वरष्ठीवकुक्षिहृत्पार्श्ववेदनाः॥62॥

कण्ठामयास्य श्वयथुकासश्वासात्+नियच्छति।
आरग्वधादिः सक्षौद्रः कफपित्तज्वरं जयेत्॥63॥
तथा तिक्तावृषोशीरत्रायन्तीत्रिफलामृताः।
पटोलातिविषानिम्बमूर्वाधन्वयवासकाः॥64॥
सन्निपातज्वरे व्याघ्रीदेवदारुनिशाघनम्।
पटोलपत्रनिम्बत्वक्त्रिफलाकटुकायुतम्॥65॥
नागरं पौष्करं मूलं गुडूची कण्टकारिका।
सकासश्वासपार्श्वार्तौ वातश्लेष्मोत्तरे ज्वरे॥66॥
मधूकपुष्पमृद्वीकात्रायमाणापरूषकम्।
सोशीरतिक्तात्रिफलाकाश्मर्यं कल्पयेत्+हिमम्॥67॥
कषायं तं पिबन् काले ज्वरान् सर्वान्+अपोहति।
जात्यामलकमुस्तानि तद्वत्+धन्वयवासकम्॥68॥
बद्धविट् कटुकाद्राक्षात्रायन्तीत्रिफलागुडम्।
जीर्णौषधः+अन्नं पेयाद्यम्+आचरेत् श्लेष्मवान्+न तु॥69॥
पेयां कफं वर्धयति पङ्कं पांसुषु वृष्टिवत्।
श्लेष्माभिष्यण्णदेहानाम्+अतः प्राक्+अपि योजयेत्॥70॥
यूषान् कुलत्थचणककलायादिकृतान् लघून्।
रूक्षांस्तिक्तरसोपेतान् हृद्यान् रुचिकरान् पटून्॥71॥
रक्ताद्याः शालयः+ जीर्णाः षष्टिकाः+च ज्वरे हिताः।
श्लेष्मोत्तरे वीततुषाः+तथा वाटीकृता यवाः॥72॥
ओदनः+तैः स्रुतः+ द्विः+त्रिः प्रयोक्तव्यः+ यथायथम्।
दोषदूष्यादिबलतः+ ज्वरघ्नक्वाथसाधितः॥73॥
मुद्गाद्यैः+लघुभिः+यूषाः कुलत्थैः+च ज्वरापहाः।
कारवेल्लककर्कोटबालमूलकपर्पटैः॥74॥
वार्ताकनिम्बकुसुमपटोलफलपल्लवैः।
अत्यन्तलघुभिः+मांसैः+जाङ्गलैः+च हिता रसाः॥75॥
व्याघ्रीपरूषतर्करीद्राक्षामलकदाडिमैः।
संस्कृताः पिप्पलीशुण्ठीधान्यजीरकसैन्धवैः॥76॥
सितामधुभ्यां प्रायेण संयुता वा कृताकृताः।
अनम्लतक्रसिद्धानि रुच्यानि व्यञ्जनानि च॥77॥
अच्छानि+अनलसम्पन्नानि अनुपाने+अपि योजयेत्।
तानि क्वथितशीतं च वारि मद्यं च सात्म्यतः॥78॥

सज्वरं ज्वरम्+उक्तं वा दिनान्ते भोजयेत्+लघु।
श्लेष्मक्षयविवृद्धोष्मा बलवान्+अनलः+तदा॥79॥
यथा+उचिते+अथवा काले देशसात्म्यानुरोधतः।
प्राक्+अल्पवह्निः+भुञ्जानः+ न हि+अजीर्णेन पीड्यते॥80॥
कषायपानपथ्यान्नैः+दशाहः+ इति लङ्घिते।
सर्पिः+दद्यात्+कफे मन्दे वातपित्तोत्तरे ज्वरे॥81॥
पक्वेषु दोषेषु+अमृतं तत्+विषोपमम्+अन्यथा।
दशाहे स्यात्+अतीते+अपि ज्वरोपद्रववृद्धिकृत्॥82॥
लङ्घनादिक्रमं तत्र कुर्यात्+आकफसङ्क्षयात्।
देहधात्वबलत्वात्+च ज्वरः+ जीर्णः+अनुवर्तते॥83॥
रूक्षं हि तेजः+ ज्वरकृत्+तेजसा रूक्षितस्य च।
वमनस्वेदकालाम्बुकषायलघुभोजनैः॥84॥
यः स्यात्+अतिबलः+ धातुः सहचारी सदागतिः।
तस्य संशमनं सर्पिः+दीप्तस्य+इव+अम्बु वेश्मनः॥85॥
वातपित्तजितामग्र्यं संस्कारं च+अनुरुध्यते।
सुतरां तत्+हि+अतः+ दद्यात्+यथासु+औषधसाधितम्॥86॥
विपरीतं ज्वरोष्माणं जयेत्+पित्तं च शैत्यतः।
स्नेहात्+वातं घृतं तुल्यं योगसंस्कारतः कफम्॥87॥
पूर्वे कषायः सघृताः सर्वे योज्या यथामलम्।
त्रिफलापिचुमन्दत्वङ्मधुकं बृहतीद्वयम्॥88॥
समसूरदलं क्वाथः सघृतः+ ज्वरकासहा।
पिप्पलीन्द्रयवधावनितिक्तासारिवामलकतामलकीभिः॥89॥
बिल्वमुस्तहिमपालनिसेव्यैः+द्राक्षया+अतिविषया स्थिरया च।
घृतम्+आशु निहन्ति साधितं ज्वरम्+अग्निं विषमं हलीमकम्॥90॥
अरुचिं भृशतापम्+अंसयोः+वमथुं पार्श्वशिरोरुजं क्षयम्।
तैल्वकं पवनजन्मनि ज्वरे योजयेत्+त्रिवृतया वियोजितम्॥91॥
तिक्तकं वृषघृतं च पैत्तिके यत्+च पालनिकया शृतं हविः।
विडङ्गसौवर्चलचव्यपाठाव्योषाग्निसिन्धूद्भवयावशूकैः॥92॥
पलांशकैः क्षीरसमं घृतस्य प्रस्थं पचेत्+जीर्णकफज्वरघ्नम्।
गुडूच्या रसकल्काभ्यां त्रिफलाया वृषस्य च॥93॥
मृद्वीकाया बलायाः+च स्नेहाः सिद्धा ज्वरच्छिदः।
जीर्णे घृते च भुञ्जीत मृदुमांसरसौदनम्॥94॥

बलं हि+अलं दोषहरं परं तत्+च बलप्रदम्।
कफपित्तहरा मुद्गकारवेल्लादिजा रसाः॥95॥
प्रायेण तस्मात्+न हिता जीर्णे वातोत्तरे ज्वरे।
शूलोदावर्तविष्टम्भजनना ज्वरवर्धनाः॥96॥
न शाम्यति+एवम्+अपि चेत्+ज्वरः कुर्वीत शोधनम्।
शोधनार्हस्य, वमनं प्राक्+उक्तं तस्य योजयेत्॥97॥
आमाशयगते दोषे बलिनः पालयन्+बलम्।
पक्वे तु शिथिले दोषे ज्वरे वा विषमद्यजे॥98॥
मोदकं त्रिफलाश्यामात्रिवृत्पिप्पलिकेसरैः।
ससितामधुभिः+दद्यात्+व्योषाद्यं वा विरेचनम्॥99॥
(लिह्यात्+वा त्रैवृतं चूर्णं संयुक्तं मधुसर्पिषा)
द्राक्षाधात्रीरसं तद्वत्+सद्राक्षां वा हरीतकीम्॥100॥
आरग्वधं वा पयसा मृद्वीकानां रसेन वा।
त्रिफलां त्रायमाणां वा पयसा ज्वरितः पिबेत्॥101॥
विरिक्तानां च संसर्गी मण्डपूर्वा यथाक्रमम्।
च्यवमानं ज्वरोत्क्लिष्टम्+उपेक्षेत मलं सदा॥102॥
पक्वः+अपि हि विकुर्वीत दोषः कोष्ठे कृतास्पदः।
अतिप्रवर्तमानं वा पाचयन् सङ्ग्रहं नयेत्॥103॥
आमसङ्ग्रहणे दोषा दोषोपक्रम ईरिताः।
पाययेत्+दोषहरणं मोहात्+आमज्वरे तु यः॥104॥
प्रसुप्तं कृष्णसर्पं सः+ कराग्रेण परामृशेत्।
ज्वरक्षीणस्य न हितं वमनं न विरेचनम्॥105॥
कामं तु पयसा तस्य निरूहैः+वा हरेत्+मलान्।
क्षीरोचितस्य प्रक्षीणश्लेष्मणः+ दाहतृड्वतः॥106॥
क्षीरं पित्तानिलार्तस्य पथ्यम्+अपि+अतिसारिणः।
तत्+वपुः+लङ्घनोत्तप्तं प्लुष्टं वनम्+इव+अग्निना॥107॥
दिव्याम्बु जीवयेत्+तस्य ज्वरं च+आशु नियच्छति।
संस्कृतं शीतमुष्णं वा तस्मात्+धारोष्णम्+एव वा॥108॥
विभज्य काले युञ्जीत ज्वरिणं हन्ति+अतः+अन्यथा।
पयः सशुण्ठीखर्जूरमृद्वीकाशर्कराघृतम्॥109॥
शृतशीतं मधुयुतं तृड्दाहज्वरनाशनम्।
तद्वत्+ द्राक्षाबलायष्टीसारिवाकणचन्दनैः॥110॥

चतुर्गुणेन+अम्भसा वा पिप्पल्या वा शृतं पिबेत्।

कासात्+श्वासात्+शिरःशूलात्+पार्श्वशूलात्+चिरज्वरात्॥111॥

मुच्यते ज्वरितः पीत्वा पञ्चमूलीशृतं पयः।

शृतम्+एरण्डमूलेन बालबिल्वेन वा ज्वरात्॥112॥

धारोष्णं वा पयः पीत्वा विबद्धानिलवर्चसः।

सरक्तपिच्छातिसृतेः सतृट्शूलप्रवाहिकात्॥113॥

सिद्धं शुण्ठीबलाव्याघ्रीगोकण्टकगुडैः पयः।

शोफमूत्रशकृद्वातविबन्धज्वरकासजित्॥114॥

वृश्चीवबिल्ववर्षाभूसाधितं ज्वरशोफनुत्।

शिंशिपासारसिद्धं च क्षीरम्+आशु ज्वरापहम्॥115॥

निरूहः+तु बलं बह्निं विज्वरत्वं मुदं रुचिम्।

दोषे युक्तः करोति+आशु पक्वे पक्वाशयं गते॥116॥

पित्तं वा कफपित्तं वा पक्वाशयगतं हरेत्।

स्रंसनं त्रीन्+अपि मलान् बस्तिः पक्वाशयाश्रयान्॥117॥

प्रक्षीणकफपित्तस्य त्रिकपृष्ठकटिग्रहे।

दीप्ताग्नेः+बद्धशकृतः प्रयुञ्जीता+अनुवासनम्॥118॥

पटोलनिम्बच्छदनकटुकाचतुरङ्गुलैः।

स्थिराबलागोक्षुरकमदनोशीरवालकैः॥119॥

पयस्यर्धोदके क्वाथं क्षीरशेषं विमिश्रितम्।

कल्कितैः+मुस्तमदनकृष्णामधुकवत्सकैः॥120॥

बस्तिं मधुघृताभ्यां च पीडयेत्+ज्वरनाशनम्।

चतस्रः पर्णिनीः+यष्टीफलोशीरनृपद्रुमान्॥121॥

क्वाथयेत्+कल्कयेत्+यष्टीशताह्वाफलिनीफलम्।

मुस्तं च बस्तिः सगुडक्षौद्रसर्पिः+ज्वरापहः॥122॥

जीवन्तीं मदनं मेदां पिप्पलीं मधुकं वचाम्।

ऋद्धिं रास्नां बलां बिल्वं शतपुष्पां शतावरीम्॥123॥

पिष्ट्वा क्षीरं जलं सर्पिः+तैलं च+एकत्र साधितम्।

ज्वरे+अनुवासनं दद्यात्+यथास्नेहं यथामलम्॥124॥

ये च सिद्धिषु वक्ष्यन्ते बस्तयः+ ज्वरनाशनाः।

शिरोरुग्गौरवश्लेष्महरमिन्द्रियबोधनम्॥125॥

जीर्णज्वरे रुचिकरं दद्यात्+नस्यं विरेचनम्।

स्नैहिकं शून्यशिरसः+ दाहार्ते पित्तनाशनम्॥126॥

धूमगण्डूषकवलान् यथादोषं च कल्पयेत्।
प्रतिश्यायास्यवैरस्यशिरःकण्ठामयापहान्॥127॥
अरुचौ मातुलुङ्गस्य केसरं साज्यसैन्धवम्।
धात्रीद्राक्षासितानां वा कल्कम्+आस्येन धारयेत्॥128॥
यथा+उपशयसंस्पर्शान् शीतोष्णद्रव्यकल्पितान्।
अभ्यङ्गालेपसेकादीन् ज्वरे जीर्णे त्वगाश्रिते॥129॥
कुर्यात्+अञ्जनधूमान्+च तथा+एव+आगन्तुजे+अपि तान्।
दाहे सहस्रधौतेन सर्पिषा+अभ्यङ्गम्+आचरेत्॥130॥
सूत्रोक्तैः+च गणैः+तैः+तैः+मधुराम्लकषायकैः।
दूर्वादिभिः+वा पित्तघ्नैः शोधनादिगणोदितैः॥131॥
शीतवीर्यैः+हिमस्पर्शैः क्वाथकल्कीकृतैः पचेत्।
तैलं सक्षीरम्+अभ्यङ्गात्+सद्यः+ दाहज्वरापहम्॥132॥
शिरः+ गात्रं च तैः+एव न+अतिपिष्टैः प्रलेपयेत्।
तत्+क्वाथेन परीषेकम्+अवगाहं च योजयेत्॥133॥
तथा+आरनालसलिलक्षीरशुक्तघृतादिभिः।
कपित्थमातुलुङ्गाम्लविदारीरोध्रदाडिमैः॥136॥
बदरीपल्लवोत्थेन फेनेनारिष्टकस्य वा।
लिप्ते+अङ्गे दाहरुङ्मोहाश्च्छर्दिस्तृष्णा च शाम्यति॥135॥
यः+ वर्णितः पित्तहरः+ दोषोपक्रमणे क्रमः।
तं च शीलयतः शीघ्रं सदाहः+ नश्यति ज्वरः॥136॥
वीर्योष्णैः+उष्णसंस्पर्शैः+तगरागुरुकुङ्कुमैः।
कुष्ठस्थौणेयशैलेयसरलामरदारुभिः॥137॥
नखरास्नापुरवचाचण्डैलाद्वयचोरकैः।
पृथ्वीकाशिग्रुसुरसाहिंस्राध्यामकसर्षपैः॥138॥
दशमूलामृतैरण्डद्वयपत्तूररोहिषैः।
तमालपत्रभूतीकशल्लकीधान्यदीप्यकैः॥139॥
मिशिमाषकुलत्थाग्निप्रकीर्यानाकुलीद्वयैः।
अन्यैः+च तत्+विधैः+द्रव्यैः शीते तैलं ज्वरे पचेत्॥140॥
क्वथितैः कल्कितैः+युक्तैः सुरासौवीरकादिभिः।
तेन+अभ्यञ्जयात्+सुखोष्णेन, तैः सुपिष्टैः+च लेपयेत्॥141॥
कवोष्णैः+तैः परीषेकम्+अवगाहं च कल्पयेत्।
केवलैः+अपि तद्वत्+च सुक्तगोमूत्रमस्तुभिः॥142॥

आरग्वधादिवर्गं च पानाभ्यञ्जनलेपने।
धूपानगरुजान् यान्+च वक्ष्यन्ते विषमज्वरे॥143॥
अग्न्यनग्निकृतान् स्वेदान् स्वेदि भेषजभोजनम्।
गर्भभूवेश्मशयनं कुथकम्बलरल्लकान्॥144॥
निर्धूमदीप्तैः+अङ्गारैः+हसन्तीः+च हसन्तिकाः।
मद्यं सत्र्यूषणं तक्रं कुलत्थव्रीहिकोद्रवान्॥145॥
संशीलयेत्+वेपथुमान् यच्चान्यत्+अपि पित्तलम्।
दयिताः स्तनशालिन्यः पीना विभ्रमभूषणाः॥146॥
यौवनासवमत्ताः+च तम्+आलिङ्गेयुः+अङ्गनाः।
वीतशीतं च विज्ञाय ताः+ततः+अपनयेत्+पुनः॥147॥
वर्धनेन+एकदोषस्य क्षपणेनोच्छ्रितस्य वा।
कफस्थानानुपूर्व्या वा तुल्यकक्षाञ्जयेत्+मलान्॥148॥
सन्निपातज्वरस्य+अन्ते कर्णिमूले सुदारुणः।
शोफः सञ्जायते येन कश्चित्+एव विमुच्यते॥149॥
रक्तावसेचनैः शीघ्रं सर्पिः पानैः+च तं जयेत्।
प्रदेहैः कफपित्तघ्नैः+नावनैः कवलग्रहैः॥180॥
शीतोष्णस्निग्धरूक्षाद्यैः+ज्वरः+ यस्य न शाम्यति।
शाखानुसारी तस्य+आशु मुञ्चेत्+बाह्वोः क्रमात्+शिराम्॥151॥
अयम्+एव विधिः कार्यः+ विषमे+अपि यथायथम्।
ज्वरे विभज्य वातादीन् यः+च+अनन्तरम्+उच्यते॥152॥
पटोलकटुकामुस्ताप्राणदामधुकैः कृताः।
त्रिचतुःपञ्चशः क्वाथा विषमज्वरनाशनाः॥153॥
योजयेत्+त्रिफलां पथ्यां गुडूचीं पिप्पलीं पृथक्।
तैः+तैः+विधानैः सगुडं भल्लातकम्+अथ+अपि वा॥154॥
लङ्घनं बृंहणं वा+आदौ ज्वरागमनवासरे।
प्रातः सतैलं लशुनं प्राग्भक्तं वा तथा घृतम्॥155॥
जीर्णं तद्वत्+दधि पयः+तक्रं सर्पिः+च षट्पलम्।
कल्याणकं पञ्चगव्यं तिक्ताख्यं वृषसाधितम्॥156॥
त्रिफलाकोलतर्करीक्वाथे दध्ना शृतं घृतम्।
तिल्वकत्वक्कृतावापं विषमज्वरजित्+परम्॥157॥
सुरां तीक्ष्णं च यत्+मद्यं शिखितित्तिरिदक्षजम्।
मांसं मेद्योष्णवीर्यं च सहान्नेन प्रकामतः॥158॥

सेवित्वा तत्+अहः स्वप्यात्+अथवा पुनः+उल्लिखेत्।
सर्पिषः+ महतीं मात्रां पीत्वा वा छर्दयेत्+पुनः॥159॥
नीलिनीम्+अजगन्धां च त्रिवृतां कटुरोहिणीम्।
पिबेत्+ज्वरस्य+आगमने स्नेहस्वेदोपपादितः॥160॥
मनोह्वा सैन्धवं कृष्णा तैलेन नयनाञ्जनम्।
योज्यं हिङ्गुसमा व्याघ्रीवसा नस्यं ससैन्धवम्॥161॥
पुराणसर्पिः सिंहस्य वसा तद्वत्+ससैन्धवा।
पलङ्कषा निम्बपत्रं वचा कुष्ठं हरीतकी॥162॥
सर्षपाः सयवाः सर्पिः+धूपः+ विड्वा बिडालजा।
पुरध्यामवचासर्जनिम्बार्कागरुदारुभिः॥163॥
धूपः+ ज्वरेषु सर्वेषु कार्यः+अयम्+अपराजितः।
धूपनस्य+अञ्जनोत्त्रासा ये च+उक्ताः+चित्तवैकृतैः॥163॥
दैवाश्रयं च भैषजं ज्वरान् सर्वान् व्यपोहति।
विशेषात्+विषमान् प्रायः+ते हि+आगन्त्वनुबन्धजाः॥165॥
यथास्वं च सिरां विध्येत्+अशान्तौ विषमज्वरे।
केवलानिलवीसर्पविस्फोटाभिहतज्वरे॥166॥
सर्पिः पानहिमालेपसेकमांसरसाशनम्।
कुर्यात्+यथास्वमुक्तं च रक्तमोक्षादि साधनम्॥167॥
ग्रहोत्थे भूतविद्योक्तं बलिमन्त्रादि साधनम्।
ओषधीगन्धजे पित्तशमनं विषजित्+विषे॥168॥
इष्टैः+अर्थैः+मनोज्ञैः+च यथादोषशमेन च।
हिताहितविवेकैः+च ज्वरं क्रोधादिजं जयेत्॥169॥
क्रोधजः+ याति कामेन शान्तिं क्रोधेन कामजः।
भयशोकोद्भवौ ताभ्यां भीशोकाभ्यां तथा+इतरौ॥170॥
शापाथर्वणमन्त्रोत्थे विधिः+दैवव्यपाश्रयः।
ते ज्वराः केवलाः पूर्वं व्याप्यन्ते+अनन्तरं मलैः॥।171॥
तस्मात्+दोषानुसारेण तेषु+आहारादि कल्पयेत्।
न हि ज्वरः+अनुबध्नाति मारुताद्यैः+विना कृतः॥172॥
ज्वरकालस्मृतिं च+अस्य हारिभिः+विषयैः+हरेत्।
करुणार्द्रं मनः शुद्धं सर्वज्वरविनाशनम्॥173॥
त्यजेत्+आबललाभात्+च व्यायामस्नानमैथुनम्।
गुर्वसात्म्यविदाहि+अन्नं यत्+च+अन्यत्+ज्वरकारणम्॥174॥

न विज्वरः+अपि सहसा सर्वान्+हीनः+ भवेत्+तथा।
निवृत्तः+अपि ज्वरः शीघ्रं व्यापादयति दुर्बलम्॥175॥
सद्यः प्राणहरः+ यस्मात्+तस्मात्+तस्य विशेषतः।
तस्यां तस्याम्+अवस्थायां तत्+तत्+कुर्यात्+भिषग्जितम्॥176॥
ओषधयः+ मणयः+च सुमन्त्राः
साधुगुरुद्विजदैवतपूजाः।
प्रीतिकरा मनसः+ विषयाः+च
घ्नन्ति+अपि विष्णुकृतं ज्वरम्+उग्रम्॥177॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने ज्वरचिकित्सितं नाम प्रथमः+अध्यायः।1॥
द्वितीयः+अध्यायाः
अथ+अतः+ रक्तपित्तचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
ऊर्ध्वगं बलिनः+अवेगम्+एकदोषानुगं नवम्।
रक्तपित्तं सुखे काले साधयेत्+निरुपद्रम्॥1॥
अधोगं योपयेत्+रक्तं यत्+च दोषद्वयानुगम्।
शान्तं शान्तं पुनः कुप्यन्+मार्गान्+मार्गान्तरं च यत्॥2॥
अतिप्रवृत्तं मन्दाग्नेः+त्रिदोषं द्विपथं त्यजेत्।
ज्ञात्वा निदानम्+अयनं मलौ+अनुबलौ बलम्॥3॥
देशकालाद्यवस्थां च रक्तपित्ते प्रयोजयेत्।
लङ्घनं बृंहणं वा+आदौ शोधनं शमनं तथा॥4॥
सन्तर्पणोत्थं बलिनः+ बहुदोषस्य साधयेत्।
ऊर्ध्वभागं विरेकेण वमनेन तु+अधोगतम्॥5॥
शमनैः+बृंहणैः+च+अन्यत्+लङ्घ्यबृंह्यान्+अवेक्ष्य च।
ऊर्ध्वं प्रवृत्ते शमनौ रसौ तिक्तकषायकौ॥6॥
उपवासः+च निःशुण्ठीषडङ्गोदकपायिनः।
अधोगे रक्तपित्ते तु बृंहणः+ मधुरः+ रसः॥7॥
ऊर्ध्वगे तर्पणं योज्यं प्राक् च पेया तु+अधोगते।
अश्नतः+ बलिनः+अशुद्धं न धार्यं तत्+हि रोगकृत्॥8॥
धारयेत्+अन्यथा शीघ्रम्+अग्निवत्+शीघ्रकारि तत्।
त्रिवृच्छ्याम्+आकषायेण कल्केन च सशर्करम्॥9॥
साधयेत्+विधिवत्+लेहं लिह्यात्+पाणितलं ततः।

त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु॥10॥
मोदकः सन्निपातोर्ध्वरक्तशोफज्वरापहः।
त्रिवृत्समसिता तद्वत् पिप्ललीपादसंयुता॥11॥
वमनं फलसंयुक्तं तर्पणं ससितामधु।
ससितं वा जलं क्षौद्रयुक्तं वा मधुकोदकम्॥12॥
क्षीरं वा रसमिक्षोः+वा शुद्धस्य+अनन्तरः+ विधिः।
यथास्वं मन्थपेयादिः प्रयोज्यः+ रक्षता बलम्॥13॥
मन्थः+ ज्वरोक्तः+ द्राक्षादिः, पित्तघ्नैः+वा फलैः कृतः।
मधुखर्जूरमृद्वीकापरूषकसिताम्भसा॥14॥
मन्थः+ वा पञ्चसारेण सघृतैः+लाजसक्तुभिः।
दाडिमामलकाम्लः+ वा मन्दाग्न्यम्लाभिलाषिणाम्॥15॥
कमलोत्पलकिञ्जल्कपृश्निपर्णीप्रियङ्गुकाः।
उशीरं शाबवं रोध्रं शृङ्गबेरं कुचन्दनम्॥16॥
ह्रीबेरं धातकीपुष्पं बिल्वमध्यं दुरालभा।
अर्धार्धैः+विहिताः पेया वक्ष्यन्ते पादयौगिकाः॥17॥
भूनिम्बसेव्यजलदा मसूराः पृश्निपर्णि+अपि।
विदारिगन्धा मुद्गाः+च बला सर्पिः+हरेणुकाः॥18॥
जाङ्गलानि च मांसानि शीतवीर्याणि साधयेत्।
पृथक्+पृथक्+जले तेषां यवागूः कल्पयेत्+रसे॥19॥
शीताः सशर्कराक्षौद्राः+तद्वत्+मांसरसान्+अपि।
ईषदम्लान्+अनम्लान् वा घृतभृष्टान् सशर्करान्॥20॥
शूकशिम्बीभवं धान्यं रक्ते शाकं च शस्यते।
अन्नस्वरूपविज्ञाने यदुक्तं लघु शीतलम्॥21॥
पूर्वोक्तम्+अम्बु पानीयं पञ्चमूलेन वा शृतम्।
लघूना शृतशीतं वा मध्वम्भः+ वा फलाम्बु वा॥21॥
शशः सवास्तुकः शस्तः+ विबन्धे तित्तिरिः पुनः।
उदुम्बरस्य निर्यूहे साधितः+ मारुते+अधिके॥23॥
प्लक्षस्य बर्हिणः+तद्वत्+न्यग्रोधस्य च कुक्कुटः।
यत्+किञ्चित्+रक्तपित्तस्य निदानं तत्+च वर्जयेत्॥24॥
वासारसेन फलिनीमृद्रोध्राञ्जनमाक्षिकम्।
पित्तासृक् शमयेत्+पीतं, निर्यासः+ वा+अटरूषकात्॥25॥
शर्करामधुसंयुक्तः केवलः+ वा, शृतः+अपि वा।

वृषः सद्यः+ जयति+अस्रं, सः+ हि+अस्य परमौषधम्॥26॥
पटोलमालतीनिम्बचन्दनद्वयपद्मकम्।
रोध्रः+ वृषः+तन्दुलीयः कृष्णा मृन्मदयन्तिका॥27॥
शतावरी गोपकन्या काकोल्यौ मधुयष्टिका।
रक्तपित्तहराः क्वाथाः+त्रयः समधुशर्कराः॥28॥
पलाशवल्कक्वाथः+ वा सुशीतः शर्करान्वितः।
लिह्यात्+वा मधुसर्पिर्भ्यां गवाश्वशकृतः+ रसम्॥29॥
सक्षौद्रं ग्रथिते रक्ते लिह्यात्+पारावतात्+शकृत्।
अतिनिःस्रुतरक्तः+च क्षौद्रेण रुधिरं पिबेत्॥30॥
जाङ्गलं, भक्षयेत्+वा+आजम्+आमं पित्तयुतं यकृत्।
चन्दनोशीरजलदलाजमुद्गकणायवैः॥31॥
बलाजले पर्युषितैः कषायः+ रक्तपित्तहा।
प्रसादः+चन्दनाम्भोजसेव्यमृद्भृष्टलोष्टजः॥32॥
सुशीतः ससिताक्षौद्रः शोणितातिप्रवृत्तिजित्।
आपोथ्य वा नवे कुम्भे प्लावयेत्+इक्षुगण्डिकाः॥33॥
स्थितं तत्+गुप्तम्+आकाशे रात्रिं प्रातः स्रुतं जलम्।
मधुमद्विकचाम्भोजकृतोत्तंसं च तत्+गुणम्॥34॥
ये च पित्तज्वरे च+उक्ताः कषायाः+तान्+च योजयेत्।
कषायैः+विविधैः+एभिः+दीप्ते+अग्नौ विजिते कफे॥35॥
रक्तपित्तं न चेत्+शाम्येत्+तत्र वातोल्बणे पयः।
युञ्ज्यात्+छागं शृतं, तद्वत्+गव्यं पञ्चगुणे+अम्भसि॥36॥
पञ्चमूलेन लघुना शृतं वा ससितामधु।
जीवकर्षभकद्राक्षाबलागोक्षुरनागरैः॥37॥
पृथक्+पृथक्+शृतं क्षीरं सघृतं सितया+अथवा।
गोकण्टकाभीरुशृतं पर्णिनीभिः+तथा पयः॥38॥
हन्ति+आशु रक्तं सरुजं विशेषात्+मूत्रमार्गगम्।
विण्मार्गगे विशेषेण हितं मोचरसेन तु ॥39॥
वटप्ररोहैः शुङ्गैः+वा शुण्ठ्युदीच्योत्पलैः+अपि।
रक्तातिसारदुर्नामचिकित्सां च+अत्र कल्पयेत्॥40॥
पीत्वा कषायान् पयसा भुञ्जीत पयसा+एव च।
कषाययोगैः+एभिः+वा विपक्वं पाययेत्+घृतम्॥41॥
समूलमस्तकं क्षुण्णं वृषमष्टगुणे+अम्भसि।

पक्त्वा+अष्टांशावशेषेण घृतं तेन विपाचेयत्॥42॥
तत्+पुष्पगर्भं तत्+शीतं सक्षौद्रं पित्तशोणितम्।
पित्तगुल्मज्वरश्वासकासहृद्रोगकामलाः॥43॥
तिमिरभ्रमवीसर्पस्वरसादान्+च नाशयेत्।
पलाशवृन्तस्वरसे तद्गर्भं च घृतं पचेत्॥44॥
सक्षौद्रं तत्+च रक्तघ्नं, तथा+एव त्रायमाणया।
रक्ते सपिच्छे सकफे ग्रथिते कण्ठमार्गगे॥45॥
लिह्यात्+माक्षिकसर्पिर्भ्यां क्षारम्+उत्पलनालजम्।
पृथक्+पृथक् तथा+अम्भोजरेणुश्यामामधूकजम्॥46॥
गुदागमे विशेषेण शोणिते बस्तिः+इष्यते।
घ्राणगे रुधिरे शुद्धे नावनं च+अनुषेचयेत्॥47॥
कषाययोगान् पूर्वोक्तान् क्षीरेक्ष्वादिरसाप्लुतान्।
क्षीरादीन्+ससितान्+तोयं केवलं वा जलं हितम्॥48॥
रसः+ दाडिमपुष्पाणाम्+आम्रास्थ्नः शाड्वलस्य वा।
कल्पयेत्+शीतवर्गं च प्रदेहाभ्यञ्जनादिषु॥49॥
यत्+च पित्तज्वरे प्रोक्तं बहिरन्तः+च भेषजम्।
रक्तपित्ते हितं तत्+च क्षतक्षीणे हितं च यत्॥50॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने
रक्तपित्तचिकित्सितं नाम द्वितीयः+अध्यायः॥2॥
तृतीयः+अध्यायः।
अथ+अतः कासचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
केवलानिलजं कासं स्नेहैरादौ+उपाचरेत्।
वातघ्नसिद्धैः स्निग्धैः+च पेयायूषरसादिभिः॥1॥
लेहैः+धूमैः+तथा+अभ्यङ्गस्वेदसेकावगाहनैः।
बस्तिभिः+बद्धविड्वातं, सपित्तं तु+ऊर्ध्वभक्तिकैः॥2॥
घृतैः क्षीरैः+च, सकफं जयेत्+स्नेहविरेचनैः।
गुडूचीकण्टकारीभ्यां पृथक्+त्रिंशत्+पलात्+रसे॥3॥
प्रस्थः सिद्धः+ घृतात्+वातकासनुद्वह्निदीपनः।
क्षाररास्नावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः॥4॥
द्विशाणैः सर्पिषः प्रस्थं पञ्चकोलयुतैः पचेत्।
दशमूलस्य निर्यूहे पीतः+ मण्डानुपायिना॥5॥

स कासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत्।
द्रोणे+अपां साधयेत्+रास्नादशमूलशतावरी॥6॥
पलोन्मिता द्विकुडवं कुलत्थं बदरं यवम्।
तुलार्धं च+अजमांसस्य तेन साध्यं घृताढकम्॥7॥
समक्षीरं पलांशैः+च जीवनीयैः समीक्ष्य तत्।
प्रयुक्तं वातरोगेषु पाननावनबस्तिभिः॥8॥
पञ्चकासान् शिरःकम्पं योनिवङ्क्षणवेदनाम्।
सर्वाङ्गैकाङ्गरोगान्+च सप्लीहोर्ध्वानिलान् जयेत्॥9॥
विदार्यादिगणक्वाथकल्कसिद्धं च कासजित्।
अशोकबीजक्षवकजन्तुघ्नाञ्जनपद्मकैः॥10॥
सबिडैः+च घृतं सिद्धं तत्+चूर्णं वा घृतप्लुतम्।
लिह्यात्+पयः+च+अनु पिबेत्+आजं कासातिपीडितः॥11॥
विडङ्गं नागरं रास्ना पिप्पली हिङ्गु सैन्धवम्।
भार्गी क्षारः+च तत्+चूर्णं पिबेत्+वा घृतमात्रया॥12॥
सकफे+अनिलजे कासे श्वासहिध्माहताग्निषु।
दुरालभां शृङ्गबेरं शठीं द्राक्षां सितोपलाम्॥13॥
लिह्यात्+कर्कटशृङ्गीं च कासे तैलेन वातजे।
दुस्पर्शां पिप्पलीं मुस्तां भार्गीं कर्कटकीं शठीम्॥14॥
पुराणगुडतैलाभ्यां चूर्णितानि+अवलेहयेत्।
तद्वत्+सकृष्णां शुण्ठीं च सभार्गीं तद्वत्+एव च॥15॥
पिबेत्+च कृष्णां कोष्णेन सलिलेन ससैन्धवाम्।
मस्तुना ससितां शुण्ठीं दध्ना वा कणरेणुकाम्॥16॥
पिबेत्+बदरमज्ज्ञः+ वा मदिरादधिमस्तुभिः।
अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम्॥17॥
कासी सपीनसः+ धूमं स्नैहिकं विधिना पिबेत्।
हिध्माश्वासोक्तधूमान्+च क्षीरमांसरसाशनः॥18॥
ग्राम्यानूपौदकैः शालियवगोधूमषष्टिकान्।
रसैः+माषात्मगुप्तानां यूषैः+वा भोजयेत्+हितान्॥19॥
यवानीपिप्पलीबिल्वमध्यनागरचित्रकैः।
रास्नाजाजीपृथक्पर्णीपलाशशठिपौष्करैः॥20॥
सिद्धां स्निग्धाम्ललवणां पेयाम्+अनिलजे पिबेत्।
कटिहृत्पार्श्वकोष्ठार्तिश्वासहिध्माप्रणाशनीम्॥21॥

दशमूलरसे तद्वत् पञ्चकोलगुडान्विताम्।
पिबेत्+पेयां समतिलां क्षैरेयीं वा ससैन्धवाम्॥22॥
मात्स्यकौक्कुटवाराहैः+मांसैः+वा साज्यसैन्धवाम्।
वास्तुकः+ वायसीशाकं कासघ्नः सुनिषण्णकः॥23॥
कण्टकार्याः फलं पत्रं बालं शुष्कं च मूलकम्।
स्नेहाः+तैलादयः+ भक्ष्याः क्षीरेक्षुरसगौडिकाः॥24॥
दधिमस्त्वारनालाम्लफलाम्बुमदिराः पिबेत्।
पित्तकासे तु सकफे वमनं सर्पिषा हितम्॥25॥
तथा मदनकाश्मर्यमधुकक्वथितैः+जलैः।
फलयष्ट्याह्वकल्कैः+वा विदारीक्षुरसाप्लुतैः॥26॥
पित्तकासे तनुकफे त्रिवृतां मधुरैः+युताम्।
युञ्ज्याद्विरेकाय युतां घनश्लेष्मणि तिक्तकैः॥27॥
हृतदोषः+ हिमं स्वादु स्निग्धं संसर्जनं भजेत्।
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम्॥28॥
लेहः पैत्ते सिताधात्रीक्षौद्रद्राक्षाहिमोत्पलैः।
सकफे साब्दमरिचः, सघृतः सानिले हितः॥29॥
मृद्वीकार्धशतं त्रिंशत्पिप्पलीः शर्करापलम्।
लेहयेत्+मधुना गोः+वा क्षीरपस्य शकृद्रसम्॥30॥
त्वगेलाव्योषमृद्वीकापिप्पलीमूलपौष्करैः।
लाजमुस्ताशठीरास्नाधात्रीफलबिभीतकैः॥31॥
शर्कराक्षौद्रसर्पिर्भिः+लेहः+ हृद्रोगकासहा।
मधुरैः+जाङ्गलरसैः+यवश्यामाककोद्रवाः॥32॥
मुद्गादियूषैः शाकैः+च तिक्तकैः+मात्रया हिताः।
घनश्लेष्मणि लेहाः+च तिक्तका मधुसंयुताः॥33॥
शालयः स्युः+तनुकफे षष्टिकाः+च रसादिभिः।
शर्कराम्भः+अनुपानार्थं द्राक्षेक्षुस्वरसाः पयः॥34॥
काकोलीबृहतीमेदाद्वयैः सवृषनागरैः।
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत्॥35॥
द्राक्षां कणां पञ्चमूलं तृणाख्यं च पचेत्+जले।
तेन क्षीरं शृतं शीतं पिबेत्+समधुशर्करम्॥36॥
साधितां तेन पेयां वा सुशीतां मधुना+अन्विताम्।
शठीह्रीबेरबृहतीशर्कराविश्वभेषजम्॥37॥

पिष्ट्वा रसं पिबेत्+पूतं वस्त्रेण घृतमूर्च्छितम्।
मेदां विदारीं काकोलीं स्वयंगुप्ताफलं बलाम्॥38॥
शर्करां जीवकं मुद्गमाषपर्ण्यौ दुरालभाम्।
कल्कीकृत्य पचेत्+सर्पिः क्षीरेण+अष्टगुणेन तत्॥39॥
पानभोजनलेहेषु प्रयुक्तं पित्तकासजित्।
लिह्यात्+वा चूर्णम्+एतेषां कषायम्+अथवा पिबेत्॥40॥
कफकासी पिबेत्+आदौ सुरकाष्ठात् प्रदीपितात्।
स्नेहं परिस्रुतं व्योषयवक्षारावचूर्णितम्॥41॥
स्निग्धं विरेचयेत्+ऊर्ध्वम्+अधः+ मूर्ध्नि च युक्तितः।
तीक्ष्णैः+विरेकैः+बलिनं संसर्गीं च+अस्य योजयेत्॥42॥
यवमुद्गकुलत्थान्नैः+उष्णरूक्षैः कटुत्कटैः।
कासमर्दकवार्ताकव्याघ्रीक्षारकणान्वितैः॥43॥
धान्वबैलरसैः स्नेहैः+तिलसर्षपनिम्बजैः।
दशमूलाम्बु घर्माम्बु मद्यं मध्वम्बु वा पिबेत्॥44॥
मूलैः पौष्करशम्याकपटोलैः संस्थितं निशाम्।
पिबेत्+वारि सहक्षौद्रं कालेषु+अन्नस्य वा त्रिषु॥45॥
पिप्पली पिप्पलीमूलं शृङ्गबेरं बिभीतकम्।
शिखिकुक्कुटपिच्छानां मषी क्षारः+ यवोद्भवः॥46॥
विशाला पिप्पलीमूलं त्रिवृता च मधुद्रवाः।
कफकासहरा लेहाः+त्रयः श्लोकार्धयोजिताः॥47॥
मधुना मरिचं लिह्यात्+मधुना+एव च जोङ्गकम्।
पृथक्+रसान्+च मधुना व्याघ्रीवार्ताकभृङ्गजान्॥48॥
कासघ्नस्य+अश्वशकृतः सुरसस्य+असितस्य च।
देवदारुशठीरास्नाकर्कटाख्यादुरालभाः॥49॥
पिप्पली नागरं मुस्तं पथ्या धात्री सितोपला।
लाजाः सितोपला सर्पिः शृङ्गी धात्रीफलोद्भवा॥50॥
मधुतैलयुता लेहाः+त्रयः+ वातानुगे कफे।
द्वे पले दाडिमात्+अष्टौ गुडात्+व्योषात्+पलत्रयम्॥51॥
रोचनं दीपनं स्वर्यं पीनसश्वासकासजित्।
गुडक्षारोषणकणादाडिमं श्वासकासजित्॥52॥
क्रमात्+पलद्वयार्धाक्षकर्षार्धाक्षपलोन्मितम्।
पिबेत्+ज्वरोक्तं पथ्यादि सशृङ्गीकं च पाचनम्॥53॥

अथवा दीप्यकत्रिवृद्विशालाघनपौष्करम्।
सकणं क्वथितं मूत्रे कफकासी जले+अपि वा॥54॥
तैलभृष्टं च वैदेहीकल्काक्षं ससितोपलम्।
पाययेत्+कफकासघ्नं कुलत्थसलिलाप्लुतम्॥55॥
दशमूलाढके प्रस्थं घृतस्य+अक्षसमैः पचेत्।
पुष्कराह्वशठीबिल्वसुरसाव्योषहिङ्गुभिः॥56॥
पेयानुपानं तत्+सर्ववातश्लेष्मामयापहम्।
निर्गुण्डीपत्रनिर्यासससाधितं कासजित्+घृतम्॥57॥
घृतं रसे विडङ्गानां व्योषगर्भं च साधितम्॥ 57 1/2॥
पुनर्नवशिवाटिकासरलकासमर्दामृतापटोलबृहतीफणिज्जकरसैः पयः संयुतैः।
घृतं त्रिकटुना च सिद्धम्+उपयुज्य सञ्जायते।
न कासविषमज्वरक्षयगुदाङ्कुरेभ्यः+ भयम्॥58॥
समूलफलपत्रायाः कण्टकार्या रसाढके॥59॥
घृतप्रस्थं बलाव्योषविडङ्गशठिदाडिमैः।
सौवर्चलयवक्षारमूलामलकपौष्करैः॥60॥
वृश्चीवबृहतीपथ्यायवानीचित्रकर्धिभिः।
मृद्वीकाचव्यवर्षाभूदुरालम्भाम्लवेतसैः॥61॥
शृङ्गीतामलकीभार्गीरास्नागोक्षुरकैः पचेत्।
कल्कैः+तत्+सर्वकासेषु श्वासहिध्मासु च+इष्यते॥62॥
कण्टकारीघृतं च+एतत्+कफव्याधिविनाशनम्।
पचेत्+व्याघ्रीतुलां क्षुण्णां वहे+अपाम्+आढकस्थिते॥63॥
क्षिपेत् पूते तु सञ्चूर्ण्य व्योषरास्नामृताग्निकान्।
शृङ्गीभार्गीघनग्रन्थिधन्वयासान् पलार्धकान्॥64॥
सर्पिषः षोडशपलं चत्वारिंशत्पलीनि च।
मत्स्यण्डिकायाः शुद्धायाः पुनः+च तत्+अधिश्रयेत्॥65॥
दर्वीलेपिनि शीते च पृथक् द्विकुडवं क्षिपेत्।
पिप्पलीनां तवक्षीर्या माक्षिकस्य+अनवस्य च॥66॥
लेहः+अयं गुल्महृद्रोगदुर्नामश्वासकासजित्।
शमनं च पिबेत्+धूमं शोधनं बहले कफे॥67॥
मनःशिलालमधुकमांसीमुस्तेङ्गुदीत्वचः।
धूमं कासघ्नविधिना पीत्वा क्षीरं पिबेत्+अनु॥68॥
निष्ठ्यूतान्ते गुडयुतं कोष्णं धूमः+ निहन्ति सः।

वातश्लेष्मोत्तरान् कासान्+अचिरेण चिरन्तनात्॥69॥
तमकः कफकासे तु स्यात्+च+उत्पित्तानुबन्धजः।
पित्तकासक्रियां तत्र यथावस्थं प्रयोजयेत्॥70॥
कफानुबन्धे पवने कुर्यात्+कफहरां क्रियाम्।
पित्तानुबन्धयोः+वातकफयोः पित्तनाशिनीम्॥71॥
वातश्लेष्मात्मके शुष्के स्निग्धमार्द्रे विरूक्षणम्।
कासे कर्म सपित्ते तु कफजे तिक्तसंयुतम्॥72॥
उरस्यन्तःक्षते सद्यः+ लाक्षां क्षौद्रयुतां पिबेत्।
क्षीरेण शालीन् जीर्णे+अद्यात्+क्षीरेण+एव सशर्करान्॥73॥
पार्श्वबस्तिसरुक्+च+अल्पपित्ताग्निस्तां सुरायुताम्।
भिन्नविट्कः समुस्तातिविषापाठां सवत्सकाम्॥74॥
लाक्षां सर्पिः+मधूच्छिष्टं जीवनीयं गणं सिताम्।
त्वक्क्षीरीं समितं क्षीरे पक्त्वा दीप्तानलः पिबेत्॥75॥
इक्ष्वारिकाबिसग्रन्थिपद्मकेसरचन्दनैः।
शृतं पयः+ मधुयुतं सन्धानार्थं पिबेत्+क्षती॥76॥
यवानां चूर्णम्+आमानां क्षीरे सिद्धं घृतान्वितम्।
ज्वरदाहे सिताक्षौद्रसक्तून्+वा पयसा पिबेत्॥77॥
कासवान्+तु पिबेत्+सर्पिः+मधुरौषधसाधितम्।
गुडोदकं वा क्वथितं सक्षौद्रमरिचं हितम्॥78॥
चूर्णम्+आमलकानां वा क्षीरे पक्वं घृतान्वितम्।
रसायनविधानेन पिप्पलीः+वा प्रयोजयेत्॥79॥
कासी पर्वास्थिशूली च लिह्यात्+सघृतमाक्षिकाः।
मधूकमधुकद्राक्षात्वक्क्षीरीपिप्पलीबलाः॥80॥
त्रिजातमर्धकर्षांशं पिप्पल्यर्धपलं सिता।
द्राक्षा मधूकं खर्जूरं पलांशं श्लक्ष्णचूर्णितम्॥81॥
मधुना गुटीका घ्नन्ति ता वृष्याः पित्तशोणितम्।
कासश्वासारुचिच्छर्दिमूर्च्छाहिध्मामदभ्रमान्॥82॥
क्षतक्षयस्वरभ्रंशप्लीहशोषाढ्यमारुतान्।
रक्तनिष्ठीवहृत्पार्श्वरुक्पिपासाज्वरान्+अपि॥83॥
वर्षाभूशर्करारक्तशालितण्डुलजं रजः।
रक्तष्ठीवी पिबेत्+सिद्धं द्राक्षारसपयोघृतैः॥84॥
मधूकमधुकक्षीरसिद्धं वा तण्डुलीयकम्।

यथास्वं मार्गविसृते रक्ते कुर्यात्+च भेषजम्॥85॥

मूढवातः+त्वजामेदः सुराभृष्टं ससैन्धवम्।

क्षामः क्षीणः क्षतोरस्कः+ मन्दनिद्रः+अग्निदीप्तिमान्॥86॥

शृतक्षीरसरेण+अद्यात्+सघृतक्षौद्रशर्करम्।

शर्करायवगोधूमं जीवकर्षभकौ मधु॥78॥

शृतक्षीरानुपानं वा लिह्यात्+क्षीणः क्षतः कृशः।

क्रव्यात्+पिशितनिर्यूहं घृतभृष्टं पिबेत्+च सः॥88॥

पिप्पलीक्षौद्रसंयुक्तं मांसशोणितवर्धनम्।

न्यग्रोधोदुम्बराश्वत्थप्लक्षशालप्रियङ्गुभिः॥89॥

तालमस्तकजम्बूत्वक्प्रियालैः+च सपद्मकैः।

साश्वकर्णैः शृतात्+क्षीरात्+अद्यात्+जातेन सर्पिषा॥90॥

शाल्योदनं क्षतोरस्कः क्षीणशुक्रबलेन्द्रियः।

वातपित्तार्दिते+अभ्यङ्गः+ गात्रभेदे घृतैः+मतः॥91॥

तैलैः+च+अनिलरोगघ्नैः पीडिते मातरिश्वना।

हृत्पार्श्वार्तिषु पानं स्यात्+जीवनीयस्य सर्पिषः॥92॥

कुर्यात्+वा वातरोगघ्नं पित्तरक्ताविरोधि यत्।

यष्ट्याह्वनागबलयोः क्वाथे क्षीरसमे घृतम्॥93॥

पयस्यापिप्पलीवांशीकल्कैः सिद्धं क्षते हितम्।

जीवनीयः+ गणः शुण्ठी वरी वीरा पुनर्नवा॥94॥

बलाभार्गीस्वगुप्तर्द्धिशठीतामलकीकणाः।

शृङ्गाटकं पयस्या च पञ्चमूलं च यत्+लघु॥95॥

द्राक्षाक्षोडादि च फलं मधुरस्निग्धबृंहणम्।

तैः पचेत्+सर्पिषः प्रस्थं कर्षांशैः श्लक्ष्णकल्कितैः॥96॥

क्षीरधात्रीविदारीक्षुच्छागमांसरसान्वितम्।

प्रस्थार्धं मधुनः शीते शर्करार्धतुलारजः॥97॥

पलार्धकं च मरिचत्वगेलापत्रकेसरम्।

विनीय चूर्णितं तस्मात्+लिह्यात्+मात्रां यथाबलम्॥98॥

अमृतप्राशम्+इति+एतत्+नराणाम्+अमृतं घृतम्।

सुधामृतरसं प्राश्यं क्षीरमांसरसाशिना॥99॥

नष्टशुक्रक्षतक्षीणदुर्बलव्याधिकर्शितान्।

स्त्रीप्रसक्तान् कृशान् वर्णस्वरहीनान्+च बृंहयेत्॥100॥

कासहिध्माज्वरश्वासदाहतृष्णास्रपित्तनुत्।

पुत्रदं छर्दिमूर्च्छाहृद्योनिमूत्रामयापहम्॥101॥
श्वदंष्ट्रोशीरमञ्जिष्ठाबलाकाश्मर्यकत्तृणम्।
दर्भमूलं पृथक्पर्णी पलाशर्षभकौ स्थिराम्॥102॥
पालिकानि पचेत्+तेषां रसे क्षीरचतुर्गुणे।
कल्कैः स्वगुप्ताजीवन्तीमेदर्षभकजीवकैः॥103॥
शतावर्यर्द्धिमृद्वीकाशर्कराश्रावणीबिसैः।
प्रस्थः सिद्धः+ घृतात्+वातपित्तहृद्रोगशूलनुत्॥104॥
मूत्रकृच्छ्रप्रमेहार्शःकासशोषक्षयापहः।
धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांसदः॥105॥
मधुकाष्टपलद्राक्षाप्रस्थक्वाथे पचेत्+घृतम्।
पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले॥106॥
पृथक्+अष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत्।
समसक्तु क्षतक्षीणरक्तगुल्मेषु तत्+हितम्॥107॥
धात्रीफलविदारीक्षुजीवनीयरसात्+घृतात्।
गव्याजयोः+च पयसोः प्रस्थं विपाचयेत्॥108॥
सिद्धशीते सिताक्षौद्रं द्विप्रस्थं विनयेत्+ततः।
यक्ष्मापस्मारपित्तासृक्कासमेहक्षयापहम्॥109॥
वयःस्थापनम्+आयुष्यं मांसशुक्रबलप्रदम्।
घृतं तु पित्ते+अभ्यधिके लिह्यात्+वाते+अधिके पिबेत्॥110॥
लीढं निर्वापयेत्+पित्तम्+अल्पत्वात्+हन्ति नानलम्।
आक्रामति+अनिलं पीतम्+ऊष्माणं निरुणद्धि च॥111॥
क्षामक्षीणकृशाङ्गानाम्+एतानि+एव घृतानि तु।
त्वक्क्षीरीशर्करालाजचूर्णैः स्त्यानानि योजयेत्॥112॥
सर्पिः+गुडान् समध्वंशान् कृत्वा दद्यात्+पयः+अनु च।
रेतः+ वीर्यं बलं पुष्टिं तैः+आशुतरम्+आप्नुयात्॥113॥
वीतत्वगस्थिकूष्माण्डतुलां स्विन्नां पुनः पचेत्।
घट्टयन् सर्पिषः प्रस्थे क्षौद्रवर्णे+अत्र च क्षिपेत्॥114॥
खण्डात्+शतं कणाशुण्ठ्योः+द्विपलं जीरकात्+अपि।
त्रिजातधान्यमरिचं पृथक्+अर्धपलांशकम्॥115॥
अवतारितशीते च दत्वा क्षौद्रं घृतार्धकम्।
खजेन+आमथ्य च स्थाप्यं तत्+निहन्ति+उपयोजितम्॥116॥
कासहिध्माज्वरश्वासरक्तपित्तक्षतक्षयान्।

उरःसन्धानजननं मेधास्मृतिबलप्रदम्॥117॥
अश्विभ्यां विहितं हृद्यं कूष्माण्डकरसायनम्।
पिबेत्+नागबलामूलस्यार्धकर्षाभिवर्धितम्॥118॥
पलं क्षीरयुतं मासं क्षीरवृत्तिः+अनन्नभुक्।
एषः+ प्रयोगः पुष्ट्य+आयुर्बलवर्णकरः परम्॥119॥
मण्डूकपर्ण्याः कल्पः+अयं यष्ट्या विश्वौषधस्य च।
पादशेषं जलद्रोणे पचेत्+नागबलातुलाम्॥120॥
तेन क्वाथेन तुल्यांशं घृतं क्षीरं च साधयेत्।
पलार्धिकैः+च+अतिबलाबलायष्टीपुनर्नवैः॥121॥
प्रपौण्डरीककाश्मर्यप्रियालकपिकच्छुभिः।
अश्वगन्धासिताभीरुमेदायुग्मत्रिकण्टकैः॥122॥
काकोलीक्षीरकाकोलीक्षीरशुक्लाद्विजीरकैः।
मृणालबिसखर्जूरशृङ्गाटककसेरुकैः॥123॥
एतत्+नागबलासर्पिः पित्तरक्तक्षतक्षयान्।
जयेत्+तृड्भ्रमदाहान्+च बलापुष्टिकरं परम्॥124॥
वर्ण्यम्+आयुष्यम्+ओजस्यं वलीपलितनाशनम्।
उपयुज्य च षण्मासान् वृद्धः+अपि तरुणायते॥125॥
दीप्ते+अग्नौ विधिः+एषः+ स्यात् मन्दे दीपनपाचनः।
यक्ष्मोक्तः क्षतिनां शस्तः+, ग्राही शकृति तु द्रवे॥126॥
दशमूलं स्वयंगुप्तां शङ्खपुष्पीं शठीं बलाम्।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान्॥127॥
भार्गीं पुष्करमूलं च द्विपलांशं यवाढकम्।
हरीतकीशतं च+एकं जलपञ्चाढके पचेत्॥128॥
यवस्वेदे कषायं तं पूतं तत्+च+अभयाशतम्।
पचेत्+गुडतुलां दत्त्वा कुडवं च पृथक्+घृतात्॥129॥
तैलात्+सपिप्पलीचूर्णात्+सिद्धशीते च माक्षिकात्।
लेहं द्वे च+अभये नित्यम्+अतः खादेत्+रसायनात्॥ 130॥
तत्+वलीपलितं हन्यात्+वर्णायुर्बलवर्धनम्।
पञ्चकासान् क्षयं श्वासं सहिध्मं विषमज्वरम्॥131॥
मेहगुल्मग्रहण्यर्शोहृद्रोगारुचिपीनसान्।
अगस्त्यविहितं धन्यम्+इदं श्रेष्ठं रसायनम्॥132॥
दशमूलं बलां मूर्वां हरिद्रे पिप्पलीद्वयम्।

पाठाश्वगन्धापामार्गस्वगुप्तातिविषामृताः॥133॥
बालबिल्वं त्रिवृद्दन्तीमूलं पत्रं च चित्रकात्।
पयस्यां कुटजं हिंस्रा पुष्पं सारं च बीजकात्॥134॥
बोटस्थविरभल्लातविकङ्कतशतावरीः।
पूतीकरञ्जशम्याकचन्द्रलेखासहाचरम्॥135॥
सौभाञ्जनकनिम्बत्वगिक्षुरं च पलांशकम्।
पथ्यासहस्रं सशतं यवानां च+आढकद्वयम्॥136॥
पचेत्+अष्टगुणे तोये यवस्वेदे+अवतारयेत्।
पूते क्षिपेत्+सपथ्ये च तत्र जीर्णगुडात्+तुलाम्॥137॥
तैलाज्यधात्रीरसतः प्रस्थं प्रस्थं ततः पुनः।
अधिश्रयेत्+मृदौ+अग्नौ दर्वीलेपे+अवतार्य च॥138॥
शीते प्रस्थद्वयं क्षौद्रात्+पिप्पलीकुडवं क्षिपेत्।
चूर्णीकृतं त्रिजातात्+च त्रिपलं निखनेत्+ततः॥139॥
धान्ये पुराणकुम्भस्थं मासं खादेत्+च पूर्ववत्।
रसायनं वसिष्ठोक्तम्+एतत्+पूर्वगुणाधिकम्॥140॥
स्वस्थानां निष्परीहारं सर्वर्तुषु च शस्यते।
पालिकं सैन्धवं शुण्ठी द्वे च सौवर्चलात्+पले॥141॥
कुडवांशानि वृक्षाम्लं दाडिमं पत्रमार्जकात्।
एकैकां मरिचाजाज्योः+धान्यकाद् द्वे चतुर्थिके॥142॥
शर्करायाः पलानि+अत्र दश द्वे च प्रदाययेत्।
कृत्वा चूर्णम्+अतः+ मात्राम्+अन्नपानेषु दापयेत्॥143॥
रुच्यं तत्+दीपनं बल्यं पार्श्वार्तिश्वासकासजित्।
एकां षोडशिकां धान्यात्+ द्वे द्वे च+अजाजिदीप्यकात्॥144॥
ताभ्यां दाडिमवृक्षाम्ले द्विः+द्विः सौर्वचलात्+पलम्।
शुण्ठ्याः कर्षं दधित्थस्य मध्यात्+पञ्च पलानि च॥145॥
तत्+चूर्णं षोडशपलैः शर्कराया विमिश्रयेत्।
षाडवः+अयं प्रदेयः स्यात्+अन्नपानेषु पूर्ववत्॥146॥
विधिः+च यक्ष्मविहितः+ यथावस्थं क्षते हितः।
निवृत्ते क्षतदोषे तु कफे वृद्धे उरः शिरः॥147॥
दाल्यते कासिनः+ यस्य सः+ ना धूमान् पिबेत्+इमान्।
द्विमेदाद्विबलायष्टीकल्कैः क्षौमे सुभाविते॥148॥
वर्तिं कृत्वा पिबेत्+धूमं जीवनीयघृतानुपः।

मनःशिलापलाशाजगन्धात्वक्क्षीरिनागरैः॥149॥
तद्वत्+एव+अनुपानं तु शर्करेक्षुगुडोदकम्।
पिष्ट्वा मनःशिलां तुल्याम्+आर्द्रया वटशुङ्गया॥150॥
ससर्पिष्कं पिबेत्+धूमं तित्तिरिप्रतिभोजनम्।
क्षयजे बृंहणं पूर्वं कुर्यात्+अग्नेः+च वर्धनम्॥151॥
बहुदोषाय सस्नेहं मृदु दद्यात्+विरेचनम्।
शम्याकेन त्रिवृतया मृद्वीकारसयुक्तया॥152॥
तिल्वकस्य कषायेण विदारीस्वरसेन च।
सर्पिः सिद्धं पिबेत्+युक्त्या क्षीणदेहः+ विशोधनम्॥153॥
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान्।
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्॥154॥
विदारीभिः कदम्बैः+वा तालसस्यैः+च साधितम्।
घृतं पयः+च मूत्रस्य वैवर्ण्ये कृच्छ्रनिर्गमे॥155॥
शूने सवेदने मेढ्रे पायौ सश्रोणिवङ्क्षणे।
घृतमण्डेन लघुना+अनुवास्यः+ मिश्रकेण वा॥156॥
जाङ्गलैः प्रतिभुक्तस्य वर्तकाद्या बिलेशयाः।
क्रमशः प्रसहाः+तद्वत्+प्रयोज्याः पिशिताशिनः॥157॥
औष्ण्यात्+प्रमाथिभावात्+च स्रोतोभ्यः+च्यावयन्ति ते।
कफं शुद्धैः+च तैः पुष्टिं कुर्यात्+सम्यग् वहन् रसः॥158॥
चविकात्रिफलाभार्गीदशमूलैः सचित्रकैः।
कुलत्थपिप्पलीमूलपाठाकोलयवैः+जले॥159॥
शृतैः+नागरदुःस्पर्शापिप्पलीशठिपौष्करैः।
पिष्टैः कर्कटशृङ्ग्या च समैः सर्पिः+विपाचयेत्॥160॥
सिद्धे+अस्मिन्+चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च।
दत्त्वा युक्त्या पिबेत्+मात्रां क्षयकासनिपीडितः॥161॥
कासमर्दाभयामुस्तापाठाकट्फलनागरैः।
पिप्पल्या कटुरोहिण्या काश्मर्या सुरसेन च॥162॥
अक्षमात्रैः+घृतप्रस्थं क्षीरद्राक्षारसाढके।
पचेत्+शोषज्वरप्लीहसर्वकासहरं शिवम्॥163॥
वृषव्याघ्रीगुडूचीनां पत्रमूलफलाङ्कुरात्।
रसकल्कैः+घृतं पक्वं हन्ति कासज्वरारुचीः॥164॥
द्विगुणे दाडिमरसे सिद्धं वा व्योषसंयुतम्।

पिबेत्+उपरि भुक्तस्य यवक्षारयुतं नरः॥165॥
पिप्पलीगुडसिद्धं वला छागक्षीरयुतं घृतम्।
एतानि+अग्निविवृद्ध्यर्थं सर्पींषि क्षयकासिनाम्॥166॥
स्युः+दोषबद्धकण्ठोरःस्रोतसां च विशुद्धये।
प्रस्थोन्मिते यवक्वाथे विंशतिं विजयाः पचेत्॥167॥
स्विन्ना मृदित्वा ताः+तस्मिन्+पुराणात्+षट्पलं गुडात्।
पिप्पल्या द्विपलं कर्षं मनोह्वाया रसाञ्जनात्॥168॥
दत्त्वा+अर्धाक्षं पचेत्+भूयः सः+ लेहः श्वासकासजित्।
श्वाविधां सूचयः+ दग्धाः सघृतक्षौद्रशर्कराः॥169॥
श्वासकासहरा, बर्हिपादौ वा मधुसर्पिषा।
एरण्डपत्रक्षारं वा व्योषतैलगुडान्वितम्॥170॥
लेहयेत्, क्षारम्+एवं वा सुरसैः+अण्डपत्रजम्।
लिह्यात् त्र्यूषणचूर्णं वा पुराणगुडसर्पिषा॥171॥
पद्मकं त्रिफला व्योषं विडङ्गं देवादरु च।
बला रास्ना च तत्+चूर्णं समस्तं समशर्करम्॥172॥
खादेत्+मधुघृताभ्यां वा लिह्यात्+कसहरं परम्।
तद्वत्+मरिचचूर्णं वा सघृतक्षौद्रशर्करम्॥173॥
पथ्याशुण्ठीघनगुडैः+गुटिकां धारयेत्+मुखे।
सर्वेषु श्वासकासेषु, केवलं वा बिभीतकम्॥174॥
पत्रकल्कं घृतभृष्टं तिल्वकस्य सशर्करम्।
पेया वा+उत्कारिका छर्दितृट्कासामातिसारजित्॥175॥
कण्टकारीरसे सिद्धः+ मुद्गयूषः सुसंस्कृतः।
सगौरामलकः साम्लः सर्वकासभिषग्जितम्॥176॥
वातघ्नौषधनिःक्वाथे क्षीरं यूषान् रसान्+अपि।
वैष्किरान् प्रातुदान् बैलान् दापयेत्+क्षयकासिने॥177॥
क्षतकासे च ये धूमाः सानुपानां निदर्शिताः।
क्षयकासे+अपि ते योज्या वक्ष्यते यत्+च यक्ष्मणि॥178॥
बृंहणं दीपनं च+अग्नेः स्रोतसां च विशोधनम्।
व्यत्यासात्+क्षयकासिभ्यः+ बल्यं सर्वं प्रशस्यते॥179॥
सन्निपातोद्भवः+ घोरः क्षयकासः+ यतः+ततः।
यथादोषबलं तस्य सन्निपातहितं हितम्॥180॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने कासचिकित्सितं नाम तृतीयः+अध्यायः॥3॥

चतुर्थः+अध्यायः।

अथ+अतः श्वासहिध्माचिकित्सितं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

श्वासहिध्मा यतः+तुल्यहेत्वाद्याः, साधनं ततः।

तुल्यम्+एव तदार्तं च पूर्वं स्वेदैः+उपाचरेत्॥1॥

स्निग्धैः+लवणतैलाक्तं तैः खेषु ग्रथितः कफः।

सुलीनः+अपि विलीनः+अस्य कोष्ठं प्राप्तः सुनिर्हरः॥2॥

स्रोतसां स्यात्+मृदुत्वं च मरुतः+च+अनुलोमता।

स्विन्नं च भोजयेत्+अन्नं स्निग्धम्+आनूपजैः रसैः॥3॥

दध्युत्तरेण वा, दद्यात्+ततः+अस्मै वमनं मृदुः।

विशेषात्+कासवमथुहृद्ग्रहस्वरसादिने॥4॥

पिप्पलीसैन्धवक्षौद्रयुक्तं वाताविरोधि यत्।

निर्हृते सुखम्+आप्नोति सः+ कफे दुष्टविग्रहे॥5॥

स्रोतःसु च विशुद्धेषु चरति+अविहतः+अनिलः।

ध्मानोदावर्ततमके मातुलुङ्गाम्लवेतसैः॥6॥

हिङ्गुपीलुबिडैः+युक्तम्+अन्नं स्यात्+अनुलोमनम्।

ससैन्धवं फलाम्लं वा कोष्णं दद्यात्+विरेचनम्॥7॥

एते हि कफसंरुद्धगतिप्राणप्रकोपजाः।

तस्मात्+तन्मार्गशुद्ध्यर्थम्+ऊर्ध्वाधः शोधनं हितम्॥8॥

उदीर्यते भृशतरं मार्गरोधात्+वहत्+जलम्।

यथा तथा+अनिलः+तस्य मार्गम्+अस्मात्+विशोधयेत्॥9॥

अशान्तौ कृतसंशुद्धेः+धूमैः+लीनं मलं हरेत्।

हरिद्रापत्रम्+एरण्डमूलं लाक्षां मनःशिलाम्॥10॥

सदेवदार्वलं मांसीं पिष्ट्वा वर्तिं प्रकल्पयेत्।

तां घृताक्तां पिबेत्+धूमं यवान् वा घृतसंयुतान्॥11॥

मधूच्छिष्टं सर्जरसं घृतं वा गुरु वा+अगुरु।

चन्दनं वा तथा शृङ्गं वालान्+वा स्नाव वा गवाम्॥12॥

ऋक्षगोधकुरङ्गैणचर्मशृङ्गखुराणि वा।

गुग्गुलुं वा मनोह्वां वा शालनिर्यासम्+एव वा॥13॥

शल्लकीं गुग्गुलुं लोहं पद्मकं वा घृताप्लुतम्।

अवश्यं स्वेदनीयानाम्+अस्वेद्यानाम्+अपि क्षणम्॥14॥
स्वेदयेत्+ससिताक्षीरसुखोष्णस्नेहसेचनैः।
उत्कारिकोपनाहैः+च स्वेदाध्यायोक्तभेषजैः॥15॥
उरः कण्ठं च मृदुभिः सामे त्वाम्+अविधिं चरेत्।
अतियोगोद्धतं वातं दृष्ट्वा पवननाशनैः॥16॥
स्निग्धै रसाद्यैः+न+अत्युष्णैः+अभ्यङ्गैः+च शमं नयेत्।
अनुत्क्लिष्टकफास्विन्नदुर्बलानां हि शोधनात्॥17॥
वायुः+लब्धास्पदः+ मर्म संशोष्य+आशु हरेत्+असून्।
कषायलेहस्नेहाद्यैः+तेषां संशमयेत्+अतः॥18॥
क्षीणक्षतातिसारासृक्पित्तदाहानुबन्धजान्।
मधुरस्निग्धशीताद्यैः+हिध्माश्वासान्+उपाचरेत्॥19॥
कुलत्थदशमूलानां क्वाथे स्युः+जाङ्गला रसाः।
यूषाः+च शिग्रुवार्ताककासघ्नवृषमूलकैः॥20॥
पल्लवैः+निम्बकुलकबृहतीमातुलुङ्गजैः।
व्याघ्रीदुरालभाशृङ्गीबिल्वमध्यत्रिकण्टकैः॥12॥
सामृताग्निकुलत्थैः+च यूषः स्यात्+क्वथितैः+जले।
तद्वत्+रास्नाबृहत्यादिबलामुद्गैः सचित्रकैः॥22॥
पेयां च चित्रकाजाजीशृङ्गीसौवर्चलैः कृता।
दशमूलेन वा कासश्वासहिध्मारुजापहा॥23॥
दशमूलशठीरास्नाभार्गीबिल्वर्द्धिपौष्करैः।
कुलीरशृङ्गीचपलातामलक्यमृतौषधे॥24॥
पिबेत्+कषायं जीर्णे+अशस्मिन् पेयां तैः+एव साधिताम्।
शालीषष्टिकगोधूमयवमुद्गकुलत्थभुक्॥25॥
कासहृद्ग्रहपार्श्वार्तिहिध्माश्वासप्रशान्तये।
सक्तून् वा+अर्काङ्कुरक्षीरभावितानां समाक्षिकान्॥26॥
यवानां दशमूलादिनिष्क्वाथलुलितान् पिबेत्।
अन्ने च योजयेत् क्षारहिङ्ग्वाज्यबिडदाडिमान्॥27.।
सपौष्करशठीव्योषमातुलुङ्गाम्लवेतसान्।
दशमूलस्य वा क्वाथम्+अथवा देवदारुणः॥28॥
पिबेत्+वा वारुणीमण्डं हिध्माश्वासी पिपासितः।
पिप्पलीपिप्पलीमूलपथ्याजन्तुघ्नचित्रकैः॥29॥
कल्कितैः+लेपिते रुढे निःक्षिपेत्+घृतभाजने।

तक्रं मासस्थितं तत्+हि दीपनं श्वासकासजित्॥30॥
पाठां मधुरसां दारु सरलं च निशि स्थितम्।
सुरामण्डे+अल्पलवणं पिबेत्+प्रसृतसम्मितम्॥31॥
भार्गीशुण्ठ्यौ सुखाम्भोभिः क्षारं वा मरिचान्वितम्।
स्वक्वाथपिष्टां लुलितां बाष्पिकां पाययेत वा॥32॥
स्वरसः सप्तपर्णस्य पुष्पाणां वा शिरीषतः।
हिध्माश्वासे मधुकणायुक्तः पित्तकफानुगे॥33॥
उत्कारिका तुगाकृष्णामधूलीघृतनागरैः।
पित्तानुबन्धे योक्तव्या, पवने तु+अनुबन्धिनि॥34॥
श्वाविच्छशामिषकणाघृतशल्यकशोणितैः।
सुवर्चलारसव्योषसर्पिर्भिः सहितं पयः॥35॥
अनु शाल्योदनं पेयं वातपित्तानुबन्धिनि।
चतुर्गुणाम्बुसिद्धं वा छागं सगुडनागरम्॥36॥
पिप्पलीमूलमधुकगुडगोश्वशकृद्रसान्।
हिध्माभिष्यन्दकासघ्नान् लिह्यात्+मधुघृतान्वितान्॥37॥
गोगजाश्ववराहोष्ट्रखरमेषाजविड्रसम्।
समधु+एकैकशः+ लिह्यात्+बहुश्लेष्मा+अथवा पिबेत्॥38॥
चतुष्पात्+चर्मरोमास्थिखुरशृङ्गोद्भवां मषीम्।
तथा+एव वाजिगन्धाया लिह्यात्+श्वासी कफोल्बणः॥39॥
शठीपौष्करधात्रीः+वा पौष्करं वा कणान्वितम्।
गैरिकाञ्जनकृष्णां वा स्वरसं वा कपित्थजम्॥40॥
रसेन वा कपित्थस्य धात्रीसैन्धवपिप्पलीः।
घृतक्षौद्रेण वा पथ्याविडङ्गोषणपिप्पलीः॥41॥
कोललाजामलद्राक्षापिप्पलीनागराणि वा।
गुडतैलनिशाद्राक्षाकणारास्नोषणानि वा॥42॥
पिबेत्+रसाम्बुमद्याम्लैः+लेहौषधरजांसि वा।
जीवन्तीमुस्तसुरसत्वगेलाद्वयपौष्करम्॥43॥
चण्डातामलकीलोहभार्गीनागरवालकम्।
कर्कटाख्याशठीकृष्णानागकेसरचोरकम्॥44॥
उपयुक्तं यथाकामं चूर्णं द्विगुणशर्करम्।
पार्श्वरुग्ज्वरकासघ्नं हिध्माश्वासहरं परम्॥45॥
शठीतामलकीभार्ङ्गीचण्डावालकपौष्करम्।

शर्कराष्टगुणं चूर्णं हिध्माश्वासहरं परम्॥46॥
तुल्यं गुडं नागरं भक्षयेत्+नावयेत वा।
लशुनस्य पलाण्डोः+वा मूलं गृञ्जनकस्य वा॥47॥
चन्दनात्+वा रसं दद्यात्+नारीक्षीरेण नावनम्।
स्तन्येन मक्षिकाविष्ठामलक्तकरसेन वा॥48॥
ससैन्धवं घृताच्छं वा, सिद्धं स्तन्येन वा घृतम्।
कल्कितैः+मधुरद्रव्यैः+तत्+पिबेत्+नावयेत वा॥49॥
सकृत्+उष्णं सकृत्+शीतं व्यत्यासात् ससितामधु।
तद्वत्+पयः+तथा सिद्धम्+अधोभागौषधैः+घृतम्॥50॥
कणासौवर्चलक्षारवयस्थाहिङ्गुचोरकैः।
सकायस्थैः+घृतं मस्तुदशमूलरसे पचेत्॥51॥
तत्+पिबेत्+जीवनीयैः+वा लिह्यात्+समधु साधितम्।
तेजोवती+अभया कुष्ठं पिप्पली कटुरोहिणी॥52॥
भूतीकं पौष्करं मूलं पलाशः+चित्रकः शठी।
पटुद्वयं तामलकी जीवन्ती बिल्वपेशिका॥53॥
वचा पत्रं च तालीसं कर्षांशैः+तैः+विपाचयेत्।
हिङ्गुपादैः+घृतप्रस्थं पीतम्+आशु निहन्ति तत्॥54॥
शाखानिलार्शोग्रहणीहिध्माहृत्पार्श्ववेदनाः।
अर्धांशेन पिबेत्+सर्पिः क्षारेण पटुना+अथवा॥55॥
धान्वन्तरं वृषघृतं दाधिकं हपुषादि वा।
शीताम्बुसेकः सहसा त्रासविक्षेपभीशुचः॥56॥
हर्षेर्ष्योच्छ्वासरोधाः+च हितं कीटैः+च दंशनम्।
यत्+किञ्चित्+कफवातघ्नम्+उष्णं वातानुलोमनम्॥57॥
तत्+सेव्यं प्रायशः+ यत्+च सुतरां मारुतापहम्।
सर्वेषां बृंहणे हि+अल्पः शक्यः+च प्रायशः+ भवेत्॥58॥
न+अत्यर्थं शमने+अपायः+ भृशः+अशक्यः+च कर्षणे।
शमनैः+बृंहणैः+च+अतः+ भूयिष्ठं तान्+उपाचरेत्॥59॥
कासश्वासक्षयच्छर्दिहिध्माः+च+अन्योन्यभेषजैः॥59 1/2 ॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने श्वासहिध्माचिकित्सितं नाम चतुर्थः+अध्यायः॥4॥
पञ्चमः+अध्यायः।
अथ+अतः+ राजयक्ष्मादिचिकित्सितं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
बलिनः+ बहुदोषस्य स्निग्धस्विन्नस्य शोधनम्।
ऊर्ध्वाधः+ यक्ष्मिणः कुर्यात्+सस्नेहं यत्+न कर्शनम्॥1॥
पयसा फलयुक्तेन मधुरेण रसेन वा।
सर्पिष्मत्या यवाग्वा वा वमनद्रव्यसिद्धया॥2॥
वमेत् विरेचनं दद्यात्+त्रिवृच्छ्यामानुपद्रुमान्।
शर्करामधुसर्पिर्भिः पयसा तर्पणेन वा॥3॥
द्राक्षाविदारीकाश्मर्यमांसानां वा रसैः+युतान्।
शुद्धकोष्ठस्य युञ्जीत विधिं बृंहणदीपनम्॥4॥
हृद्यानि च+अन्नपानानि वातघ्नानि लघूनि च।
शालिषष्टिकगोधूमयवमुद्गं समोषितम्॥5॥
[लघुम्+अच्युतवीर्यं च सुजरं बलकृत्+च यत्।]
आजं क्षीरं घृतं मांसं क्रव्यात्+मांसं च शोषजित्।
काकोलूकवृकद्वीपिगवाश्वनकुलोरगम्॥6॥
गृध्रभासखरोष्ट्रं च हितं छद्मोपसंहितम्।
ज्ञातं जुगुप्सितं तद्धी छर्दिषे न बलौजसे॥7॥
मृगाद्याः पित्तकफयोः पवने प्रसहादयः।
वेसवारीकृताः पथ्या रसादिषु च कल्पिताः॥8॥
भृष्टाः सर्षपतैलेन सर्पिषा वा यथायथम्।
रसिका मृदवः स्निग्धाः पटुद्रव्याभिसंस्कृताः॥9॥
हिता मौलककौलत्थाः+तद्वत्+यूषाः+च साधिताः।
सपिप्पलीकं सयवं सकुलत्थं सनागरम्॥10॥
सदाडिमं सामलकं स्निग्धम्+आजं रसं पिबेत्।
तेन षड्विनिवर्तन्ते विकाराः पीनसादयः॥11॥
पिबेत्+च सुतरां मद्यं जीर्णं स्रोतोविशोधनम्।
पित्तादिषु विशेषेण मध्वरिष्टाच्छवारुणीः॥12॥
सिद्धं वा पञ्चमूलेन तामलक्या+अथवा जलम्।
पर्णिनीभिः+चतसृभिः+धान्यनागरकेण वा॥13॥
कल्पयेत्+च+अनुकूलः+अस्य तेन+अन्नं शुचि यत्नवान्।
दशमूलेन पयसा सिद्धं मांसरसेन वा॥14॥
बलागर्भं घृतं योज्यं क्रव्यात्+मांसरसेन वा।
सक्षौद्रं पयसा सिद्धं सर्पिः+दशगुणेन वा॥15॥

जीवन्तीं मधुकं द्राक्षां फलानि कुटजस्य च।
पुष्कराह्वं शठीं कृष्णां व्याघ्रीं गोक्षुरकं बलाम्॥16॥
नीलोत्पलं तामलकीं त्रायमाणां दुरालभाम्।
कल्कीकृत्य घृतं पक्वं रोगराजहरं परम्॥17॥
घृतं खर्जूरमृद्वीकामधुकैः सपरूषकैः।
सपिप्पलीकं वैस्वर्यकासश्वासज्वरापहम्॥18॥
दशमूलशृतात्+क्षीरात्+सर्पिः+यत्+उदियात्+नवम्।
सपिप्पलीकं सक्षौद्रं तत्+परं स्वरबोधनम्॥19॥
शिरः पार्श्वांसशूलघ्नं कासश्वासज्वरापहम्।
पञ्चभिः पञ्चमूलैः+वा शृताद्यदुदियात्+घृतम्॥20॥
पञ्चानां पञ्चमूलानां रसे क्षीरचतुर्गुणे।
सिद्धं सर्पिः+जयति+एतत्+यक्ष्मणः सप्तकं बलम्॥21॥
पञ्चकोलयवक्षारषट्पलेन पचेत्+घृतम्।
प्रस्थोन्मितं तुल्यपयः स्रोतसां तत्+विशोधनम्॥22॥
गुल्मज्वरोदरप्लीहग्रहणीपाण्डुपीनसान्।
श्वासकासाग्निसदनश्वयथूर्ध्वानिलाञ्जयेत्॥23॥
रास्नाबलागोक्षुरकस्थिरावर्षाभुवारिणि।
जीवन्तीपिप्पलीगर्भं सक्षीरं शोषजित्+घृतम्॥24॥
अश्वगन्धाशृतात्+क्षीरात्+घृतं च ससितापयः।
साधारणामिषतुलां तोयद्रोणद्वये पचेत्॥25॥
तेन+अष्टभागशेषेण जीवनीयैः पलोन्मितैः।
साधयेत्+सर्पिषः प्रस्थं वातपित्तामयापहम्॥26॥
मांससर्पिः+इदं पीतं युक्तं मांसरसेन वा।
कासश्वासस्वरभ्रंशशोषहृत्पार्शशूलजित्॥27॥
एलाजमोदात्रिलासौराष्ट्रीव्योषचित्रकान्।
सारानरिष्टगायत्रीशालबीजकसम्भवान्॥28॥
भल्लातकं विडङ्गं च पृथक्+अष्टपलोन्मितम्।
सलिले षोडशगुणे षोडशांशस्थितं पचेत्॥29॥
पुनः+तेन घृतप्रस्थं सिद्धे च+अस्मिन्+पलानि षट्।
तवक्षीर्याः क्षिपेत्+त्रिंशत्+सिताया द्विगुणं मधु॥30॥
घृतात्+त्रिजातात्+त्रिपलं ततः+ लीढं खजाहतम्।
पयोनुपानं तत्+प्राह्णे रसायनम्+अयन्त्रणम्॥31॥

मेध्यं चक्षुष्यम्+आयुष्यं दीपनं हन्ति च+अचिरात्।
मेहगुल्मक्षयव्याधिपाण्डुरोगभगन्दरान्॥32॥
ये च सर्पिः+गुडाः प्रोक्ताः क्षते योज्याः क्षये+अपि ते।
त्वगेलापिप्पलीक्षीरीशर्करा द्विगुणाः क्रमात्॥33॥
चूर्णिता भक्षिताः क्षौद्रसर्पिषा वा+अवलेहिताः।
स्वर्याः कासक्षयश्वासपार्श्वरुक्कफनाशनाः॥34॥
विशेषात्+स्वरसादे+अस्य नस्यधूमादि योजयेत्।
तत्र+अपि वातजे कोष्णं पिबेत्+औत्तरभक्तिकम्॥35॥
कासमर्दकवार्ताकीमार्कवस्वरसैः+घृतम्।
साधितं कासजित्स्वर्यं सिद्धमार्तगलेन वा॥36॥
बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्।
तैलं वा मधुकद्राक्षापिप्पलीकृमिनुत्फलैः॥37॥
हंसपाद्याः+च मूलेन पक्वं नस्तः+ निषेचयेत्।
सुखोदकानुपानं च ससर्पिष्कं गुडौदनम्॥38॥
अश्नीयात्+पायसं च+एवं स्निग्धं स्वेदं नियोजयेत्।
पित्तोद्भवे पिबेत्+सर्पिः श‍ृतशीतपयोनुपः॥39॥
क्षीरिवृक्षाङ्कुरक्वाथकल्कसिद्धं समाक्षिकम्।
अश्नीयात्+च ससर्पिष्कं यष्टीमधुकपायसम्॥40॥
बलाविदारिगन्धाभ्यां विदार्या मधुकेन च।
सिद्धं सलवणं सर्पिः+नस्यं स्वर्यम्+अनुत्तमम्॥41॥
प्रपौण्डरीकं मधुकं पिप्पली बृहती बला
साधितं क्षीरसर्पिः+च तत्+स्वर्यं नावनं परम्॥42॥
लिह्यात्+मधुरकाणां च चूर्णं मधुघृताप्लुतम्।
पिबेत्+कटूनि मूत्रेण कफजे रूक्षभोजनः॥43॥
कट्फलामलकव्योषं लिह्यात्+तैलमधुप्लुतम्।
व्योषक्षाराग्निचविकाभार्गीपथ्यामधूनि वा ॥44॥
यवैः+यवागूं यमके कणाधात्रीकृतां पिबेत्।
भुक्त्वा+अद्यात्+पिप्पलीं शुण्ठीं तीक्ष्णं वा वमनं भजेत्॥45॥
शर्कराक्षौद्रमिश्राणि श‍ृतानि मधुरैः सह।
पिबेत्+पयांसि यस्य+उच्चैः+वदतः+अभिहतः स्वरः॥46॥
विचित्रम्+अन्नम्+अरुचौ हितैः+उपहितं हितम्।
बहिः+अन्तर्मृजा चित्तनिर्वाणं हृद्यम्+औषधम्॥47॥

द्वौ कालौ दन्तपवनं भक्षयेत्+मुखधावनैः।
कषायैः क्षालयेत्+आस्यं धूमं प्रायोगिकं पिबेत्॥48॥
तालीसचूर्णवटकाः सकर्पूरसितोपलाः।
शशाङ्ककिरणाख्याः+च भक्ष्या रुचिकराः परम्॥49॥
वातात्+अरोचके तत्र पिबेत्+चूर्णं प्रसन्नया।
हरेणुकृष्णाकृमिजिद्द्राक्षासैन्धवनागरात्॥50॥
एलाभार्गीयवक्षारहिङ्गुयुक्तात्+घृतेन वा।
छर्दयेत्+वा वचाम्भोभिः पित्तात्+च गुडवारिभिः॥51॥
लिह्यात्+वा शर्करासर्पिः+लवणोत्तममाक्षिकम्।
कफात्+वमेत्+निम्बजलैः+दीप्यकारग्वधोदकम्॥52॥
पानं समध्वरिष्टाः+च तीक्ष्णाः समधुमाधवाः।
पिबेत्+चूर्णं च पूर्वोक्तं हरेण्वाद्युष्णवारिणा॥53॥
एलात्वङ्नागकुसुमतीक्ष्णकृष्णामहौषधम्।
भागवृद्धं क्रमात्+चूर्णं निहन्ति समशर्करम्॥54॥
प्रसेकारुचिहृत्पार्श्वकासश्वासगलामयान्।
यवानीतिंत्तिडीकम्लवेतसौषधदाडिमम्॥55॥
कृत्वा कोलं च कर्षांशं सितायासः+च चतुष्पलम्।
धान्यसौवर्चलाजाजीवराङ्गं च+अर्धकार्षिकम्॥56॥
पिप्पलीनां शतं च+एकं द्वे शते मरिचस्य च।
चूर्णम्+एतत्+परं रुच्यं हृद्यं ग्राहि, हिनस्ति च॥57॥
विबन्धकासहृत्पार्श्वप्लीहार्शोग्रहणीगदान्।
तालीसपत्रं मरिचं नागरं पिप्पली शुभा॥58॥
यथा+उत्तरं भागवृद्ध्या त्वगेले च+अर्धभागिके।
तद्रुच्यं दीपनं चूर्णं कणाष्टगुणशर्करम्॥59॥
कासश्वासारुचुच्छर्दिप्लीहहृत्पार्श्वशूलनुत्।
पाण्डुज्वरातिसारघ्नं मूढवातानुलोमनम्॥60॥
अर्कामृताक्षारजले शर्वरीमुषितैः+यवैः।
प्रसेके कल्पितान्+सक्तून् भक्ष्यान्+च+अद्यात्+बली वमेत्॥61॥
कटुतिक्तैः+तथा शूल्यं भक्षयेत्+जाङ्गलं पलम्।
शुष्कान्+च भक्ष्यान् सुलघून्+चणकादिः+असानुपः॥62॥
श्लेष्मणः+अतिप्रसेकेन वायुः श्लेष्माणम्+अस्यति।
कफप्रसेकं तं विद्वान्+स्निग्धोष्णैः+एव निर्जयेत्॥63॥

पीनसे+अपि क्रमम्+इमं वमथौ च प्रयोजयेत्।
विशोषात्+पीनसे+अभ्यङ्गान् स्नेहान् स्वेदान्+च शीलयेत्॥64॥
स्निग्धानुत्कारिकापिण्डैः शिरःपार्श्वगलादिषु।
लवणाम्लकटुष्णान्+च रसान् स्नेहोपसंहितान्॥65॥
शिरोंसपार्श्वशूलेषु यथादोषविधिं चरेत्।
औदकानूपपिशितैः+उपनाहाः सुसंस्कृताः॥66॥
तत्रेष्टाः सचतुःस्नेहाः दोषसंसर्गम्+इष्यते।
प्रलेपः+ नतयष्ट्याह्वशताह्वाकुष्ठचन्दनैः॥67॥
बलारास्नातिलैः+तद्वत्+ससर्पिः+मधुकोत्पलैः।
पुनर्नवाकृष्णगन्धाबलावीराविदारिभिः॥68॥
नावनं धूमपानानि स्नेहाः+च+औत्तरभक्तिकाः।
तैलानि+अङ्गयोगीनि बस्तिकर्म तथा परम्॥69॥
शृङ्गाद्यैः+वा यथादोषं दुष्टम्+एषां हरेत्+असृक्।
प्रदेहः सघृतैः श्रेष्ठः पद्मकोशीरचन्दनैः॥70॥
दूर्वामधुकमञ्जिष्ठाकेसरैः+वा घृताप्लुतैः।
वटादिसिद्धतैलेन शतधौतेन सर्पिषा॥71॥
अभ्यङ्गः पयसा सेकः शस्तः+च मधुकाम्बुना।
प्रायेण+उपहताग्नित्वात्+सपिच्छम्+अतिसार्यते॥72॥
तस्य+अतिसारग्रहणीविहितं हितम्+औषधम्।
पुरीषं यत्नतः+ रक्षेत्+शुष्यतः+ राजयक्ष्मिणः॥73॥
सर्वधातुक्षयार्तस्य बलं तस्य हि विड्बलम्।
मांसम्+एव+अश्नतः+ युक्त्या मार्द्वीकं पिबतः+अनु च॥74
अविधारितवेगस्य यक्ष्मा न लभते+अन्तरम्।
सुरां समण्डां मार्द्वीकम्+अरिष्टान्+सीधुमाधवान्॥75॥
यथा+अर्हम्+अनुपानार्थं पिबेत्+मांसानि भक्षयन्।
स्रोतोविबन्धमोक्षार्थं बलौजःपुष्टये च तत्॥76॥
स्नेहक्षीराम्बुकोष्ठेषु स्वभ्यक्तम्+अवगाहयेत्।
उत्तीर्णं मिश्रकैः स्नेहैः+भूयः+अभ्यक्तं सुखैः करैः॥77॥
मृद्गीयात्+सुखम्+आसीनं सुखं च+उद्वर्तयेत्+परम्।
जीवन्तीं शतवीर्यां च विकसां सपुनर्नवाम्॥78॥
अश्वगन्धामपामार्गं तर्कारीं मधुकं बलाम्।
विदारीं सर्षपान् कुष्ठं तण्डुलान्+अतसीफलम्॥49॥

माषान्+तिलान्+च किण्वं च सर्वम्+एकत्र चूर्णयेत्।
यवचूर्णं त्रिगुणितं दध्ना युक्तं समाक्षिकम्॥80॥
एतत्+उद्वर्तनं कार्यं पुष्टिवर्णबलप्रदम्।
गौरसर्षपकल्केन स्नानीयौषधिभिः+च सः॥81॥
स्नायात्+ऋतुसुखैः+तोयैः+जीवनीयोपसाधितैः।
गन्धमाल्यादिकां भूषामलक्ष्मीनाशनीं भजेत्॥82॥
सुहृदां दर्शनं गीतवादित्रोत्सवसंश्रुतिः।
बस्तयः क्षीरसर्पींषि मद्यमांससुशीलता॥83॥
दैवव्यपाश्रयं तत्+तत्+अथर्वोक्तं च पूजितम्॥83 1/2 ॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने राजयक्ष्मादिचिकित्सितं नाम पञ्चमः+अध्यायः॥5॥
षष्ठः+अध्यायः।
अथ+अतः+च्छर्दिहृद्रोगतृष्णाचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
आमाशयोत्क्लेशभवाः प्रायः+च्छर्द्यः+ हितं ततः।
लङ्घनं प्राक्+ऋते वायोः+वमनं तत्र योजयेत्॥1॥
बलिनः+ बहुदोषस्य वमतः प्रततं बहु।
ततः+ विरेकं क्रमशः+ हृद्यं मद्यैः फलाम्बुभिः॥2॥
क्षीरैः+वा सह सः+ हि+ऊर्ध्वं गतं दोषं नयति+अधः।
शमनं चौषधं रूक्षदुर्बलस्य तत्+एव तु॥3॥
परिशुष्कं प्रियं सात्म्यम्+अन्नं लघु च शस्यते।
उपवासः+तथा यूषा रसाः काम्बलिकाः खलाः॥4॥
शाकानि लेहा भोज्यानि रागषाडवपानकाः।
भक्ष्याः शुष्का विचित्राः+च फलानि स्नानघर्षणम्॥5॥
गन्धाः सुगन्धयः+ गन्धफलपुष्पान्नपानजाः।
भुक्तमात्रस्य सहसा मुखे शीताम्बुसेचनम्॥6॥
हन्ति मारुतजां छर्दिं सर्पिः पीतं ससैन्धवम्।
किञ्चित्+उष्णं विशेषेण सकासहृदयद्रवाम्॥7॥
व्योषत्रिलवणाढ्यं वा सिद्धं वा दाडिमाम्बुना।
सशुण्ठीदधिधान्येन शृतं तुल्याम्बु वा पयः॥8॥
व्यक्तसैन्धवसर्पिः+वा फलाम्लः+ वैष्किरः+ रसः।
स्निग्धं च भोजनं शुण्ठीदधिदाडिमसाधितम्॥9॥

कोष्णं सलवणं च+अत्र हितं स्नेहविरेचनम्।
पित्तजायां विरेकार्थं द्राक्षेक्षुस्वरसैः+त्रिवृत्॥10॥
सर्पिः+वा तैल्वकं योज्यं वृद्धं च श्लेष्मधामगम्।
ऊर्ध्वम्+एव हरेत् पित्तं स्वादुतिक्तैः+विशुद्धिमान्॥11॥
पिबेत्+मन्थं यवागूं वा लाजैः समधुशर्कराम्।
मुद्गजाङ्गलजैः+अद्यात्+व्यञ्जनैः शालिषष्टिकम्॥12॥
मृद्भृष्टलोष्टप्रभवं सुशीतं सलिलं पिबेत्।
मुद्गोशीरकणाधान्यैः सह वा संस्थितं निशाम्॥13॥
द्राक्षारसं रसं वा+इक्षोर्गुडूच्यम्बु पयः+अपि वा।
जम्ब्वाम्रपल्लवोशीरवटशुङ्गावरोहजः॥14॥
क्वाथः क्षौद्रयुतः पीतः शीतः+ वा विनियच्छति।
छर्दिं ज्वरमतीसारं मूर्च्छां तृष्णां च दुर्जयाम्॥15॥
धात्रीरसेन वा शीतं पिबेत्+मुद्गदलाम्बु वा।
कोलमज्जसितालाजामक्षिकाविट्कणाञ्जनम्॥16॥
लिह्यात्+क्षौद्रेण पथ्यां वा द्राक्षां वा बदराणि वा।
कफजायां वमेत्+निम्बकृष्णापिण्डीतसर्षपैः॥17॥
युक्तेन कोष्णतोयेन, दुर्बलं च+उपवासयेत्।
आरग्वधादिनिर्यूहं शीतं क्षौद्रयुतं पिबेत्॥18॥
मन्थान् यवैः+वा बहुशः+छर्दिघ्नौषधभावितैः।
कफघ्नम्+अन्नं हृद्यं च रागाः सार्जकभूस्तृणाः॥19॥
लीढं मनःशिलाकृष्णामरिचं बीजपूरकात्।
स्वरसेन कपित्थस्य सक्षौद्रेण वमिं जयेत्॥20॥
खादेत्+कपित्थं सव्योषं, मधुना वा दुरालभाम्।
लिह्यात्+मरिचचोचैलागोशकृद्रसमाक्षिकम्॥21॥
अनुकूलोपचारेण याति द्विष्टार्थजा शमम्।
कृमिजा कृमिहृद्रोगगदितैः+च भिषग्जितैः॥22॥
यथास्वं परिशेषाः+च, तत्कृताः+च तथा+आमयाः।
छर्दिप्रसङ्गेन हि मातरिश्वा धातुक्षयात्+कोपम्+उपैत्यवश्यम्।
कुर्यात्+अतः+अस्मिन् वमनातियोगप्रोक्तं विधिं स्तम्भनबृंहणीयम्॥23॥
सर्पिः+गुडा मांसरसा घृतानि कल्याणकत्र्यूषणजीवनानि।
पयांसि पथ्योपहितानि लेहाः+छर्दिं प्रसक्तां प्रशमं नयन्ति॥24॥
हृद्रोगे वातजे तैलं मस्तुसौवीरतक्रवत्॥25॥

पिबेत्+सुखोष्णं सबिडं गुल्मानाहार्तिजित्+च तत्।
तैलं च लवणैः सिद्धं समूत्राम्लं तथागुणम्॥26॥
बिल्वं रास्नां यवान् कोलं देवदारुं पुनर्नवाम्।
कुलत्थान् पञ्चमूलं च पक्त्वा तस्मिन्+पचेत्+जले॥27॥
तैलं तत्+नावने पाने बस्तौ च विनियोजयेत्।
शुण्ठीवयस्थालवणकायस्थाहिङ्गुपौष्करैः॥28॥
पथ्यया च शृतं पार्श्वहृद्रुजागुल्मजित्+घृतम्।
सौवर्चलस्य द्विपले पथ्यापञ्चाशदन्विते॥29॥
घृतस्य साधितः प्रस्थः+ हृद्रोगश्वासगुल्मजित्।
दाडिमं कृष्णलवणं शुण्ठी हिङ्ग्वम्लवेतसम्॥30॥
अपतन्त्रकहृद्रोगश्वासघ्नं चूर्णम्+उत्तमम्।
पुष्कराह्वशठीशुण्ठीबीजपूरजटाभयाः॥31॥
पीताः कल्कीकृताः क्षारघृताम्ललवणैः+युताः।
विकर्तिकाशूलहराः क्वाथः कोष्णः+च तद्गुणः॥32॥
यवानीलवणक्षारवचाजाज्यौषधैः कृतः।
सपूतिदारुबीजाह्वपलाशशठिपौष्करैः॥33॥
(यवक्षारः+ यवानी च पिबेत्+उष्णेन वारिणा।
एतेन वातजं शूलं गुल्मं च+एव चिरोत्थितम्॥1॥
भिद्यते सप्तरात्रेण पवनेन यथा घनः।)
पञ्चकोलशठीपथ्यागुडबीजाह्वपौष्करम्।
वारुणीकल्कितं भृष्टं यमके लवणान्वितम्॥34॥
हृत्पार्श्वयोनिशूलेषु खादेत्+गुल्मोदरेषु च।
स्निग्धाः+च+इह हिताः स्वेदाः संस्कृतानि घृतानि च॥35॥
लघुना पञ्चमूलेन शुण्ठ्या वा साधितं जलम्।
वारुणीदधिमण्डं वा धान्याम्लं वा पिबेत्+तृषि॥36॥
सायामस्तम्भशूलामे हृदि मारुतदूषिते।
क्रियैषा सद्रवायामप्रमोहे तु हिता रसाः॥37॥
स्नेहाढ्यास्तित्तिरिक्रौञ्चशिखिवर्तकदक्षजाः।
बलातैलं सहृद्रोगः पिबेत्+वा सुकुमारकम्॥38॥
यष्ट्याह्वशतपाकं वा महास्नेहं तथा+उत्तमम्।
रास्नाजीवकजीवन्तीबलाव्याघ्रीपुनर्नवैः॥39॥
भार्गीस्थिरावचाव्योषैः+महास्नेहं विपाचयेत्।

दधिपादं तथा+अम्लैः+च लाभतः सः+ निषेवितः॥40॥
तर्पणः+ बृंहणः+ बल्यः+ वातहृद्रोगनाशनः।
दीप्ते+अग्नौ सद्रवायामे हृद्रोगे वातिके हितम्॥41॥
क्षीरं दधि गुडः सर्पिः+औदकानूपम्+आमिषम्।
एतानि+एव च वर्ज्यानि हृद्रोगेषु चतुर्षु+अपि॥42॥
शेषेषु, स्तम्भजाड्यामसंयुक्ते+अपि च वातिके।
कफानुबन्धे तस्मिन्+तु रूक्षोष्णाम्+आचरेत्+क्रियाम्॥43॥
पैत्ते द्राक्षेक्षुनिर्याससिताक्षौद्रपरूषकैः।
युक्तः+ विरेकः+ हृद्यः स्यात्+क्रमः शुद्धे च पित्तहा॥44॥
क्षतपित्तज्वरोक्तं च बाह्यान्तः परिमार्जनम्।
कट्वीमधुककल्कं च पिबेत्+ससितम्+अम्भसा॥45॥
श्रेयसीशर्कराद्राक्षाजीवकर्षभकोत्पलैः।
बलाखर्जूरकाकोलीमेदायुग्मैः+च साधितम्॥46॥
सक्षीरं माहिषं सर्पिः पित्तहृद्रोगनाशनम्।
प्रपौण्डरीकमधुकबिसग्रन्थिकसेरुकाः॥47॥
सशुण्ठीशैवलास्ताभिः सक्षीरं विपचेत्+घृतम्।
शीतं समधु तत्+चेष्टं स्वादुवर्गकृतं च यत्॥48॥
बस्तिं च दद्यात्+सक्षौद्रं तैलं मधुकसाधितम्।
कफोद्भवे वमेत्+स्विन्नः पिचुमन्दवचाम्भसा॥49॥
कुलत्थधन्वोत्थरसतीक्ष्णमद्ययवाशनः।
पिबेत्+चूर्णं वचाहिङ्गुलवणद्वयनागरात्॥50॥
सैलायवानककणायवक्षारात्+सुखाम्बुना।
फलधान्याम्लकौलत्थयूषमूत्रासवैः+तथा॥51॥
पुष्कराह्वाभयाशुण्ठीशठीरास्नावचाकणात्।
क्वाथं तथा+अभयाशुण्ठीमाद्रीपीतद्रुकट्फलात्॥52॥
क्वाथे रोहितकाश्वत्थखदिरोदुम्बरार्जुने।
सपलाशवटे व्योपत्रिवृच्चूर्णान्विते कृतः॥53॥
सुखोदकानुपानः+च लेहः कफविकारहा।
श्लेष्मगुल्मोदिताज्यानि क्षारान्+च विविधान् पिबेत्॥54॥
प्रयोजयेत्+शिलाह्वं वा ब्राह्मं वा+अत्र रसायनम्।
तथा+आमलकलेहं वा प्राशं वा+अगस्त्यनिर्मितम्॥55॥
स्यात्+शूलं यस्य भुक्ते+अति, जीर्यति+अल्पं, जरां गते।

शाम्येत्+स कुष्ठकृमिजित्+लवणद्वयतिल्वकैः॥56॥
सदेवदार्वतिविषैः+चूर्णम्+उष्णाम्बुना पिबेत्।
यस्य जीर्णे+अधिकं स्नेहैः सः+ विरेच्यः, फलैः पुनः॥57॥
जीर्यति+अन्ने, तथा मूलैः+तीक्ष्णैः शूले सदा+अधिके।
प्रायः+अनिलः+ रुद्धगतिः कुप्यति+आमाशये गतः॥58॥
तस्य+अनुलोमनं कार्यं शुद्धिलङ्घनपाचनैः।
कृमिघ्नम्+औषधं सर्वं कृमिजे हृदयामये॥59॥
तृष्णासु वातपित्तघ्नः+ विधिः प्रायेण शस्यते।
सर्वासु शीतः+ बाह्यान्तः+तथा शमनशोधनः॥60॥
दिव्याम्बु शीतं सक्षौद्रं तद्वत्+भौमं तद्गुणम्।
निर्वापितं तप्तलोष्टकपालसिकतादिभिः॥61॥
सशर्करं वा क्वथितं पञ्चमूलेन वा जलम्।
दर्भपूर्वेण मन्थः+च प्रशस्तः+ लाजसक्तुभिः॥62॥
वाट्यः+च+आमयवैः शीतः शर्करामाक्षिकान्वितः।
यवागूः शालिभिः+तद्वत्+कोद्रवैः+च चिरन्तनैः॥63॥
शीतेन शीतवीर्यैः+च द्रव्यैः सिद्धेन भोजनम्।
हिमाम्बुपरिषिक्तस्य पयसा ससितामधुः॥64॥
रसैः+च+अनम्ललवणैः+जाङ्गलैः+घृतभर्जितैः।
मुद्गादीनां तथा यूषैः+जीवनीयरसान्वितैः॥65॥
नस्यं क्षीरघृतं सिद्धं शीतैः+इक्षोः+तथा रसः।
निर्वापणाः+च गण्डूषाः सूत्रस्थानोदिता हिताः॥66॥
दाहज्वरोक्ता लेपाद्या निरीहत्वं मनोरतिः।
महासरिद्ध्रदादीनां दर्शनस्मरणानि च॥67॥
तृष्णायां पवनोत्थायां सगुडं दधि शस्यते।
रसाः+च बृंहणाः शीता विदार्यादिगणाम्बु च॥68॥
पित्तजायां सितायुक्तः पक्वोदुम्बरजः+ रसः।
तत्+क्वाथः+ वा हिमः+तद्वत्+सारिवादिगणाम्बु वा॥69॥
तत्+विधैः+च गणैः शीतकषायान् ससितामधून्।
मधुरैः+औषधैः+तद्वत् क्षीरिवृक्षैः+च कल्पितान्॥70॥
बीजपूरकमृद्वीकावटवेतसपल्लवान्।
मूलानि कुशकाशनां यष्ट्याह्वं च जले शृतम्॥71॥
ज्वरोदितं वा द्राक्षादि पञ्चसाराम्बु वा पिबेत्।

कफोद्भवायां वमनं निम्बप्रसववारिणा॥72॥

बिल्वाढकीपञ्चकोलदर्भपञ्चकसाधितम्।

जलं पिबेत्+रजन्या वा सिद्धं सक्षौद्रशर्करम्॥73॥

मुद्गयूषं च सव्योषपटोलीनिम्बपल्लवम्।

यवान्नं तीक्ष्णकवलनस्यलेहान्+च शीलयेत्॥74॥

सर्वैः+आमात्+च तत्+हन्त्री क्रियेष्टा वमनं तथा।

त्र्यूषणारुष्करवचाफलाम्लोष्णाम्बुमस्तुभिः॥75॥

अन्नात्ययान्+मण्डम्+उष्णं हिमं मन्थं च कालवित्।

तृषि श्रमान्+मांसरसं मन्थं वा ससितं पिबेत्॥76॥

आतपात्+ससितं मन्थं यवकोलजसक्तुभिः।

सर्वाणि+अङ्गानि लिम्पेत्+च तिलपिण्याककाञ्जिकैः॥77॥

शीतस्नानात्+च मद्याम्बु पिबेत्+तृण्मान् गुडाम्बु वा।

मद्याद्र्धजलं मद्यं स्नातः+अम्ललवणैः+युतम्॥78॥

स्नेहतीक्ष्णतराग्निः+तु स्वभावशिशिरं जलम्।

स्नेहात्+उष्णाम्बुः+अजीर्णात्+तु जीर्णात्+मण्डं पिपासितः॥79॥

पिबेत्+स्निग्धान्नतृषितः+ हिमस्पर्धि गुडोदकम्।

गुर्वाद्यन्नेन तृषितः पीत्वा+उष्णाम्बु तत्+उल्लिखेत्॥80॥

क्षयजायां क्षयहितं सर्वं बृंहणम्+औषधम्।

कृशदुर्बलरूक्षाणां क्षीरं छागः+ रसः+अथवा॥81॥

क्षीरं च सोर्ध्ववातायां क्षयकासहरैः शृतम्।

रोगोपसर्गात्+जातायां धान्याम्बु ससितामधु॥82॥

पाने प्रशस्तं सर्वा च क्रिया रोगाद्यपेक्षया।

तृष्यन् पूर्वाम्+अयक्षीणः+ न लभेत जलं यदि॥83॥

मरणं दीर्घरोगं वा प्राप्नुयात्+त्वरितं ततः।

सात्म्यान्नपानभैषज्यैः+तृष्णां तस्य जयेत्+पुरा॥84॥

तस्यां जितायाम्+अन्यः+अपि व्याधिः शक्यः+चिकित्सितुम्॥84 1/2॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने

छर्दिहृद्रोगतृष्णाचिकित्सितं नाम षष्ठः+अध्यायः॥6॥

सप्तमः+अध्ययाः।

अथ+अतः+ मदात्ययादिचिकित्सितं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

यं दोषम्+अधिकं पश्येत्+तस्य+आदौ प्रतिकारयेत्।

कफस्थानानुपूर्व्या च तुल्यदोषे मदात्यये॥1॥

पित्तमारुतपर्यन्तः प्रायेण हि मदात्ययः।

हीनमिथ्यातिपीतेन यः+ व्याधिः+उपजायते॥2॥

समपीतेन तेन+एव सः+ मद्येन+उपशाम्यति।

मद्यस्य विषसादृश्यात् विषं तु+उत्कर्षवृत्तिभिः॥3॥

तीक्ष्णादिभिः+गुणैः+योगात्+विषान्तरम्+अपेक्षते।

तीक्ष्णोष्णेन+अतिमात्रेण पीतेन+अम्लविदाहिना॥4॥

मद्येन+अन्नरसक्लेदः+ विदग्धः क्षारतां गतः।

यान् कुर्यात्+मदतृण्मोहज्वरान्तर्दाहविभ्रमान्॥5॥

मद्योत्क्लिष्टेन दोषेण रुद्धः स्रोतःसु मारुतः।

सुतीव्रा वेदना याः+च शिरसि+अस्थिषु सन्धिषु॥6॥

जीर्णाममद्यदोषस्य प्रकाङ्क्षालाघवे सति।

यौगिकं विधिवत्+युक्तं मद्यम्+एव निहन्ति तान्॥7॥

क्षारः+ हि याति माधुर्यं शीघ्रम्+अम्लोपसंहितः।

मद्यम्+अम्लेषु च श्रेष्ठं दोषविष्यन्दनादलम्॥8॥

तीक्ष्णोष्णाद्यैः पुरा प्रोक्तैः+दीपनाद्यैः+तथा गुणैः।

सात्म्यत्वात्+च तत्+एव+आस्यं धातुसाम्यकरं परम्॥9॥

सप्ताहम्+अष्टरात्रं वा कुर्यात्+पानात्ययौषधम्।

जीर्यति+एतावता पानं कालेन विपथाश्रितम्॥10॥

परं ततः+अनुबध्नाति यः+ रोगः+तस्य भेषजम्।

यथायथं प्रयुञ्जीत कृतपानात्ययौषधः॥11॥

तत्र वातोल्बणे मद्यं दद्यात्+पिष्टकृतं युतम्।

बीजपूरकवृक्षाम्लकोलदाडिमदीप्यकैः॥12॥

यवानीहपुषाजाजीव्योषत्रिलवणार्द्रकैः।

शूल्यैः+मांसैः+हरितकैः स्नेहवद्भिः+च सक्तुभिः॥13॥

उष्णास्निग्धाम्ललवणा मेद्यमांसरसा हिताः।

आम्राम्रातकपेशीभिः संस्कृता रागषाडवाः॥14॥

गोधूममाषविकृतिः+मुदुः+चित्रा मुखप्रिया।

आर्द्रिकार्द्रककुल्माषसुक्तमांसादिगर्भिणी॥15॥

सुरभिः+लवणा शीता निर्गदा वा+अच्छवारुणी।

स्वरसः+ दाडिमात् क्वाथः पञ्चमूलात्+कनीयसः॥16॥

शुण्ठीधान्यात्+तथा मस्तुसुक्ताम्भोच्छाम्लकाञ्जिकम्।

अभ्यङ्गोद्वर्तनस्नानम्+उष्णं प्रावरणं घनम्॥17॥
घनः+च+अगुरुजः+ धूपः पङ्कः+च+अगुरुकुङ्कुमः।
कुचोरुश्रोणिशालिन्यः+ यौवनोष्णाङ्गयष्टयः॥18॥
हर्षेणालिङ्गने युक्ताः प्रियाः संवाहनेषु च।
पित्तोल्बणे बहुजलं शार्करं मधु वा युतम्॥19॥
रसैः+दाडिमखर्जूरभव्यद्राक्षापरूषजैः।
सुशीतं ससितासक्तु योज्यं तादृक् च पानकम्॥20॥
स्वादुवर्गकषायैः+वा युक्तं मद्यं समाक्षिकम्।
शालिषष्टिकमश्नीयाच्छशाजैणकपिञ्जलैः॥21॥
सतीनमुद्गामलकपटोलीदाडिमै रसैः।
कफपित्तं समुत्क्लिष्टम्+उल्लिखेत्+तृड्विदाहवान्॥22॥
पीत्वा+अम्बु शीतं मद्यं वा भूरीक्षुरससंयुतम्।
द्राक्षारसं वा संसर्गी तर्पणादिः परं हितः॥23॥
तथा+अग्निः+दीप्यते तस्य दोषशेषान्नपाचनः।
कासे सरक्तनिष्ठीवे पार्श्वस्तनरूजासु च॥24॥
तृष्णायां सविदाहायां सोत्क्लेशे हृदयोरसि।
गुडूचीभद्रमुस्तानां पटोलस्य+अथवा रसम्॥25॥
सशृङ्गबेरं युञ्जीतं तित्तिरिप्रतिभोजनम्।
तृष्यते च+अति बलवत्+वातपित्ते समुद्धते॥26॥
दद्यात् द्राक्षारसं पानं शीतं दोषानुलोमनम्।
जीर्णे+अद्यात्+मधुराम्लेन छागमांसरसेन च॥27॥
तृष्यल्पशः पिबेत्+मद्यं मदं रक्षन् बहूदकम्।
मुस्तदाडिमलाजाम्बु जलं वा पर्णिनीशृतम्॥28॥
पाटल्युत्पलकन्दैः+वा स्वभावात्+एव वा हिमम्।
मद्यातिपानादब्धातौ क्षीणे तेजसि च+उद्धते॥29॥
यः शुष्कगलताल्वोष्ठः+ जिह्वां निष्कृष्य चेष्टते।
पाययोत्कामतः+अम्भस्तं निशीथपवनाहतम्॥30॥
कोलदाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः।
पञ्चाम्लकः+ मुखालेपः सद्यः+तृष्णां नियच्छति॥31॥
त्वचं प्राप्तः+च पानोष्मा पित्तरक्ताभिमूर्च्छितः।
दाहं प्रकुरुते घोरं तत्र+अतिशिशिरः+ विधिः॥32॥
अशाम्यति रसैः+तृप्ते रोहिणीं व्यधयेत्+शिराम्।

उल्लेखनोपवासाभ्यां जयेत्+श्लेष्मोल्बणं पिबेत्॥33॥
शीतं शुण्ठीस्थिरोदीच्यदुःस्पर्शान्यतमोदकम्।
निरामं क्षुधितं काले पाययेत्+बहुमाक्षिकम्॥34॥
शार्करं मधु वा जीर्णम्+अरिष्टं सीधुम्+एव वा।
रूक्षतर्पणसंयुक्तं यवानीनागरान्वितम्॥35॥
यूषेण यवगोधूमं तनुना+अल्पेन भोजयेत्।
उष्णाम्लकटुतिक्तेन कौलत्थेनाल्पसर्पिषा॥36॥
शुष्कमूलकजैः+छागैः+ रसैः+वा धन्वचारिणाम्।
साम्लवेतसवृक्षाम्लपटोलीव्योषदाडिमैः॥37॥
प्रभूतशुण्ठीमरिचहरितार्द्रकपेशिकम्।
बीजपूररसाद्यम्लभृष्टनीरसवर्तितम्॥38॥
करीरकरमर्दादि रोचिष्णु बहुशालनम्।
प्रव्यक्ताष्टाङ्गलवणं विकल्पितनिमर्दकम्॥39॥
यथाग्नि भक्षयन् मांसं माधवं निगदं पिबेत्।
सितासौवर्चलाजाजीतिन्तिडीकाम्लवेतसम्॥40॥
त्वगेलामरिचार्धांशमष्टामङ्गलवणं हितम्।
स्रोतोविशुद्ध्यग्निकरं कफप्राये मदात्यये॥41॥
रूक्षोष्णोद्वर्तनोद्धर्षस्नानभोजनलङ्घनैः।
सकामाभिः सह स्त्रीभिः+युक्त्या जागरणेन च॥42॥
मदात्ययः कफप्रायः शीघ्रं समुपशाम्यति।
यत्+इदं कर्म निर्दिष्टं पृथक्+दोषबलं प्रति॥43॥
सन्निपाते दशविधे तत्+शेषे+अपि विकल्पयेत्।
त्वङ्नागपुष्पमगधामरिचाजाजिधान्यकैः॥44॥
परूषकमधूकैलासुराह्वैः+च सितान्वितैः।
सकपित्थरसं हृद्यं पानकं शशिबोधितम्॥45॥
मदात्ययेषु सर्वेषु पेयं रुच्यग्निदीपनम्।
न+अविक्षोभ्य मनः+ मद्यं शरीरम्+अविहन्य वा॥46॥
कुर्यात्+मदात्ययं तस्मात्+इष्यत हर्षणी क्रिया।
संशुद्धिशमनाद्येषु मददोषः कृतेषु+अपि॥47॥
न चेत्+शाम्येत्+कफे क्षीणे जाते दौर्बल्यलाघवे।
तस्य मद्यविदग्धस्य वातपित्ताधिकस्य च॥48॥
ग्रीष्मोपतप्तस्य तरोः+यथा वर्णं तथा पयः।

मद्यक्षीणस्य हि क्षीणं क्षीरम्+आशु+एव पुष्यति॥49॥
ओजस्तुल्यं गुणैः सर्वैः+विपरीतं च मद्यतः।
पयसा विहते रोगे बले जाते निवर्तयेत्॥50॥
क्षीरप्रयोगं, मद्यं च क्रमेण+अल्पाल्पम्+आचरेत्।
न विक्षयध्वंसकोत्थैः स्पृशेत+उपद्रवैः+यथा॥51॥
तयोः+तु स्यात्+घृतं क्षीरं बस्तयः+ बृंहणाः शिवाः।
अभ्यङ्गोद्वर्तनस्नानानि+अन्नपानं च वातजित्॥52॥
युक्तमद्यस्य मद्योत्थः+ न व्याधिरुपजायते।
अतः+अस्य वक्ष्यते योगः+ यः सुखाय+एव केवलम्॥53॥
आश्विनं या महत्तेजः+ बलं सारस्वतं च या।
दधाति+ऐन्द्रं च या वीर्यं प्रभावं वैष्णवं च या॥54॥
अस्त्रं मकरकेतोः+या पुरुषार्थः+ बलस्य या।
सौत्रामण्यां द्विजमुखे या हुताशे च हूयते॥55॥
या सर्वौषधिसम्पूर्णान्+मथ्यमानात्+सुरासुरैः।
महोदधेः समुद्भूता श्रीशशाङ्कामृतैः सहः॥56॥
मधुमाधवमैरेयसीधुगौडासवादिभिः।
मदशक्तिमनुज्झन्ती या रूपैः+बहुभिः स्थिता॥57॥
याम्+आस्वाद्य विलासिन्यः+ यथार्थं नाम बिभ्रति।
कुलाङ्गना+अपि यां पीत्वा नयति+उद्धतमानसा॥58॥
अनङ्गालिङ्गितैः+अङ्गैः क्व+अपि चेतः+ मुनेः+अपि।
तरङ्गभङ्गभ्रुकुटीतर्जनैः+मानिनीमनः॥59॥
एकं प्रसाद्य कुरुते या द्वयोः+अपि निर्वृतिम्।
यथाकामं भटावाप्तिपरिहृष्टाप्सरोगणे॥60॥
तृणवत्+पुरुषा युद्धे याम्+आस्वाद्य त्यजन्ति+असून्।
यां शीलयित्वा+अपि चिरं बहुधा बहुविग्रहाम्॥61॥
नित्यं हर्षातिवेगेन तत्+पूर्वम्+इव सेवते।
शोकोद्वेगारतिभयैः+यां दृष्ट्वा न+अभिभूयते॥62॥
गोष्ठीमहोत्सवोद्यानं न यस्याः शोभते विना।
स्मृत्वा स्मृत्वा च बहुशः+ वियुक्तः शोचते यया॥63॥
अप्रसन्ना+अपि या प्रीत्यै प्रसन्ना स्वर्गः+ एव या।
अपीन्द्रं मन्यते दुःस्थं हृदयस्थितया यया॥64॥
अग्निः+देश्यसुखास्वादा स्वयंवेद्यः+एव या परम्।

इति चित्रासु+अवस्थासु प्रियाम्+अनुकरोति या॥65॥
प्रिया+अतिप्रियतां याति यत्+प्रियस्य विशेषतः।
या प्रीतिः+या रतिः+वा वाग् या पुष्टिः+इति च स्तुता॥66॥
देवदानवगन्धर्वयक्षराक्षसमानुषैः।
पानप्रवृत्तौ सत्यां तु तां सुरां विधिना पिबेत्॥67॥
सम्भवन्ति न ते रोगा मेदोनिलकफोद्भवाः।
विधियुक्तात्+ऋते मद्याद्ये न सिध्यन्ति दारुणाः॥68॥
अस्ति देहस्य सा+अवस्था यस्या पानं निवार्यते।
अन्यत्र मद्यात्+निगदात्+विविधौषधसंस्कृतात्॥69॥
आनूपं जाङ्गलं मांसं विधिना+अपि+उपकल्पितम्।
मद्यं सहायम्+अप्राप्य सम्यक् परिणमेत्+कथम्॥70॥
सुतीव्रमारुतव्याधिघातिनः+ लशुनस्य च।
मद्यमांसवियुक्तस्य प्रयोगे स्यात्+कियान् गुणः॥71॥
निगूढशल्याहरणे शस्त्रक्षाराग्निकर्मणि।
पीतमद्यः+ विषहते सुखं वैद्यविकत्थनाम्॥72॥
अनलोत्तेजनं रुच्यं शोकश्रमविनोदकम्।
न च+अतः परम्+अस्ति+अन्यत्+आरोग्यबलपुष्टिकृत्॥73॥
रक्षता जीवितं तस्मात्+पेयम्+आत्मवता सदा।
आश्रितोपाश्रितहितं परमं धर्मसाधनम्॥74॥
स्नातः प्रणम्य सुरविप्रगुरून् यथास्वं वृत्तिं विधाय च समस्तपरिग्रहस्य।
आपानभूमिम्+अथ गन्धजलाभिषिक्तामाहारमण्डपसमीपगतां श्रयेत्॥75॥
स्वास्तृते+अथ शयने कमनीये मित्रभृत्यरमणीसमवेतः।
स्वं यशः कथकचारणसङ्घेरुद्धतं निशमयन्+अनतिलोकम्॥76॥
विलासिनीनां च विलासशोभि गीतं सनृत्यं कलतूर्यघोषैः।
काञ्चीकलापैः+चलकिङ्किणीकैः क्रीडाविहङ्गैः+च कृतानुनादम्॥77॥
मणिकनकसमुत्थैरावनेयैः+विचित्रैः सजलविविधलेखक्षौमवस्त्रावृताङ्गैः।
अपि मुनिजनचित्तक्षोभसम्पादिनीभिः+चकितहरिणलोलप्रेक्षणीभिः प्रियाभिः॥78॥
स्तननितम्बकृतात्+अतिगौरवात्+अलसम्+आकुलम्+ईश्वरसम्भ्रमात्।
इति गतं दधतीभिः+असंस्थितं तरुणचित्तविलोभनकार्मणम्॥79॥
यौवनासवमत्ताभिः+विलासाधिष्ठितात्मभिः।
सञ्चार्यमाणं युगपत्+तन्वङ्गीभिः+इतः+ततः॥80॥
तालवृन्तनलिनीदलानिलैः

शीतलीकृतम्+अतीव शीतलैः।
दर्शने+अपि विदधत्+वशानुगं
स्वादितं किमुत चित्तजन्मनः॥81॥
चूतरसेन्दुमृगैः कृतवासं
मल्लिकयोज्ज्वलया च सनाथम्।
स्फाटिकशुक्तिगतं सतरङ्गं
कान्तम्+अनङ्गम्+इव+उद्वहत्+अङ्गम्॥82॥
तालीसाद्यं चूर्णम्+एलादिकं वा।
हृद्यं प्राश्य प्राग्वयःस्थापनं वा।
तत्+प्रार्थिभ्यः+ भूमिभागे सुमृष्टे
तोयोन्मिश्रं दापयित्वा ततः+च॥83॥
धृतिमान् स्मृतिमान्+नित्यम्+अनूनाधिकम्+आचरन्।
उचितेन+उपचारेण सर्वम्+एव+उपपादयन्॥84॥
जितविकसितासितसरोजनयनसङ्क्रान्तिवर्धितश्रीकम्।
कान्तामुखम्+इव सौरभहृतमधुपगणं पिबेत्+मद्यम्॥85॥
पीत्वा+एवं चषकद्वयं परिजनं सन्मान्य सर्वं ततः+ गत्वा+आहारभुवं पुरःसुभिषजः+ भुञ्जीत भूयः+अत्र च।
मांसापूपघृतार्द्रकादिहरितैः+युक्तं ससौवर्चलैः+द्विस्त्रिः+वा निशि च+अल्पम्+एव वनितासंवल्गनार्थं पिबेत्॥86॥
रहसि दयिताम्+अङ्के कृत्वा भुजान्तरपीडनात्+पुलकिततनुं जातस्वेदां सकम्पपयोधराम्।
यदि सरभसं शीधोर्वारं न पाययते कृती किम्+अनुभवति क्लेशप्रायं ततः+ गृहतन्त्रताम्॥87॥
वरतनुवक्त्रसङ्गतिसुगन्धितरं सरकं
द्रुतम्+इव पद्मरागमणिम्+आसवरूपधरम्।
भवति रतिश्रमेण च मदः पिबतः+अल्पम्+अपि
क्षयमत ओजसः परिहरन् सः+ शयीत परम्॥88॥
इत्थं युक्त्या पिबन्+मद्यं न त्रिवर्गात्+विहीयते।
असारसंसारसुखं परमं च+अधिगच्छति॥89॥
ऐश्वर्यस्य+उपभोगः+अयं स्पृहणीयः सुरैः+अपि।
अन्यथा हि विपत्सु स्यात्+पश्चात्तापेन्धनं धनम्॥90॥
उपभोगेन रहितः+ भोगवान्+इति निन्द्यते।
निर्मितः+अतिकदर्यः+अयं विधिना निधिपालकः॥91॥
तस्मात्+व्यवस्थया पानं पानस्य सततं हितम्।
जित्वा विषयलुब्धानाम्+इन्द्रियाणां स्वतन्त्रताम्॥92॥
विधिः+वसुमताम्+एष भविष्यत्+वसवः+तु ये।

यथा+उपपत्ति तैः+मद्यं पातव्यं मात्रया हितम्॥93॥
यावत्+दृष्टेः+न सम्भ्रान्तिः+यावत्+न क्षोभते मनः।
तावत्+एव विरन्तव्यं मद्यात्+आत्मवता सदा॥94॥
अभ्यङ्गोद्वर्तनस्नानवासधूपानुलेपनैः।
स्निग्धोष्णैः+भावितः+च+अन्नैः पानं वातोत्तरः पिबेत्॥95॥
शीतोपचारैः+विविधैः+मधुरस्निग्धशीतलैः।
पैत्तिकः+ भावितः+च+अन्नैः पिबन्+मद्यं न सीदत्ति॥96॥
उपचारैः+अशिशिरैः+यवगोधूमभुक् पिबेत्।
श्लैष्मिकः+ धन्वजैः+मांसैः+मद्यं मारिचिकैः सहः॥97॥
तत्र वाते हितं मद्यं प्रायः पैष्टिकगौडिकम्।
पित्ते साम्भोमधु, कफे मार्द्वीकारिष्टमाधवम्॥98॥
प्राक् पिबेत्+श्लैष्मिकः+ मद्यं, भुक्तस्य+उपरि पैत्तिकः।
वातिकः+तु पिबेत्+मध्ये, समदोषः+ यथा+इच्छया॥99॥
मदेषु वातपित्तघ्नं प्रायः+ मूर्च्छासु च+इष्यते।
सर्वत्र+अपि विशेषेण पित्तम्+एव+उपलक्षयेत्॥100॥
शीताः प्रदेहा मणयाः सेका व्यजनमारुताः।
सिता द्राक्षेक्षुखर्जूरकाश्मर्यस्वरसाः पयः॥101॥
सिद्धं मधुरवर्गेण रसा यूषाः सदाडिमाः।
षष्टिकाः शालयः+ रक्ता यवाः सर्पिः+च जीवनम्॥102॥
कल्याणकं महातिक्तं षट्पलं पयसा+अग्निकः।
पिप्पल्यः+ वा शिलाह्वं वा रसायनविधानतः॥103॥
त्रिफला वा प्रयोक्तव्या सघृतक्षौद्रशर्करा।
प्रसक्तवेगेषु हितं मुखनासावरोधनम्॥104॥
पिबेत्+वा मानुषीक्षीरं तेन दद्यात्+च नावनम्।
मृणालबिसकृष्णा वा लिह्यात्+क्षौद्रेण साभयाः॥105॥
दुरालभां वा मुस्तं वा शीतेन सलिलेन वा।
पिबेत्+मरिचकोलास्थिमज्जोशीराहिकेसरम्॥106॥
धात्रीफलरसे सिद्धं पथ्याक्वाथेन वा घृतम्।
कुर्यात्+क्रियां यथा+उक्तां च यथादोषबलोदयम्॥107॥
पञ्चकर्माणि चेष्टानि सेचनं शोणितस्य च।
सत्त्वस्य+आलम्बनं ज्ञानम्+अगृद्धिः+विषयेषु च॥108॥
मदेषु+अतिप्रवृद्धेषु मूर्च्छायेषु च योजयेत्।

तीक्ष्णं सन्न्यासविहितं विषघ्नं विषजेषु च॥109॥

आशु प्रयोज्यं सन्न्यासे सुतीक्ष्णं नस्यम्+अञ्जनम्।

धूमः प्रधमनं तोदः सूचीभिः+च नखान्तरे॥110॥

केशानां लुञ्चनं दाहः+ दंशः+ दशनवृश्चिकैः।

कट्वम्लगालनं वक्त्रे कपिकच्छ्ववघर्षणम्॥111॥

उत्थितः+ लब्धसंज्ञः+च लशुनस्वरसं पिबेत्।

खादेत्+सव्योषलवणं बीजपूरककेसरम्॥112॥

लघ्वन्नप्रति तीक्ष्णोष्णमद्योत्स्रोतोविशुद्धये।

विस्मापनैः संस्मरणैः प्रियश्रवणदर्शनैः॥113॥

पटुभिः+गीतवादित्रशब्दैः+व्यायामशीलनैः।

स्रंसनोल्लेखनैः+धूमैः शोणितस्य+अवसेचनैः॥114॥

उपाचरेत्+तं प्रततम्+अनुबन्धभयात्+पुनः।

तस्य संरक्षितव्यं च मनः प्रलयहेतुतः॥115॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने

मदात्ययादिचिकित्सितं नाम सप्तमः+अध्यायः॥7॥

अष्टमः+अध्यायः।

अथ+अतः+ अर्शसां चिकित्सितं व्याख्यास्यामः।

इति हि स्म+आहुः+आत्रेयादयः+ महर्षयः।

काले साधारणे व्यभ्रे न+अतिदुर्बलम्+अर्शसम्।

विशुद्धकोष्ठं लघ्वल्पम्+अनुलोमनम्+आशितम्॥1॥

शुचिं कृतस्वस्त्ययनं मुक्तविण्मूत्रम्+अव्यथम्।

शयने फलके वा+अन्यनरोत्सङ्गे व्यपाश्रितम्॥2॥

पूर्वेण कायेन+उत्तानं प्रत्यादित्यगुदं समम्।

समुन्नतकटीदेशम्+अथ यन्त्रणवाससा॥3॥

सक्थ्नोः शिरोधरायां च परिक्षिप्तम्+ऋजु स्थितम्।

आलम्बितं परिचरैः सर्पिषा+अभ्यक्तपायवे॥4॥

ततः+अस्मै सर्पिषा+अभ्यक्तं निदध्यात्+ऋजु यन्त्रकम्।

शनैः+अनुसुखं पायौ, ततः+ दृष्ट्वा प्रवाहणात्॥5॥

यन्त्रे प्रविष्टं दुर्नाम प्लोतगुण्ठितया+अनु च।

शलाकयोत्पीड्य भिषक् यथा+उक्तविधिना दहेत्॥6॥

क्षारेण+एव+आर्द्रम्+इतरत्+क्षारेण ज्वलनेन वा।

महत्+वा बलिनः+छित्त्वा वीतयन्त्रम्+अथ+आतुरम्॥7॥

स्वभ्यक्तपायुजघनम्+अवगाहे निधापयेत्।
निर्वातमन्दिरस्थस्य ततः+अस्य+आचारम्+आदिशेत्॥8॥
एकैकम्+इति सप्ताहात्+सप्ताहात्+समुपाचरेत्।
प्राग्दक्षिणं ततः+ वामम्+अर्शः पृष्ठाग्रजं ततः॥9॥
बह्वर्शसः सुदग्धस्य स्यात्+वायोः+अनुलोमता।
रुचिः+अन्ने+अग्निपटुता स्वास्थ्यं वर्णबलोदयः॥10॥
बस्तिशूले तु+अधः+ नाभेः+लेपयेत्+श्लक्ष्णकल्कितैः।
वर्षाभूकुष्ठसुरभिमिशिलोहामराह्वयैः॥11॥
शकृन्मूत्रप्रतीघाते परिषेकावगाहयोः।
वरणालम्बुषैः+अण्डगोकण्टकपुनर्नवैः॥12॥
सुषवीसुरभीभ्यां च क्वाथम्+उष्णं प्रयोजयेत्।
सस्नेहम्+अथवा क्षीरं तैलं वा वातनाशनम्॥13॥
युञ्जीत+अन्नं शकृद्भेदि स्नेहान् वातघ्नदीपनान्।
अथ+अप्रयोज्यदाहस्य निर्गतान् कफवातजान्॥14॥
सस्तम्भकण्डूरुक्शोफानभ्यज्य गुदकीलकान्।
बिल्वमूलाग्निकक्षारकुष्ठैः सिद्धेन सेचयेत्॥15॥
तैलेन+अहिबिडालोष्ट्रवराहवसया+अथवा।
[कासीसं सैन्धवं रास्ना शुण्ठी कुष्ठं च लाङ्गली।
शिलाभ्रकाश्वमारं च जन्तुहृद्दन्तिचित्रकौ॥1॥
हरितालं तथा स्वर्णक्षीरी तैः+च पचेत्+समैः।
तैलं सुधार्कपयसी गवां मूत्रे चतुर्गुणे॥2॥
एतत्+अभ्यङ्गतः+अर्शांसि क्षारवत्+पातयेत्+द्रुतम्।
क्षारकर्मकरं हि+एतत्+न च दूषयते वलिम्॥3॥]
स्वेदयेत्+अनु पिण्डेन द्रवस्वेदेन वा पुनः॥26॥
सक्तूनां पिण्डिकाभिः+वा स्निग्धानां तैलसर्पिषा।
रास्नाया हपुषाया वा पिण्डैः+वा कार्ष्ण्यगन्धिकैः॥27॥
अर्कमूलं शमीपत्रं नृकेशाः सर्पकञ्चुकम्।
मार्जारचर्म सर्पिः+च धूपनं हितमर्शसाम्॥18॥
तथा+अश्वगन्धा सुरसा बृहती पिप्पली घृतम्।
धान्याम्लपिष्टैः+जीमूतबीजैः+तत्+जालकं मृदुः॥19॥
लेपितं छायया शुष्कं वर्तिः+गुदजशातनी।
सजालमूलजीमूतलेहे वा क्षारसंयुते॥20॥

गुञ्जासूरणकूष्माण्डबीजैः+वर्तिः+तथागुणा।
स्नुक्क्षीरार्द्रनिशालेपः+तथा, गोमूत्रकल्कितैः॥21॥
कृकवाकुशकृत्कृष्णानिशागुञ्जाफलैः+तथा।
स्नुक्क्षीरपिष्टैः षड्ग्रन्थाहलिनीवारणास्थिभिः॥22॥
कुलीरशृङ्गीविजयाकुष्ठारुष्करतुत्थकैः।
शिग्रुमूलकजैः+बीजैः पत्रैः+अश्वघ्ननिम्बजैः॥23॥
पीलुमूलेन बिल्वेन हिङ्गुना च समन्वितैः।
कुष्ठं शिरीषबीजानि पिप्पल्यः सैन्धवं गुडः॥24॥
अर्कक्षीरं सुधाक्षीरं त्रिफला च प्रलेपनम्।
आर्कं पयः सुधाकाण्डं कटुकालाबुपल्लवाः॥25॥
करञ्जः+ बस्तमूत्रं च लेपनं श्रेष्ठम्+अर्शसाम्।
आनुवासनिकैः+लेपः पिप्पल्याद्यैः+च पूजितः॥26॥
एभिः+एव+औषधैः कुर्यात्+तैलानि+अभ्यञ्जनाय च।
धूपनालेपनाभ्यङ्गैः प्रस्रवन्ति गुदाङ्कुराः॥27॥
सञ्चितं दुष्टरुधिरं, ततः सम्पद्यते सुखी।
अवर्तमानम्+उच्छूनकठिनेभ्यः+ हरेत्+असृक्॥28॥
अर्शोभ्यः+ जलजाशस्त्रसूचीकूर्चैः पुनः पुनः।
शीतोष्णस्निग्धरूक्षैः+हि न व्याधिरुपशाम्यति॥29॥
रक्ते दुष्टे भिषक् तस्मात्+रक्तम्+एव+अवसेचयेत्।
यः+ जातः+ गोरसः क्षीरात्+वह्निचूर्णावचूर्णितात्॥30॥
पिबन्+तम्+एव तेन+एव भुञ्जानः+ गुदजान् जयेत्।
कोविदारस्य मूलानां मथितेन रजः पिबन्॥31॥
अश्नन् जीर्णे च पथ्यानि मुच्यते हतनामभिः।
गुदश्वयथुशलार्तः+ मन्दाग्निः+गौल्मिकान् पिबेत्॥32॥
हिङ्ग्वादीन्+अनुतक्रं वा स्वादेत्+गुडहरीतकीम्।
तक्रेण वा पिबेत्+पथ्यावेल्लाग्निकुटजत्वचः॥33॥
कलिङ्गमगधाज्योतिः सूरणान् वा+अंशवर्धितान्।
कोष्णाम्बुना वा त्रिपटुव्योषहिङ्ग्वम्लवेतसम्॥34॥
युक्तं बिल्वकपित्थाभ्यां महौषधबिडेन वा।
अरुष्करैः+यवान्या वा प्रदद्यात्+तक्रतर्पणम्॥35॥
दद्यात्+वा हपुषाहिङ्गुचित्रकं तक्रसंयुतम्।
मासं तक्रानुपानानि खादेत्+पीलुफलानि वा॥36॥

पिबेत्+अहरहस्तक्रं निरन्नः+ वा प्रकामतः।
अत्यर्थं मन्दकायाग्नेः+तक्रम्+एव+अवचारयेत्॥37॥
सप्ताहं वा दशाहं वा मासार्धं मासम्+एव वा।
बलकालविकारज्ञः+ भिषक् तक्रं प्रयोजयेत्॥38॥
सायं वा लाजसक्तूनां दद्यात्+तक्रावलेहिकाम्।
जीर्णे तक्रे प्रदद्यात्+वा तक्रपेयां ससैन्धवाम्॥39॥
तक्रानुपानं सस्नेहं तक्रौदनम्+अतः परम्।
यूषै रसैः+वा तक्राढ्यैः शालीन् भुञ्जीत मात्रया॥40॥
रूक्षम्+अर्धोद्धृतस्नेहं यतः+च+अनुद्धृतं घृतम्।
तक्रं दोषाग्निबलवित्+त्रिविधं तत्+प्रयोजयेत्॥41॥
न विरोहन्ति गुदजाः पुनः+तक्रसमाहताः।
निषिक्तं तत्+हि दहति भूमौ+अपि तृणोलुपम्॥42॥
स्रोतःसु तक्रशुद्धेषु रसः+ धातून्+उपैति यः।
तेन पुष्टिः+बलं वर्णः परं तुष्टिः+च जायते॥43॥
वातश्लेष्मविकाराणां शतं च विनिवर्तते।
मथितं भाजने क्षुद्रबृहतीफललेपिते॥44॥
निशां पर्युषितं पेयम्+इच्छद्भिः+गुदजक्षयम्।
धान्योपकुञ्चिकाजाजीहपुषापिप्पलीद्वयैः॥45॥
कारवीग्रन्थिकशठीयवान्यग्नियवानकैः।
चूर्णितैः+घृतपात्रस्थं न+अत्यम्लं तक्रम्+आसुतम्॥46॥
तक्रारिष्टं पिबेत्+जातं व्यक्ताम्लकटु कामतः।
दीपनं रोचनं वर्ण्यं कफवातानुलोमनम्॥47॥
गुदश्वयथुकण्ड्वर्तिनाशनं बलवर्धनम्।
त्वचं चित्रकमूलस्य पिष्ट्वा कुम्भं प्रलेपयेत्॥48॥
तक्रं वा दधि वा तत्र जातम्+अर्शोहरं पिबेत्।
भार्ग्यास्फोतामृतापञ्चकोलेषु+अपि+एष संविधिः॥49॥
पिष्टैः+गजकणापाठाकारवीपञ्चकोलकैः।
तुम्बर्वजाजीधनिकाबिल्वमध्यैः+च कल्पयेत्॥50॥
फलाम्लान् यमकस्नेहान् पेयायूषरसादिकान्।
एभिः+एव+औषधैः साध्यं वारि सर्पिः+च दीपनम्॥51॥
क्रमः+अयं भिन्नशकृतां वक्ष्यते गाढवर्चसाम्।
स्नेहाढ्यैः सक्तुभिः+युक्तां लवणां वारुणीं पिबेत्॥52॥

लवणा एव वा तक्रसीधुधान्याम्लवारुणीः।
प्राग्भक्तान् यमके भृष्टान् सक्तुभिः+च+अवचूर्णितान्॥53॥
करञ्जपल्लवान् खादेत्+वातवर्चोनुलोमनान्।
सगुडं नागरं पाठां गुडक्षारघृतानि वा॥54॥
गोमूत्राध्युषितामद्यात्+सगुडां वा हरीतकीम्।
पथ्याशतद्वयात्+मूत्रद्रोणेन+अमूत्रसङ्क्षयात्॥55॥
पक्वात् खादेत्+समधुनी द्वे द्वे हन्ति कफोद्भवान्।
दुर्नामकुष्ठश्वयथुगुल्ममेहोदरकृमीन्॥56॥
ग्रन्थ्यर्बुदापचीस्थौल्यपाण्डुरोगाढ्यमारुतान्।
अजश्रृङ्गीजटाकल्कमजामूत्रेण यः पिबेत्॥57॥
गुडवार्ताकभुक् तस्य नश्यन्ति+आशु गुदाङ्कुराः।
श्रेष्ठारसेन त्रिवृतां पथ्यां तक्रेण वा सह॥58॥
पथ्यां वा पिप्पलीयुक्तां घृतभृष्टां गुडान्विताम्।
अथवा सत्रिवृद्दन्तीं भक्षयेत्+अनुलोमनीम्॥59॥
हते गुदाश्रये दोषे गुदजा यान्ति सङ्क्षयम्।
दाडिमस्वरसाजाजीयवानीगुडनागरैः॥60॥
पाठया वा युतं तक्रं वातवर्चोनुलोमनम्।
सीधुं वा गौडम्+अथवा सचित्रकमहौषधम्॥61॥
पिबेत्+सुरां वा हपुषापाठासौवर्चलान्विताम्।
दशादिदशकैः+वृद्धाः पिप्पलीः+द्विपिचुं तिलान्॥62॥
पीत्वा क्षीरेण लभते बलं देहहुताशयोः।
दुःस्पर्शकेन बिल्वेन यवान्या नागरेण वा॥63॥
एकैकेन+अपि संयुक्ता पाठा हन्ति+अर्शसां रुजम्।
सलिलस्य वहे पक्त्वा प्रस्थार्धम्+अभयात्वचाम्॥64॥
प्रस्थं धात्र्या दशपलं कपित्थानां ततः+अर्धतः।
विशालां रोध्रमरिचकृष्णावेल्लैलवालुकम्॥65॥
द्विपलांशं पृथक्+पादशेषे पूते गुडात्+तुले।
दत्वा प्रस्थं च धातक्याः स्थापयेत्+घृतभाजने॥66॥
पक्षात्+स शीलितः+अरिष्टः करोति+अग्निं, निहन्ति च।
गुदजग्रहणीपाण्डुकुष्टोदरगरज्वरान्॥67॥
श्वयथुप्लीहहृद्रोगगुल्मयक्ष्मवमिकृमीन्।
जलद्रोणे पचेत्+दन्तीदशमूलवराग्निकान्॥68॥

पालिकान् पादशेषे तु क्षिपेत्+गुडतुलां परम्।
पूर्ववत्+सर्वम्+अस्य स्यात्+आनुलोमितरः+तु+अयम्॥69॥
पचेत्+दुरालभाप्रस्थं द्रोणे+अपां प्रासृतैः सह।
दन्तीपाठाग्निविजयावासामलकनागरैः॥70॥
तस्मिन् सिताशतं दद्यात्+पादस्थे+अन्यत्+च पूर्ववत्।
लिम्पेत्+कुम्भं तु फलिनीकृष्णाचव्याज्यमाक्षिकैः॥71॥
प्राग्भक्तम्+आनुलोम्याय फलाम्लं वा पिबेत्+धृतम्।
चव्यचित्रकसिद्धं वा यवक्षारगुडान्वितम्॥72॥
पिप्पलीमूलसिद्धं वा सगुडक्षारनागरम्।
पिप्पलीपिप्पलीमूलधानकादाडिमैः+घृतम्॥73॥
दध्ना च साधितं वातशकृन्मूत्रविबन्धनुत्।
पलाशक्षारतोयेन त्रिगुणेन पचेत्+घृतम्॥64॥
वत्सकादिप्रतीवापमर्शोघ्नं दीपनं परम्।
पञ्चकोलाभयाक्षारयवानीबिडसैन्धवैः॥75॥
सपाठाधान्यमरिचैः सबिल्वैः+दधिमत्+घृतम्।
साधयेत् तत्+जयति+आशु गुदवङ्क्षणवेदनाम्॥76॥
प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्।
पाठाजमोदधनिकाश्वदंष्ट्रापञ्चकोलकैः॥77॥
सबिल्वैः+दध्नि चाङ्गेरीस्वरसे च चतुर्गुणे।
हन्ति+आज्यं सिद्धमानाहं मूत्रकृच्छ्रं प्रवाहिकाम्॥78॥
गुदभ्रंशार्तिगुदजग्रहणीगदमारुतान्।
शिखितित्तिरिलावानां रसान्+अम्लान् सुसंस्कृतान्॥79॥
दक्षाणां वर्तकानां वा दद्यात्+विड्वातसङ्ग्रहे।
वास्तुकाग्नित्रिवृद्दन्तीपाठाम्लीकादिपल्लवान्॥80॥
अन्यत्+च कफवातघ्नं शाकं च लघु भेदि च।
सहिङ्गु यमके भृष्टं सिद्धं दधिसरैः सह॥81॥
धनिकापञ्चकोलाभ्यां पिष्टाभ्यां दाडिमाम्बुना।
आर्द्रिकायाः किसलयैः शकलैः+आर्द्रकस्य च॥82॥
युक्तम्+अङ्गारधूपेन हृद्येन सुरभीकृतम्।
सजीरकं समरिचं बिडसौवर्चलोत्कटम्॥83॥
वातोत्तरस्य रूक्षस्य मन्दाग्नेः+बद्धवर्चसः।
कल्पयेत्+रक्तशाल्यन्नव्यञ्जनं शाकवत्+रसान्॥84॥

गोगोधाछगलोष्ट्राणां विशेषात्+क्रव्यभोजिनाम्।
मदिरां शार्करं गौडं सीधुं तक्रं तुषोदकम्॥85॥
अरिष्टं मस्तु पानीयं, पानीयं वा+अल्पकं शृतम्।
धान्येन धान्यशुण्ठीभ्यां कण्टकारिकया+अथवा॥86॥
अन्ते भक्तस्य मध्ये वा वातवर्चोनुलोमनम्।
विड्वातकफपित्तानाम्+आनुलोम्ये हि निर्मले॥87॥
गुदे शाम्यन्ति गुदजाः पावकः+च+अभिवर्धते।
उदावर्तपरीता ये ये च+अत्यर्थं विरूक्षिताः॥88॥
विलोमवाताः शूलार्ताः+तेषु+इष्टम्+अनुवासनम्।
पिप्पलीं मदनं बिल्वं शताह्वां मधुकं वचाम्॥89॥
कुष्ठं शठीं पुष्कराख्यं चित्रकं देवदारु च।
पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयुतम्॥90॥
अर्शसां मूढवातानां तत्+श्रेष्ठम्+अनुवासनम्।
गुदनिःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम्॥91।
कट्यूरुपृष्ठदौर्बल्यम्+आनाहं वङ्क्षणाश्रयम्।
पिच्छास्रावं गुदे शोफं वातवर्चोविनिग्रहम्॥92॥
उत्थानं बहुशः+ यत्+च जयेत्+तत्+च+अनुवासनात्।
निरूहं वा प्रयुञ्जीत सक्षीरं पाञ्चमूलिकम्॥93॥
समूत्रस्नेहलवणं कल्कैः+युक्तं फलादिभिः।
अथ रक्तार्शसां वीक्ष्यं मारुतस्य कफस्य वा॥94॥
अनुबन्धं ततः स्निग्धं रूक्षं वा योजयेत्+हिमम्।
शकृच्छ्यावं खरं रूक्षम्+अधः+ निर्याति न+अनिलः॥95॥
कट्यूरुगुदशूलं च हेतुः+यदि च रूक्षणम्।
तत्र+अनुबन्धः+ वातस्य श्लेष्मणः+ यदि विट् श्लथा॥96॥
श्वेता पीता गुरुः स्निग्धा, सपिच्छः स्तिमितः+ गुदः।
हेतुः स्निग्धगुरुः+विद्यात्+यथास्वं, च+अस्रलक्षणात्॥97॥
दुष्टे+अस्रे शोधनं कार्यं लङ्घनं च यथाबलम्।
यावत्+च दोषैः कालुष्यं स्रुतेः+तावत्+उपेक्षणम्॥98॥
दोषाणां पाचनार्थं च वह्निसन्धुक्षणाय च।
सङ्ग्रहाय च रक्तस्य परं तिक्तैः+उपाचरेत्॥99॥
यत्+तु प्रक्षीणदोषस्य रक्तं वातोल्बणस्य वा।
स्नेहैः+तत्+साधयेत्+युक्तैः पानाभ्यञ्जनबस्तिषु॥100॥

यत्+तु पित्तोल्बणं रक्तं धर्मकाले प्रवर्तते।
स्तम्भनीयं तत्+एकान्तात्+न चेत्+वातकफानुगम्॥101॥
सकफे+अस्रे पिबेत्+पाक्यं शुण्ठीकुटजवल्कलम्।
किराततिक्तकं शुण्ठीं धन्वयासं कुचन्दनम्॥102॥
दार्वीत्वङ्निम्बसेव्यानि त्वचं वा दाडिमोद्भवाम्।
कुटजत्वक्फलं तार्क्ष्यं माक्षिकं घुणवत्+लभाम्॥103॥
पिबेत्+तण्डुलतोयेन कल्कितं वा मयूरकम्।
तुलां दिव्याम्भसि पचेत्+आर्द्रायाः कुटजत्वचः॥104॥
नीरसायां त्वचि क्वाथे दद्यात्+सूक्ष्मरजीकृतान्।
समङ्गाफलिनीमोचरसान् मुष्ट्यंशकान्+समान्॥105॥
तैः+च शक्रयवान् पूते ततः+ दर्वीप्रलेपनम्।
पक्त्वा+अवलेहं लीढ्वा च तं यथाग्निबलं पिबेत्॥106॥
पेयां मण्डं पयः+छागं गव्यं वा छागदुग्धभुक्।
लेहः+अयं शमयति+आशु रक्तातीसारपायुजान्॥107॥
बलवत्+रक्तपित्तं च स्रवत्+ऊर्ध्वम्+अधः+अपि वा।
कुटजत्वक्तुलां द्रोणे पचेत्+अष्टांशशेषितम्॥108॥
कल्कीकृत्य क्षिपेत्+तत्र तार्क्ष्यशैलं कटुत्रयम्।
रोध्रद्वयं मोचरसं बलां दाडिमजां त्वचम्॥109॥
बिल्वकर्कटिकां मुस्तं समङ्गां धातकीफलम्।
पलोन्मितं दशपलं कुटजस्य+एव च त्वचः॥110॥
त्रिंशत्पलानि गुडतः+ घृतात्+पूते च विंशतिः।
तत्+पक्वं लेहतां यातं धान्ये पक्षस्थितं लिहन्॥111॥
सर्वार्शोग्रहणीदोषश्वासकासान्+नियच्छति।
रोध्रं तिलान्+मोचरसं समङ्गां चन्दनोत्पलम्॥112॥
पाययित्वा+आजदुग्धेन शालीन्+तेन+एव भोजयेत्।
यष्ट्याह्वपद्मकानन्तापयस्याक्षीरमोरटम्॥113॥
ससितामधु पातव्यं शीततोयेन तेन वा।
रोध्रकट्वङ्गकुटजसमङ्गाशाल्मलीत्वचम्॥114॥
हिमकेसरयष्ट्याह्वसेव्यं वा तण्डुलाम्बुना।
यवानीन्द्रयवाः पाठा बिल्वं शुण्ठी रसाञ्जनम्॥115॥
चूर्णः+चले हितः शूले प्रवृत्ते च+अति शोणिते।
दुग्धिकाकण्टकारीभ्यां सिद्धं सर्पिः प्रशस्यते॥116॥

अथवा धातकीरोध्रकुटजत्वक्फलोत्पलैः।
सकेसरैः+यवक्षारदाडिमस्वरसेन वा॥117॥
शर्कराम्भोजकिञ्जल्कसहितं सह वा तिलैः।
अभ्यस्तं रक्तगुदजान् नवनीतं नियच्छति॥118॥
छागानि नवनीताज्यक्षीरमांसानि, जाङ्गलः।
अनम्लः+ वा कदम्लः+ वा सवास्तुकरसः+ रसः॥119॥
रक्तशालिः सरः+ दध्नः षष्टिकः+तरुणीं सुरा।
तरुणः+च सुरामण्डः शोणितस्य+औषधं परम्॥120॥
पेयायूषरसाद्येषु पलाण्डुः केवलः+अपि वा।
स जयति+उल्बणं रक्तं मारुतं च प्रयोजितः॥121॥
वातोल्बणानि प्रायेण भवन्ति+अस्रे+अतिनिःसृते।
अर्शांसि तस्मात्+अधिकं तत्+जये यत्नम्+आचरेत्॥122॥
दृष्ट्वा+अस्रपित्तं प्रबलम्+अबलौ च कफानिलौ।
शीतोपचारः कर्तव्यः सर्वथा तत्+प्रशान्तये॥123॥
न चेत्+एवं शमः+तस्य स्निग्धोष्णैः+तर्पयेत्+ततः।
रसैः, कोष्णैः+च सर्पिः+भिरवपीडकयोजितैः॥124॥
सेचयेत्+तं कवोष्णैः+च कामं तैलपयोघृतैः।
यवासकुशकाशानां मूलं पुष्पं च शाल्मलेः॥125॥
न्यग्रोधोदुम्बराश्वत्थशुङ्गाः+च द्विपलोन्मिताः।
त्रिप्रस्थे सलिलस्य+एतत्+क्षीरप्रस्थे च साधयेत्॥126॥
क्षीरशेषे कषाये च तस्मिन् पूते विमिश्रयेत्।
कल्कीकृतं मोचरसं समङ्गां चन्दनोत्पलम्॥127॥
प्रियङ्गुं कौटजं बीजं कमलस्य च केसरम्।
पिच्छाबस्तिः+अयं सिद्धः सघृतक्षौद्रशर्करः॥128॥
प्रवाहिकागुदभ्रंशरक्तस्रावज्वरापहः।
यष्ट्याह्वपुण्डरीकेण तथा मोचरसादिभिः॥129॥
क्षीरद्विगुणितः पक्वः+ देयः स्नेहः+अनुवासनम्।
मधुकोत्पलरोध्राम्बु समङ्गा बिल्वचन्दनम्॥130॥
चविका+अतिविषा मुस्तं पाठा क्षारः+ यवाग्रजः।
दार्वीत्वङ्नागरं मांसी चित्रकः+ देवदारु च॥131॥
चाङ्गेरीस्वरसे सर्पिः साधितं तैः+त्रिदोषजित्।
अर्शोतिसारग्रहणीपाण्डुरोगज्वरारुचौ॥132॥

मूत्रकृच्छ्रे गुदभ्रंशे बस्ति+आनाहे प्रवाहणे।
पिच्छास्रावे+अर्शसां शूले देयं तत्+परमौषधम्॥133॥
व्यत्यासात्+मधुराम्लानि शीतोष्णानि च योजयेत्।
नित्यम्+अग्निबलापेक्षी जयति+अर्शःकृतान् गदान्॥134॥
उदावर्तार्तम्+अभ्यज्य तैलैः शीतज्वरापहैः।
सुस्निग्धैः स्वेदयेत्+पिण्डैः+वर्तिम्+अस्मै गुदे ततः॥135॥
अभ्यक्तां तत्+कराङ्गुष्ठसन्निभाम्+अनुलोमनीम्।
दद्यात्+छ्यामात्रिवृद्दन्तीपिप्पलीनीलिनीफलैः॥136॥
विचूर्णितैः+द्विलवणैः+गुडगोमूत्रसंयुतैः।
तद्वत्+मागधिकाराठगृहधूमैः ससर्षपैः॥137॥
एतेषाम्+एव वा चूर्णं गुदे नाड्या विनिर्धमेत्।
तत्+विघाते सुतीक्ष्णं तु बस्तिं स्निग्धं प्रपीडयेत्॥138॥
ऋजु कुर्यात्+गुदशिराविण्मूत्रमरुतः+अस्य सः।
भूया+अनुबन्धे वातघ्नैः+विरेच्यः स्नेहरेचनैः॥139॥
अनुवास्यः+च रौक्ष्यात्+हि सङ्गः+ मारुतवर्चसोः।
त्रिपटुत्रिकटुश्रेष्ठादन्त्यरुष्करचित्रकम्॥140॥
जर्जरं स्नेहमूत्राक्तम्+अन्तर्धूमं विपाचयेत्।
शरावसन्धौ मृल्लिप्ते क्षारः कल्याणकाह्वयः॥141॥
स पीतः सर्पिषा युक्तः+ भक्ते वा स्निग्धभोजिना।
उदावर्तविबन्धार्शोगुल्मपाण्डूदरकृमीन्॥142॥
मूत्रसङ्गाश्मरीशोफहृद्रोगग्रहणीगदान्।
मेहप्लीहरुजानाहश्वासकासान्+च नाशयेत्॥143॥
सर्वं च कुर्यात्+यत्+प्रोक्तम+अर्शसां गाढवर्चसाम्।
द्रोणे+अपां पूतिवल्कद्वितुलम्+अथ पचेत्+पादशेषे च तस्मिन्
देया+अशीतिः+गुडस्य प्रतनुकरजसः+ व्योषतः+अष्टौ पलानि।
एतत्+मासेन जातं जनयति परमाम्+ऊष्मणः पक्तिशक्तिं
शुक्तं कृत्वा+आनुलोम्यं प्रजयति गुदजप्लीहगुल्मोदराणि॥144॥
पचेत्+तुलां पूतिकरञ्जवल्कात्+द्वे मूलतः+चित्रककण्टकार्योः।
द्रोणत्रये+अरां चरणावशेषे पूते शतं तत्र गुडस्य दद्यात्॥145॥
पलिकं च सुचूर्णितं त्रिजातत्रिकटुग्रन्थिकदाडिमाश्मभेदम्॥
पुरपुष्करमूलधान्यचव्यं हपुषामार्द्रकम्+अम्लवेतसं च॥146॥
शीतीभूतं क्षौद्रविंशत्युपेतमार्द्रद्राक्षाबीजपूरार्द्रकैः+च।

युक्तं कामं गण्डिकाभिः+तथा+इक्षोः सर्पिः पात्रे माससमात्रेण जातम्॥147॥
चुक्रं क्रकचम्+इव+इदं दुर्नाम्नां वह्निदीपनं परमम्।
पाण्डुगरोदरगुल्मप्लीहानाहाश्मकृच्छ्रघ्नम्॥148॥
द्रोणं पीलुरसस्य वस्त्रगलितं न्यस्तं हविः+भाजने।
युञ्जीत द्विपलैः+मदामधुफलाखर्जूरधात्रीफलैः।
पाठामाद्रिदुरालभाम्लविदुलव्योषत्वगेलोल्लकैः
स्पृक्काकोललवङ्गवेल्लचपलामूलाग्निकैः पालिकैः॥149॥
गुडपलशतयोजितं निवाते निहितम्+इदं प्रपिबन्+च पक्षमात्राम्।
निशमयति गुदाङ्कुरान् सगुल्मान्+अनलबलं प्रबलं करोति च+आशु॥150॥
एकैकशः+ दशपले दशमूलकुम्भपाठाद्वयार्कघुणवल्लभकट्फलानाम्।
दग्धे स्रुते+अनु कलशेन जलेन पक्वे पादस्थिते गुडतुलां, पलपञ्चकं च॥151॥
दद्यात्+प्रत्येकं व्योषचव्याभयानां, वह्निः+मुष्टी द्वे यवक्षारतः+च।
दर्वीमालिम्पन् हन्ति लीढः+ गुडः+अयं गुल्मप्लीहार्शः कुष्ठमेहाग्निसादान्॥152॥
तोयद्रोणे चित्रकमूलतुलार्धं साध्यं यावत्+पाददलस्थम्+अथ+इदम्।
अष्टौ दत्वा जीर्णगुडस्य पलानि क्वाथ्यं भूयः सान्द्रतया समम्+एतत्॥153॥
त्रिकटुकमिसिपथ्याकुष्टमुस्तावराङ्गकृमिरिपुदहनैलाचूर्णकीर्णः+अवलेहः।
जयति गुदजकुष्ठप्लीहगुल्मोदराणि प्रबलयति हुताशं शश्वत्+अभ्यस्यमानः॥154॥
गुडव्योषवरावेल्लतिलारुष्करचित्रकैः।
अर्शांसि हन्ति गुलिकां त्वग्विकारं च शीलिता॥155॥
मृल्लिप्तं सौरणं कन्दं पक्त्वा+अग्नौ पुटपाकवत्।
अद्यात्+सतैललवणं दुर्नामविनिवृत्तये॥156॥
मरिचपिप्पलिनागरचित्रकान् क्रमविवर्धितभागसमाहृतान्।
शिखिचतुर्गुणसूरणयोजितान् कुरु गुडेन गुडान् गुदजच्छिदः॥157॥
चूर्णीकृताः षोडश सूरणस्य भागाः+ततः+अर्धेन च चित्रकस्य।
महौषधात्+द्वौ मरिचस्य च+एकः+ गुडेन दुर्नामजयाय पिण्डी॥158॥
पथ्यानागरकृष्णाकरञ्जवेल्लाग्निभिः सितातुल्यैः।
वडवामुखः+ इव जरयति बहुगुरुः+अपि भोजनं चूर्णः॥159॥
कलिङ्गलाङ्गलीकृष्णावह्न्यपामार्गतण्डुलैः।
भूनिम्बसैन्धवगुडैः+गुडा गुदजनाशनाः॥160॥
लवणोत्तमवह्निकलिङ्गयवांश्चिरिबिल्वमहापिचुमन्दयुतान्।
पिब सप्तदिनं मथितालुडितान् यदि मर्दितुम्+इच्छसि पायुरुहान्॥161॥
शुष्केषु भल्लातकम्+अग्र्यम्+उक्तं भैषज्यमार्द्रेषु तु वत्सकत्वक्।

सर्वेषु सर्वर्तुषु कालशेयम्+अर्शःसु बल्यं च मलापहं च॥162॥
भित्त्वा विबन्धान्+अनुलोमनाय यत्+मारुतस्य+अग्निबलाय यत्+च।
तत्+अन्नपानौषधम्+अर्शसेन सेव्यं, विवर्ज्यं विपरीतम्+अस्मात्॥163॥
अर्शोतिसारग्रहणीविकाराः प्रायेण च+अन्योन्यनिदानभूताः।
सन्ने+अनले सन्ति, न सन्ति दीप्ते, रक्षेत्+अतः+तेषु विशेषतः+अग्निम्॥164॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने+अर्शश्चिकित्सितं नाम+अष्टमः+अध्यायः॥8॥
नवमः+अध्यायः।
अथ+अतः+ अतीसारचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
अतीसारः+ हि भूयिष्ठं भवति+आमाशयान्वयः।
हत्वा+अग्निं वातजे+अपि+अस्मात्+प्राक् तस्मिन्+लङ्घनं हितम्॥1॥
शूलानाहप्रसेकार्तं वामयेत्+अतिसारिणम्।
दोषाः सन्निचिता ये च विदग्धाहारमूर्च्छिताः॥2॥
अतीसाराय कल्पन्ते तेषु+उपेक्षा+एव भेषजम्।
भृशोत्क्लेशप्रवृत्तेषु स्वयम्+एव चलात्मसु॥3॥
न तु सङ्ग्रहणं योज्यं पूर्वम्+आमातिसारिणि।
अपि च+आध्मानगुरुताशूलः+तैमित्यकारिणि॥4॥
प्राणदा प्राणदा दोषे विबद्धे सम्प्रवर्तिनी।
पिबेत्+प्रक्वथितास्तोये मध्यदोषः+ विशोषयन्॥5॥
भूतीकपिप्पलीशुण्ठीवचाधान्यहरीतकीः।
अथवा बिल्वधनिकामुस्तनागरवालकम्॥6॥
बिडपाठावचापथ्याकृमिजिन्नागराणि वा।
शुण्ठीघनवचामाद्रीबिल्ववत्सकहिङ्गु वा॥7॥
शस्यते तु+अल्पदोषाणाम्+उपवासः+अतिसारिणाम्।
वचाप्रतिविषाभ्यां वा मुस्तापर्पटकेन वा॥8॥
ह्रीबेरनागराभ्यां वा विपक्वं पाययेत्+जलम्।
युक्ते+अन्नकाले क्षुत्क्षामं लघ्वन्नप्रति भोजयेत्॥9॥
तथा सः+ शीघ्रं प्राप्नोति रुचिम्+अग्निबलं बलम्।
तक्रेणावन्तिसोमेन यवाग्वा तर्पणेन वा॥10॥
सुरया मधुना वा+अथ यथासात्म्यम्+उपाचरेत्।
भोज्यानि कल्पयेत्+ऊर्ध्वं ग्राहीदीपनपाचनैः॥11॥

बालबिल्वशठीधान्यहिङ्गुवृक्षाम्लदाडिमैः।
पलाशहपुषाजाजीयवानीबिडसैन्धवैः॥12॥
लघुना पञ्चमूलेन पञ्चकोलेन पाठया।
शालिपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता॥13॥
दाडिमाम्ला हिता पेया कफपित्ते समुल्बणे।
अभयापिप्पलीमूलबिल्वैः+वातानुलोमनी॥14॥
विबद्धं दोषबहुलः+ दीप्ताग्निः+यः+अतिसार्यते।
कृष्णाविडङ्गत्रिफलाकषायैस्त विरेचयेत्॥15॥
पेयां युञ्ज्यात्+विरिक्तस्य वातघ्नैः+दीपनैः कृताम्।
आमे परिणते यः+तु दीप्ते+अग्नौ+उपवेश्यते।16॥
सफेनपिच्छं सरुजं सविबन्धं पुनः पुनः।
अल्पाल्पम्+अल्पशमलं निर्विड्वा सप्रवाहिकम्॥17॥
दधितैलघृतक्षीरैः सः+ शुण्ठीं सगुडां पिबेत्।
स्विन्नानि गुडतैलेन भक्षयेत्+बदराणि वा॥18॥
गाढविड्विहितैः शाकैः+बहुस्नेहैः+तथा रसैः।
क्षुधितं भोजयेत्+एनं दधिदाडिमसाधितैः॥19॥
शाल्योदनं तिलैः+मापैः+मुद्गैः+वा साधु साधितम्।
शठ्या मूलकपोतायाः पाठायाः स्वस्तिकस्य वा॥20॥
सूषायवानीकर्कारुक्षीरिणीचिर्भटस्य वा।
उपोदकाया जीवन्त्या बाकुच्या वास्तुकस्य वा॥21॥
सुवर्चलायाः+चुञ्चोः+वा लोणिकाया रसैः+अपि।
कूर्मवर्तकलोपाकशिखितित्तिरिकौक्कुटैः॥22॥
बिल्वमुस्ताक्षिभैषज्यधातकीपुष्पनागरैः।
पक्वातीसारजित्+तक्रे यवागूः+दाधिकी तथा॥23॥
कपित्थकच्छुराफञ्जीयूथिकावटशेलुजैः।
दाडिमीशणकार्पासीशाल्मलीनां च पल्लवैः॥24॥
कल्कः+ बिल्वशलाटूनां तिलकल्कः+च तत्+समः।
दध्नः सरः+अम्लः सस्नेहः खलः+ हन्ति प्रवाहिकाम्॥25॥
मरिचं धनिका+अजाजी तित्तिडीकं शठी बिडम्।
दाडिमं धातकी पाठा त्रिफला पञ्चकोलकम्॥26॥
यावशूकं कपित्थाम्रजम्बूमध्यं सदीप्यकम्।
पिष्टैः षड्गुणबिल्वैः+तैः+दध्नि मुद्गरसे गुडे॥27॥

स्नेहे च यमके सिद्धः खलः+अयम्+अपराजितः।
दीपनः पाचनः+ ग्राही रुच्यः+ बिम्बिशिनाशनः॥28॥
कोलानां बालबिल्वानां कल्कैः शालियवस्य च।
मुद्गमाषतिलानां च धान्ययूषं प्रकल्पयेत्॥29॥
ऐकध्यं यमके भृष्टं दधिदाडिमसारिकम्।
वर्चःक्षये शुष्कमुखं शाल्यन्नं तेन भोजयेत्॥30॥
दध्नः सरं वा यमके भृष्टं सगुडनागरम्।
सुरां वा यमके भृष्टां व्यञ्जनार्थं प्रयोजयेत्॥31॥
फलाम्लं यमके भृष्टं यूषं गृञ्जनकस्य वा।
भृष्टान्+वा यमके सक्तून् खादेत्+व्योषावचूर्णितान्॥32॥
माषान् सुसिद्धान्+तद्वत्+वा घृतमण्डोपसेवनान्।
[-------रसं सुसिद्धपूतं वा घाजमेषान्तराधिजम्॥33॥
पचेत्+दाडिमसाराम्लं सधान्यस्नेहनागरम्।
रक्तशाल्योदनं तेन भुञ्जानः प्रपिबन्+च तम्॥34॥
वर्चः क्षयकृतैः+आशु विकारै परिमुच्यते।
बालबिल्वं गुडं तैलं पिप्पलीं विश्वभेषजम्॥35॥
लिह्यात्+वाते प्रतिहते सशूलः सप्रवाहिकः।
बल्करं शाबलं पुष्पं धातक्या बदरीदलम्॥36॥
पिबेत्+दधिसरक्षौद्कपित्थस्वरसाप्लुतम्।
विबद्धवातवर्चाः+तु बहुशूलप्रवाहिकः॥37॥
सरक्तपिच्छस्तृष्णार्तः क्षीरसौहित्यम्+अर्हति।
यमकस्य+उपरि क्षीरं धारोष्णं वा प्रयोजयेत्॥38॥
शृतम्+एरण्डमूलेन बालबिल्वेन वा पुनः।
पयः+तु+उत्क्वाथ्य मुस्तानां विंशतिं त्रिगुणे+अम्भसि॥39॥
क्षीरावशिष्टं तत्+पीतं हन्यात्+आमं सवेदनम्।
पिप्पल्याः पिबतः सूक्ष्मं पजः+ मरिचजन्म वा॥40॥
चिरकालानुषक्ता+अपि नश्यति+आशु प्रवाहिका।
निरामरूपं शूलार्तं लङ्घनाद्यैः+च कर्षितम्॥41॥
रूक्षकोष्ठम्+अपेक्ष्याग्नं सक्षारं पाययेत्+ घृतम्।
सिद्धं दधिसुरामण्डे दशमूलस्य च+अम्भसि॥42॥
सिन्धूत्थपञ्चकोलाभ्यां तैलं सद्योर्तिनाशनम्।
षड्भिः शुण्ठ्याः पलैः+द्वाभ्यां द्वाभ्यां ग्रन्थ्यग्निसैन्धवात्॥43॥

तैलप्रस्तं पचेत्+दध्ना निःसारकरुजापहम्।
एकतः+ मांसदुग्धाज्यं पुरीषग्रहशूलजित्॥44॥
पानानुवासनाभ्यङ्गप्रयुक्तं तैलम्+एकतः।
तत्+हि वातदितामग्र्यं शूलं च विगुणः+अनिलः॥45॥
धात्वन्तरोपमर्देद्धश्चालः+ व्यापी स्वधामगः।
तैलं मन्दानलस्य+अपि युक्त्या शर्मकरं परम्॥46॥
वाय्वाशये सतैले हि बिम्बिसी न+अवतिष्ठते।
क्षीमे मले स्वयतनच्युतेषु गोषान्तरेषु+ईरणः+ एकवीरे।
कः+ निष्टनन्+प्राणिति कोष्टशूली
नान्तर्बहिः+तैलपरः+ यद्रि स्यात्॥47॥
गुदरुग्भ्रंयोः+युञ्ज्यात्+सक्षीरं साधितं हविः॥48॥
रसे कोलाम्लचाङ्गेर्योः+दध्नि पिष्टे च नागरे।
तैः+एव च+अम्लैः संयोज्य सिद्धं सुश्लक्ष्णकल्कितैः॥49॥
धान्योषणबिडाजाजीपञ्चकोलकदाडिमैः।
योजयेत्+स्नेहबस्तिं वा दशमूलेन साधितम्॥50॥
शठीसताह्वाकुष्ठैः+वा वचया चित्रकेण वा।
प्रवाहमे गुदब्रंशे मूत्राघाते कटिग्रहे॥51॥
मधुराम्लैः शृतं तैलं घृतं वा+अपि+अनुवासनम्।
प्रवेशयेत्+गुदं ध्वस्तम्+अभ्यक्तं स्वेजितं मृदु॥52॥
कुर्यात्+च गोःफणाबन्धं मध्यच्छिद्रेण चर्मण।
पञ्चमूलस्य महतः क्वाथं क्षीरे विपाचयेत्॥53॥
उन्दुरुं च+अन्त्ररहितं तेन वातह्नकल्कवत्।
तैलं पटेत्+गुदभ्रंशं पानाभ्यबह्गेन तत्+जयेत्॥54॥
पैत्ते तु सामे तीक्ष्णोष्णवर्ज्यं प्रागिवं लङ्घनम्।---------]
तृड्वान् पिबेत् षडङ्गाम्बु सभूनिम्बं ससारिवम्॥55॥
पेयादि क्षुधितस्य+अन्नम्+अग्निसन्धुक्षणं हितम्।
बृहत्यादिगणाभीरुद्विबलाशूर्पपर्णिभिः॥56॥
पाययेत्+अनुबन्धे तु सक्षौद्रं तण्डुलाम्भसा।
कुटजस्य फलं पिष्टं सवल्कं सघुणप्रियम्॥57॥
पाठावत्सकबीजत्वग्दार्वीग्रन्थिकशुण्ठि वा।
क्वाथं वा+अतिविषाबिल्ववत्सकोदीच्यमुस्तजम्॥58॥
अथवा+अतिविषामूर्वानिशेन्द्रयवताक्ष्र्यजम्।

समध्वति विषाशुण्ठीमुस्तेन्द्रयवकट्फलम्॥59॥
पलं वत्सकबीजस्य श्रपयित्वा रसं पिबेत्।
यः+ रसाशी जयेत्+शीघ्रं सः+ पैत्तं जठरामयम्॥60॥
मुस्ताकषायम्+एवं वा पिबेत्+मधुसमायुतम्।
सक्षौद्रं शाल्मलीवृन्तकषायं वा हिमाह्वयम्॥61॥
किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम्।
कटङ्कटेरी ह्रीबेरं बिल्वमध्यं दुरालभा॥62॥
तिला मोचरसं रोध्रं समङ्गा कमलोत्पलम्।
नागरं धातकीपुष्पं दाडिमस्य त्वगुत्पलम्॥63॥
अर्धश्लोकैः स्मृता योगाः सक्षौद्राः+तण्डुलाम्बुना।
निशेन्द्रयवरोध्रैलाक्वाथः पक्वातिसारजित्॥64॥
रोध्राम्बष्ठाप्रियङ्ग्वादिगणान्+तद्वत् पृथक् पिबेत्।
कट्वङ्गवल्कयष्ट्याह्वफलिनीदाडिमाङ्कुरैः॥65॥
पेयाविलेपीखलकान् कुर्यात्+सदधिदाडिमान्।
तद्वत्+दधित्थबिल्वाम्रजम्बुमध्यैः प्रकल्पयेत्॥66॥
अजापयः प्रयोक्तव्यं निरामे, तेन च+इच्छमः।
दोषाधिक्यात्+न जायेत बलिनं तं विरेचयेत्॥67॥
व्यत्यासेन शकृद्रक्तम्+उपवेश्येत यः+अपि वा।
पलाशफलनिर्यूहं युक्तं वा पयसा पिबेत्॥68॥
ततः+अनु कोष्णं पातव्यं क्षीरम्+एव यथाबलम्।
प्रवाहिते तेन मले प्रशाम्यति+उदरामयः॥69॥
पलाशवत्+प्रयोज्या वा त्रायमाणा विशोधनी।
संसर्ग्यां क्रियमाणायां शूलं यदि+अनुवर्तते॥70॥
स्रुतदोषस्य तं शीघ्रं यथावह्निः+अनुवासयेत्।
शतपुष्पावरीभ्यां च बिल्वेन मधुकेन च॥71॥
तैलपादं पयोयुक्तं पक्वम्+अन्वासनं घृतम्।
अशान्तावित्यतीसारे पिच्छाबस्तिः परं हितः॥72॥
परिवेष्ट्यं कुशैः+आर्द्रैः+आर्द्रवृन्तानि शाल्मलेः।
कृष्णमृत्तिकया+आलिप्य स्वेदयेत्+गोमयाग्निना॥73॥
मृच्छोषे तानि सङ्क्षुद्य तत्+पिण्डं मुष्टिसम्मितम्।
मर्दयेत्+पयसः प्रस्थे पूतेन+आस्थापयेत्+ततः॥74॥
नतयष्ट्याह्वकल्काज्यक्षौद्रतैलवता+अनु च।

स्नातः+ भुञ्जीत पयसा जाङ्गलेन रसेन वा॥75॥
पित्तातिसारज्वरशोफगुल्मसमीरणास्रग्रहणीविकारान्।
जयति+अयं शीघ्रम्+अतिप्रवृत्तिं विरेचनास्थापनयोः+च बस्तिः॥76॥
फाणितं कुटजोत्थं च सर्वातीसारनाशनम्।
वत्सकादिसमायुक्तं साम्बष्ठादि समाक्षिकम्॥77॥
नीरुक्+निरामं दीप्ताग्नेः+अपि सास्रं चिरोत्थितम्।
नानावर्णम्+अतीसारं पुटपाकैः+उपाचरेत्॥78॥
त्वक्पिण्डात्+दीर्घवृन्तस्य श्रीपर्णीपत्रसंवृतात्।
मृल्लिप्तादग्निना स्विन्नात्+रसं निष्पीडितं हिमम्॥79॥
अतीसारी पिबेत्+युक्तं मधुना सितया+अथवा।
एवं क्षीरिद्रुमत्वग्भिः+तत्+प्ररोहैः+च कल्पयेत्॥80॥
कट्वङ्गत्वग्घृतयुता स्वेदिता सलिलोष्मणा।
सक्षौद्रा हन्ति+अतीसारं बलवन्तम्+अपि द्रुतम्॥81॥
पित्ततिसारी सेवेत पित्तलानि+एव यः पुनः।
रक्तातिसारं कुरुते तस्य पित्तं सतृड्ज्वरम्॥82॥
दारुणं गुदपाकं च तत्र छागं पयः+ हितम्।
पद्मोत्पलसमङ्गाभिः शृतं मोचरसेन च॥83॥
सारिवायष्टिरोध्रैः+वा प्रसवैः+वा वटादिजैः।
सक्षौद्रशर्करं पाने भोजने गुदसेचने॥84॥
तद्वत्+रसादयः+अनम्लाः साज्याः पानान्नयोः+हिताः।
काश्मर्यफलयूषः+च किञ्चित्+अम्लः सशर्करः॥85॥
पयस्यर्धोदके छागे ह्रीबेरोत्पलनागरैः।
पेया रक्तातिसारघ्नी पृश्निपर्णीरसान्विता॥86॥
प्राग्भक्तं नवनीतं वा लिह्यात्+मधुसितायुतम्।
बलिनि+अस्रे+अस्रम्+एव+अजं मार्गं वा घृतभर्जितम्॥87॥
क्षीरानुपानं क्षीराशी त्र्यहं क्षीरोद्भवं घृतम्।
कपिञ्जलरसाशी वा लिहन्+आरोग्यम्+अश्नुते॥88॥
पीत्वा शतावरीकल्कं क्षीरेण क्षीरभोजनः।
रक्तातिसारं हन्ति+आशु तया वा साधितं घृतम्॥89॥
लाक्षानागरवैदेहीकटुकादार्विवल्कलैः।
सर्पिः सेन्द्रयवैः सिद्धं पेयामण्डावचारितम्॥90॥
अतीसारं जयेत्+शीघ्रं त्रिदोषम्+अपि दारुणम्।

कष्णमृच्छङ्कयष्ट्याह्वक्षौद्रासृक्तण्डुलोदकम्॥91॥
जयति+अस्रं प्रियङ्गुः+च तण्डुलाम्बुमधुप्लुता।
कल्कः+तिलानां कृष्णानां शर्करापाञ्चभागिकः॥92॥
आजेन पयसा पीतः सद्यः+ रक्तं नियच्छति।
पीत्वा सशर्कराक्षौद्रं चन्दनं तण्डुलाम्बुना॥93॥
दाहतृष्णाप्रमोहेभ्यः+ रक्तस्रावात्+च मुच्यते।
गुदस्य दाहे पाके वा सेकलेपा हिता हिमाः॥94॥
अल्पाल्पं बहुशः+ रक्तं सशूलम्+उपवेश्यते।
यदा विबद्धः+ वायुः+च कृच्छ्रात्+चरति वा न वा॥95॥
पिच्छाबस्तिं तदा तस्य पूर्वोक्तम्+उपकल्पयेत्।
पल्लवान् जर्जरीकृत्य शिंशिपाकोविदारयोः॥96॥
पचेत्+यवान्+च सः+ क्वाथः+ घृतक्षीरसमन्वितः।
पिच्छास्रुतौ गुदभ्रंशे प्रवाहणरुजासु च॥97॥
पिच्छाबस्तिः प्रयोक्तव्यः क्षतक्षीणबलावहः।
प्रपौण्डरीकसिद्धेन सर्पिषा च+अनुवासनम्॥98॥
रक्चं विट्सहितं पूर्वं पश्चात्+वा यः+अतिसार्यते।
शतावरीघृतं तस्य लेहार्थम्+उपकल्पयेत्॥99॥
शर्करार्धाशकं लीढं नवनीतं नवोद्धृतम्।
क्षौद्रपादं जयेत्+शीघ्रं तं विकारं हिताशिनः॥100॥
न्यग्रोधोदुम्बराश्वत्थशुङ्गानापोथ्य वासयेत्।
अहोरात्रं जले तप्ते घृतं तेन+अम्भसा पचेत्॥101।
तत्+अर्धशर्करायुक्तं लेहयेत्+क्षौद्रपादिकम्।
अधः+ वा यदि वा+अपि+ऊर्ध्वं यस्य रक्तं प्रवर्तते॥102॥
श्लेष्मातिसारे वातोक्तं विशेषात्+आमपाचनम्।
कर्तव्यम्+अनुबन्धे+अस्य पिबेत्+पक्त्वा+अग्निदीपनम्॥103॥
बिल्वकर्कटिकामुस्तप्राणदाविश्वभेषजम्।
वचाविडङ्गभूतीकधानकामरदारु वा॥104॥
अथवा पिप्पलीमूलपिप्पलीद्वयचित्रकम्।
पाठाग्निवत्सकग्रन्थितिक्ताशुण्ठीवचाभयाः॥105॥
क्वथिता यदि वा पिष्टाः श्लेष्मातीसारभेषजम्।
सौवर्चलवचाव्योषहिङ्गुप्रतिविषाभयाः॥106॥
पिबेत्+श्लेष्मातिसारार्तः+चूर्णिताः कोष्णवारिणा।

मध्यं लीढ्वा कपित्थस्य सव्योषक्षौद्रशर्करम्॥107॥
कट्फलं मधुयुक्तं वा मुच्यते जठरामयात्।
कणां मधुयुतां लीढ्वा तक्रं पीत्वा सचित्रकम्॥108॥
भुक्त्वा वा बालबिल्वानि व्यपोहति+उदरामयम्।
पाठामोचरसाम्भोदधातकीबिल्वनागरम्॥109॥
सुकृच्छ्रम्+अपि+अतीसारं गुडतक्रेण नाशयेत्।
यवानीपिप्पलीमूलचातुर्जातकनागरैः॥110॥
मरिचाग्निजलाजाजीधान्यसौवर्चलैः समैः।
वृषाम्लधातकीकृष्णाबिल्वदाडिमदीप्यकैः॥111॥
त्रिगुणैः षड्गुणसितैः कपित्थाष्टगुणै कृतः।
चूर्णः+अतीसारग्रहणीक्षयगुल्मगलामयान्॥112॥
कासश्वासाग्निसादार्शः पीनसारोचकान् जयेत्।
कर्षोन्मिता तवक्षीरी चातुः+जातं द्विकार्षिकम्॥113॥
यवानीधान्यकाजाजीग्रन्थिव्योषं पलांशकम्।
पलानि दाडिमात्+अष्टौ सितायाः+च+एकतः कृतः॥114॥
गुणैः कपित्थाष्टकवत्+चूर्णः+अयं दाडिमाष्टकः।
भोज्यः+ वातातिसारोक्तैः+यथावस्थं खलादिभिः॥115॥
सविडङ्गः समरिचः सकपित्थः सनागरः।
चाङ्गेरीतक्रकोलाम्लः खलः श्लेष्मातिसारजित्॥116॥
क्षीणे श्लेष्मणि पूर्वोक्तम्+अम्लं लाक्षादि षट्पलम्।
पुराणं वा घृतं दद्यात्+यवागूमण्डमिश्रितम्॥117॥
वातश्लेष्मविबन्धे वा स्रवत्यति कफे+अपि वा।
शूले प्रवाहिकायां वा पिच्छाबस्तिः प्रशस्यते॥118॥
वचाबिल्वकणाकुष्ठशताह्वालवणान्वितः।
बिल्वतैलेन तैलेन वचाद्यैः साधितेन वा॥119॥
बहुशः कफवातार्ते कोष्णेन+अन्वासनं हितम्।
क्षीणे कफे गुदे दीर्घकालातीसारदुर्बले॥120॥
अनिलः प्रबलः+अवश्यं स्वस्थानस्थः प्रजायते।
स बली सहसा हन्यात्+तस्मात्+तं त्वरया जयेत्॥121॥
वायोः+अनन्तरं पित्तं पित्तस्य+अनन्तरं कफम्।
जयेत्+पूर्वं त्रयाणां वा भवेत्+यः+ बलवत्तमः॥122॥
भीशोकाभ्याम्+अपि चलः शीघ्रं कुप्यति+अतः+तयोः।

कार्या क्रिया वातहरा हर्षणाश्वासनानि च॥123॥
यस्य+उच्चारात्+विना मूत्रं पवनः+ वा प्रवर्तते।
दीप्ताग्नेः+लघुकोष्ठस्य शान्तः+तस्य+उदरामयः॥124॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने+अतीसारचिकित्सितं नाम नवमः+अध्यायः॥9॥
दशमः+अध्यायः।
अथ+अतः+ ग्रहणीदोषचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
ग्रहणीम्+आश्रितं दोषम्+अजीर्णवत्+उपाचरेत्।
अतीसारोक्तविधिना तस्यामं च विपाचयेत्॥1॥
अन्नकाले यवाग्वादि पञ्चकोलादिभिः+युतम्।
वितरेत्+पटुलघ्वन्नं पुनः+योगान्+च दीपनान्॥2॥
दद्यात्+सा+अतिविषां पेयाम्+आमे साम्लां सनागराम्।
पाने+अतीसारविहितं वारि तक्रं सुरादि च॥3॥
ग्रहणीदोषिणां तक्रं दीपनग्राहिलाघवात्।
पथ्यं,मधुरपाकित्वात्+न च पित्तप्रदूषणम्॥4॥
कषायोष्णविकाशित्वात्+रूक्षत्वात्+च कफे हितम्।
वाते स्वाद्वम्लसान्द्रत्वात्+सद्यस्कमविदाहि तत्॥5॥
चतुर्णां प्रस्थम्+अम्लानां त्र्यूषणात्+च पलत्रयम्।
लवणानां च चत्वारि शर्करायाः पलाष्टकम्॥6॥
तत्+चूर्णं शाकसूपान्नरागादिषु+अवचारयेत्।
कासाजीर्णारुचिश्वासहृत्पाण्डुप्लीहगुल्मनुत्॥7॥
नागरातिविषामुस्तं पाक्यम्+आमहरं पिबेत्।
उष्णाम्बुना वा तत्+कल्कं नागरं वा+अथवा+अभयाम्॥8॥
ससैन्धवं वचादिं वा तद्वत्+मदिरया+अथवा।
वर्चस्यामे सप्रवाहे पिबेत्+वा दाडिमाम्बुना॥9॥
बिडेन लवणं पिष्टं बिल्वचित्रकनागरम्।
सामे कफानिले कोष्ठरुक्करे कोष्णवारिणा॥10॥
कलिङ्गहिङ्ग्वतिविषावचासौवर्चलाभयम्।
छर्दिहृद्रोगशूलेषु पेयम्+उष्णेन वारिणा॥11॥
पथ्यासौवर्चलाजाजीचूर्णं मरिचसंयुतम्।
पिप्पलीं नागरं पाठां सारिवां बृहतीद्वयम्॥12॥

चित्रकं कौटजं क्षारं तथा लवणपञ्चकम्।
चूर्णीकृतं दधिसुरातन्मण्डोष्णाम्बुकाञ्जिकैः॥13॥
पिबेत्+अग्निविवृद्ध्यर्थं कोष्ठवातहरं परम्।
पटूनि पञ्च द्वौ क्षारौ मरिचं पञ्चकोलकम्॥14॥
दीप्यकं हिङ्गु गुलिका बीजपूररसे कृता।
कोलदाडिमतोये वा परं पाचनदीपनी॥15॥
तालीसपत्रचविकामरिचानां पलं पलम्।
कृष्णातन्मूलयोः+द्वे द्वे पले शुण्ठी पलत्रयम्॥16॥
चतुर्जातम्+उशीरं च कर्षांशं श्लक्ष्णचूर्णितम्।
गुडेन वटकान् कृत्वा त्रिगुणेन सदा भजेत्॥17॥
मद्ययूषरसारिष्टमस्तुपेयापयोनुपः।
वातश्लेष्मात्मनां छर्दिग्रहणीपार्श्वहृद्रुजाम्॥18॥
ज्वरश्वयथुपाण्डुत्वगुल्मपानात्ययार्शसाम्।
प्रसेकपीनसश्वासकासानां च निवृत्तये॥19॥
अभयां नागरस्थाने दद्यात्+तत्र+एव विड्ग्रहे।
छर्द्यादिषु च पैत्तेषु चतुर्गुणसितान्विताः॥20॥
पक्वेन वटकाः कार्या गुडेन सितया+अपि वा।
परं हि वह्निसम्पर्कात्+लघिमानं भजन्ति ते॥21॥
अथ+एनं परिपक्वामं मारुतग्रहणीगदम्।
दीपनीययुतं सर्पिः पाययेत्+अल्पशः+ भिषक्॥22॥
किञ्चित्+सन्धुक्षिते तु+अग्नौ सक्तविण्मूत्रमारुतम्।
द्व्यहं त्र्यहं वा संस्नेह्य स्विन्नाभ्यक्तं निरूहयेत्॥23॥
ततः+ एरण्डतैलेन सर्पिषा तैल्वकेन वा।
सक्षारेणानिले शान्ते स्रस्तदोषं विरेचयेत्॥24॥
शुद्धरूक्षाशयं बद्धवर्चस्कं च+अनुवासयेत्।
दीपनीयाम्लवातघ्नसिद्धतैलेन तं ततः॥25॥
निरूढं च विरिक्तं च सम्यक्+च+अपि+अनुवासितम्।
लघ्वन्नप्रतिसंयुक्तं सर्पिः+अभ्यासयेत्+पुनः॥26॥
पञ्चमूलाभयाव्योषपिप्पलीमूलसैन्धवैः।
रास्नाक्षारद्वयाजाजीविडङ्गशठिभिः+घृतम्॥27॥
शुक्तेन मातुलुङ्गस्य स्वरसेन+आर्द्रकस्य च।
शुष्कमूलककोलाम्लचुक्रिकादाडिमस्य च॥28॥

तक्रमस्तुसुरामण्डसौवीरकतुषोदकैः।
काञ्जिकेन च तत्+पक्वम्+अग्निदीप्तिकरं परम्॥29॥
शूलगुल्मोदरश्वासकासानिलकफापहम्।
सबीजपूरकरसं सिद्धं वा पाययेत्+घृतम्॥30॥
तैलम्+अभ्यञ्जनार्थं च सिद्धम्+एभिः+चलापहम्।
एतेषाम्+औषधानां वा पिबेत्+चूर्णं सुखाम्बुना॥31॥
वाते श्लेष्मावृते सामे कफे वा वायुन+उद्धते।
अग्नेः+निर्वापकं पित्तं रेकेण वमनेन वा॥32॥
हत्वा तिक्तलघुग्राहिदीपनैः+अविदाहिभिः।
अन्नैः सन्धुक्षयेत्+अग्निं चूर्णैः स्नेहैः+च तिक्तकैः॥33॥
पटोलनिम्बत्रायन्तीतिक्तातिक्तकपर्पटम्।
कुटजत्वक्फलं मूर्वा मधुशिग्रुफलं वचा।34॥
दार्वीत्वक्पद्मकोशीरयवानीमुस्तचन्दनम्।
सौराष्ट्र्यतिविषाव्योषत्वगेलापत्रदारु च॥35॥
चूर्णितं मधुना लेह्यं पेयं मद्यैः+जलेन वा।
हृत्पाण्डुग्रहणीरोगगुल्मशूलारुचिज्वरान्॥36॥
कामलां सन्निपातं च मुखरोगान्+च नाशयेत्।
भूनिम्बकटुकामुस्तात्र्यूषणेन्द्रयवान् समान्॥37॥
द्वौ चित्रकात्+वत्सकत्वग्भागान् षोडश चूर्णयेत्।
गुडशीताम्बुना पीतं ग्रहणीदोषगुल्मनुत्॥38॥
कामलाज्वरपाण्डुत्वमेहारुच्यतिसारजित्।
नागरातिविषामुस्तापाठाबिल्वं रसाञ्जनम्॥39॥
कुटजत्वक्फलं तिक्ता धातकी च कृतं रजः।
क्षौद्रतण्डुलवारिभ्यां पैत्तिके ग्रहणीगदे॥40॥
प्रवाहिकार्शोगुदरुग्रक्तोत्थानेषु च+इष्यते।
चन्दनं पद्मकोशीरं पाठा मूर्वा कुटन्नटम्॥41॥
षड्ग्रन्थासारिवास्फोतासप्तपर्णाटरूषकान्।
पटोलोदुम्बराश्वत्थवटप्लक्षकपीतनान्॥41॥
कटुकां रोहिणीं मुस्तां निम्बं च द्विपलांशकान्।
द्रोणे+अपां साधयेत्+तेन पचेत्+सर्पिः पिचून्मितैः॥42॥
किराततिक्तेन्द्रयववीरामागधिकोत्पलैः।
पित्तग्रहण्यां तत्+पेयं कुष्ठोक्तं तिक्तकं च यत्॥44॥

ग्रहण्यां श्लेष्मदुष्टायां तीक्ष्णैः प्रच्छर्दने कृते।
कट्वम्ललवणक्षारैः क्रमात्+अग्निं विवर्धयेत्॥45॥
पञ्चकोलाभयाधान्यपाठागन्धपलाशकैः।
बीजपूरप्रगाढैः+च सिद्धैः पेयादि कल्पयेत्॥46॥
द्रोणं मधूकपुष्पाणां विडङ्गं च ततः+अर्धतः।
चित्रकस्य ततः+अर्धं च तथा भल्लातकाढकम्॥47॥
मञ्जिष्ठा+अष्टपलं च+एतत्+जलद्रोणत्रये पचेत्।
द्रोणशेषं शृतं शीतं मध्वर्धाढकसंयुतम्॥48॥
एलामृणालागुरुभिः+चन्दनेन च रूषिते।
कुम्भे मासं स्थितं जातम्+आसवं तं प्रयोजयेत्॥49॥
ग्रहणीं दीपयति+एष बृंहणः पित्तरक्तनुत्।
शोषकुष्ठकिलासानां प्रमेहाणां च नाशनः॥50॥
मधूकपुष्पस्वरसं शृतमर्धक्षयीकृतम्।
क्षौद्रपादयुतं शीतं पूर्ववत्+सन्निधापयेत्॥51॥
तत्+पिबन् ग्रहणीदोषान् जयेत्+सर्वान् हिताशनः।
तद्वत्+द्राक्षेक्षुखर्जूरस्वरसान्+आसुतान् पिबेत्॥52॥
हिङ्गुतिक्तावचामाद्रीपाठेन्द्रयवगोक्षुरम्।
पञ्चकोलं च कर्षांशं पलांशं पटुपञ्चकम्॥53॥
घृततैलद्विकुडवे दध्नः प्रस्थद्वये च तत्।
आपोथ्य क्वाथयेत्+अग्नौ मृदौ+अनुगते रसे॥54॥
अन्तर्धूमं ततः+ दग्ध्वा चूर्णीकृत्य घृताप्लुतम्।
पिबेत्+पाणितलं तस्मिन् जीर्णे स्यात्+मधुराशनः॥55॥
वातश्लेष्मामयान् सर्वान् हन्यात्+विषगरान्+च सः।
भूनिम्बं रोहिणीं तिक्तां पटोलं निम्बपर्पटम्॥56॥
दग्ध्वा माहिषमूत्रेण पिबेत्+अग्निविवर्धनम्।
द्वे हरिद्रे वचा कुष्ठं चित्रकः कटुरोहिणी॥57॥
मुस्ता च छागमूत्रेण सिद्धः क्षारः+अग्निवर्धनः।
चतुष्पलं सुधाकाण्डात्+त्रिपलं लवणत्रयात्॥58॥
वार्ताककुडवं च+अर्कात्+अष्टौ द्वे चित्रकात्+पले।
दग्ध्वा रसेन वार्ताकात्+गुटिका भोजनोत्तराः॥59॥
भुक्तम्+अन्नं पचन्ति+आशु कासश्वासार्शसां हिताः।
विसूचिकाप्रतिश्यायहृद्रोगशमनाः+च ताः॥60॥

मातुलुङ्गशठीरास्नाकटुत्रयहरीतकि।
स्वर्जिकायावशूकाख्यौ क्षारौ पञ्चपटूनि च॥61॥
सुखाम्बुपीतं तत्+चूर्णं बलवर्णाग्निवर्धनम्।
श्लैष्मिके ग्रहणीदोषे सवाते तैः+घृतं पचेत्॥62॥
धान्वन्तरं षट्पलं च भल्लातकघृताभयम्।
बिडकाचोषलवणस्वर्जिकायावशूकजान्॥63॥
सप्तलां कण्टकारीं च चित्रकं च+एकतः+ दहेत्।
सप्तकृत्वः स्रुतस्यास्य क्षारस्य+अर्धाढके पचेत्॥64॥
आढकं सर्पिषः पेयं तत्+अग्निबलवृद्धये।
निचये पञ्चकर्माणि युञ्ज्यात्+च+एतत्+यथाबलम्॥65॥
प्रसेके श्लैष्मिके+अल्पाग्नेः+दीपनं रूक्षतिक्तकम्।
योज्यं कृशस्य व्यत्यासात्+स्निग्धरूक्षं कफोदये॥66॥
क्षीणक्षामशरीरस्य दीपनं स्नेहसंयुतम्।
दीपनं बहुपित्तस्य तिक्तं मधुरकैः+युतम्॥67॥
स्नेहः+अम्ललवणैः+युक्तः+ बहुवातस्य शस्यते।
स्नेहम्+एव परं विद्यात्+दुर्बलानलदीपनम्॥68॥
नालं स्नेहसमिद्धस्य शमायान्नं सुगुरुः+अपि।
यः+अल्पाग्नित्वात्+कफे क्षीणे वर्चः पक्वम्+अपि श्लथम्॥69॥
मुञ्चेत्+पञ्चौषधयुतं सः+ पिबेत्+अल्पशः+ घृतम्।
तेन स्वमार्गम्+आनीतः स्वकर्मणि नियोजितः॥70॥
समानः+ दीपयति+अग्निम्+अग्नेः सन्धुक्षकः+ हि सः।
पुरीषं यः+च कृच्छ्रेण कठिनत्वात्+विमुञ्चति॥71॥
स घृतं लवणैः+युक्तं नरः+अन्नावग्रहं पिबेत्।
रौक्ष्यात्+मन्दे+अनले सर्पिः+तैलं वा दीपनैः पिबेत्॥72॥
क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः।
उदावर्तात्+तु योक्तव्या निरूहस्नेहबस्तयः॥73॥
दोषातिवृद्ध्या मन्दे+अग्नौ संशुद्धः+अन्नविधिं चरेत्।
व्याधिमुक्तस्य मन्दे+अग्नौ सर्पिः+एव तु दीपनम्॥74॥
अध्वोपवासक्षामत्वैर्यवाक्+वा पाययेत्+घृतम्।
अन्नावपीडितं बल्यं दीपनं बृंहणं च तत्॥75॥
दीर्घकालप्रसङ्गात्+तु क्षामक्षीणकृशान्+नरान्।
प्रसहानां रसैः साम्लैः+भोजयेत्+पिशिताशिनाम्॥76॥

लघूष्णकटुशोधित्वाद् दीपयन्ति+आशु ते+अनलम्।
मांसोपचितमांसत्वात्+परं च बलवर्धनाः॥77॥
स्नेहासवसुरारिष्टचूर्णक्वाथहिताशनैः।
सम्यक् प्रयुक्तैः+देहस्य बलमग्नेः+च वर्धते॥78॥
दीप्तः+ यथा+एव स्थाणुः+च बाह्यः+अग्निः सारदारुभिः।
सस्नेहैः+जायते तद्वत्+आहारैः कोष्ठगः+अनलः॥79॥
नाभोजनेन कायाग्निः+दीप्यते न+अतिभोजनात्।
यथा निरिन्धनः+ वह्निः+अल्पः+ वा+अतीन्धनावृतः॥80॥
यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम्।
प्रवृद्धं वर्धयत्यग्निं तदा+असौ सानिलः+अनलः॥81॥
पक्त्वा+अन्नम्+आशु धातून्+च सर्वान्+ओजः+च सङ्क्षिपन्।
मारयेत्+स्यात्+स ना स्वस्थः+ भुक्ते जीर्णे तु ताम्यति॥82॥
तृट्कासदाहमूर्च्छाद्या व्याधयः+अत्यग्निसम्भवाः।
तम्+अत्यग्निं गुरुस्निग्धमन्दसान्द्रहिमस्थिरैः॥83॥
अन्नपानैः+नयेत्+शान्तिं दीप्तम्+अग्निम्+इव+अम्बुभिः।
मुहुः+मुहुः+अजीर्णे+अपि भोज्यानि+अस्य+उपहारयेत्॥84॥
निरिन्धनः+अन्तरं लब्ध्वा यथा+एनं न विपादयेत्।
कृशरां पायसं स्निग्धं पैष्टिकं गुडवैकृतम्॥85॥
अश्नीयात्+औदकानूपपिशितानि भृतानि च।
मत्सान् विशेषतः श्लक्ष्णान् स्थिरतोयचराः+च ये॥86॥
आविकं सुभृतं मांसमद्यात्+अत्यग्निवारणम्।
पयः सहमधूच्छिष्टं घृतं वा तृषितः पिबेत्॥87॥
गोधूमचूर्णं पयसा बहुसर्पिः परिप्लुतम्।
आनूपरसयुक्तान् वा स्नेहान्+तैलविवर्जितान्॥88॥
श्यामात्रिवृद्विपक्वं वा पयः+ दद्यात्+विरेचनम्।
असकृत्+पित्तहरणं पायसप्रतिभोजनम्॥89॥
यत्+किञ्चित्+गुरु मेद्यं च श्लेष्मकारि च भोजनम्।
सर्वं तत्+अत्यग्निहितं भुक्त्वा च स्वपनं दिवा॥90॥
आहारम्+अग्निः पचति दोषान्+आहारवर्जितः।
धातून् क्षीणेषु दोषेषु जीवितं धातुसङ्क्षये॥91॥
एतत्+प्रकृत्या+एव विरुद्धम्+अन्नं संयोगसंस्कारवशेन च+इदम्।
इति+आद्यविज्ञाय यथा+इष्टचेष्टाः+चरन्ति यत्+सा+अग्निबलस्य शक्तिः॥92॥

तस्मात्+अग्निं पालयेत्+सर्वयत्नैः+ तस्मिन्+नष्टे याति ना नाशम्+एव।
दोषैः+ग्रस्ते ग्रस्यते रोगसङ्घैः+युक्ते तु स्यात्+नीरुजः+ दीर्घजीवी॥93॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने
ग्रहणीदोषचिकित्सितं नाम दशमः+अध्यायः॥10॥
एकादशः+अध्यायाः।
अथ+अतः+ मूत्राघातचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
कृच्छ्रे वातघ्नतैलाक्तम्+अधोनाभेः समीरजे।
सुस्निग्धैः स्वेदयेत्+अङ्गं पिण्डसेकावगाहनैः॥1॥
दशमूलबलैः+अण्डयवाभीरुपुनर्नवैः।
कुलत्थकोलपत्तूरवृश्चीवोपलभेदकैः॥2॥
तैलसर्पिः+वराहर्क्षवसाः क्वथितकल्कितैः।
सपञ्चलवणाः सिद्धाः पीताः शूलहराः परम्॥3॥
द्रव्याणि+एतानि पानान्ने तथा पिण्डोपनाहने।
सह तैलफलैः+युञ्ज्यात्+साम्लानि स्नेहवन्ति च॥4॥
सौवर्चलाढ्यां मदिरां पिबेत्+मूत्ररूजापहाम्।
पैत्ते युञ्जीत शिशिरं सेकलेपावगाहनम्॥5॥
पिबेत्+वरीं गोक्षुरकं विदारीं सकसेरुकाम्।
तृणाख्यं पञ्चमूलं च पाक्यं समधुशर्करम्॥6॥
वृषकं त्रपुसैः+वारुलट्वाबीजानि कुङ्कुमम्।
द्राक्षाम्भोभिः पिबन् सर्वान् मूत्राघातान्+अपोहति॥7॥
एर्वारुबीजयष्ट्याह्वदार्वीः+वा तण्डुलाम्बुना।
तोयेन कल्कं द्राक्षायाः पिबेत्+पर्युषितेन वा॥8॥
कफजे वमनं स्वेदं तीक्ष्णोष्णकटुभोजनम्।
यवानां विकृतीः क्षारं कालशेयं च शीलयेत्॥9॥
पिबेत्+मद्येन सूक्ष्मैलां धात्रीफलरसेन वा।
सारसास्थिश्वदंष्ट्रैलाव्योषं वा मधुमूत्रवत्॥10॥
स्वरसं कण्टकार्या वा पाययेत्+माक्षिकान्वितम्।
शितिवारकबीजं वा तक्रेण श्लक्ष्णचूर्णितम्॥11॥
धवसप्ताह्वकुटजगुडूचीचतुरङ्गुलम्।
केम्बुकैलाकरञ्जं च पाक्यं समधु साधितम्॥12॥
तैः+वा पेयां प्रवालं वा चूर्णितं तण्डुलाम्बुना।

सतैलं पाटलाक्षारं सप्तकृत्त्वः+अथवा स्रुतम्॥13॥

पाटलीयावशूकाभ्यां पारिभद्रात्+तिलात्+अपि।

क्षारोदकेन मदिरां त्वगेलोषकसंयुताम्॥14॥

पिबेत्+गुडोपदंशान्+वा लिह्यात्+एतान् पृथक् पृथक्।

सन्निपातात्मके सर्वे यथावस्थम्+इदं हितम्॥15॥

अश्मनि+अपि+अचिरोत्थाने वातबस्त्यादिकेषु च।

अश्मरी दारुणः+ व्याधिः+अन्तकप्रतिमः+ मतः॥16॥

तरुणः+ भेषजैः साध्यः प्रवृद्धः+छेदम्+अर्हति।

तस्य पूर्वेषु रूपेषु स्नेहादिक्रम इष्यते॥17॥

पाषाणभेदः+ वसुकः+ वशिरः+अश्मन्तकः+ वरी।

कपोतवङ्कातिबलाभल्लूकोशीरकच्छकम्॥18॥

वृक्षादनी शाकफलं व्याघ्र्यौ गुण्ठः+त्रिकण्टकः।

यवाः कुलत्थाः कोलानि वरुणः कतकात्+फलम्॥19॥

ऊषकादिप्रतीवापम्+एषां क्वाथे शृतं घृतम्।

भिनत्ति वातसम्भूतां तत्+पीतं शीघ्रम्+अश्मरीम्॥20॥

गन्धर्वहस्तबृहतीव्याघ्रीगोक्षुरकेक्षुरात्।

मूलकल्कं पिबेत्+दध्ना मधुरेण+अश्मभेदनम्॥21॥

कुशः काशः शरः+ गुण्ठ इत्कटः+ मोरटः+अश्मभित्।

दर्भः+ विदारी वाराही शालिमूलं त्रिकण्टकः॥22॥

भल्लूकः पाटली पाठा पत्तूरः सकुरण्टकः।

पुनर्नवे शिरीषः+च तेषां क्वाथे पचेत्+धृतम्॥23॥

पिष्टेन त्रपुसादीनां बीजेन+इन्दीवरेण च।

मधुकेन शिलाजेन तत्+पित्ताश्मरिभेदनम्॥24॥

वरुणादिः समीरघ्नौ गणावेलाहरेणुका।

गुग्गुलुः+मरिचं कुष्ठं चित्रकः ससुराह्वयः॥25॥

तैः कल्कितैः कृतावापमूषकादिगणेन च।

भिनत्ति कफजाम्+आशु साधितं घृतम्+अश्मरीम्॥26॥

क्षारक्षीरयवाग्वादि द्रव्यैः स्वैः स्वैः+च कल्पयेत्।

पिचुकाङ्कोल्लकतकशाकेन्दीवरजैः फलैः॥27॥

पीतम्+उष्णाम्बु सगुडं शर्करापातनं परम्।

क्रौञ्चोष्ट्रासभास्थीनि श्वदंष्ट्रा तालपत्रिका॥28॥

अजमोदा कदम्बस्य मूलं विश्वस्य च+औषधम्।

पीतानि शर्करां भिन्द्युः सुरयोष्णोदकेन वा॥29॥
नृत्यकुण्डकबीजानां चूर्णं माक्षिकसंयुतम्।
अविक्षीरेण सप्ताहं पीतम्+अश्मरिपातनम्॥30॥
क्वाथः+च शिग्रुमूलोत्थः कदुष्णः+अश्मरिपातनः।
तिलापामार्गकदलीपलाशयवसम्भवः॥31॥
क्षारः पेयः+अविमूत्रेण शर्करासु+अश्मरीषु च।
कपोतवङ्कामूलं वा पिबेत्+एकं सुरादिभिः॥32॥
तत्+सिद्धं वा पिबेत्+क्षीरं वेदनाभिः+उपद्रुतः।
हरीतक्यस्थिसिद्धं वा साधितं वा पुनर्नवैः॥33॥
क्षीरान्नभुग्बर्हिशिखामूलं वा तण्डुलाम्बुना।
मूत्राघातेषु विभजेत्+अतः शेषेषु+अपि क्रियाम्॥34॥
बृहत्यादिगणे सिद्धं द्विगुणीकृतगोक्षुरे।
तोयं पयः+ वा सर्पिः+वा सर्वमूत्रविकारजित्॥35॥
देवदारुं घनं मूर्वां यष्टीमधु हरीतकीम्।
मूत्राघातेषु सर्वेषु सुराक्षीरजलैः पिबेत्॥36॥
रसं वा धन्वयासस्य कषायं ककुभस्य वा।
सुखाम्भसा वा त्रिफलां पिष्टां सैन्धवसंयुताम्॥37॥
व्याघ्रीगोक्षुरकक्वाथे यवागूं वा सफाणिताम्।
क्वाथे वीरतरादेः+वा ताम्रचूडरसे+अपि वा॥38॥
अद्यात्+वीरतरात्+येन भावितं वा शिलाजतुः।
मद्यं वा निगदं पीत्वा रथेन+अश्वेन वा व्रजेत्॥39॥
शीघ्रवेगेन सङ्क्षोभात्+तथा+अस्य च्यवते+अश्मरी।
सर्वथा च+उपयोक्तव्यः+ वर्गः+ वीरतरादिकः॥40॥
रेकार्थं तैल्वकं सर्पिः+बस्तिकर्म च शीलयेत्।
विशेषात्+उत्तरान् बस्तीन् शुक्राश्मर्यां तु शोधिते॥41॥
तैः+मूत्रमार्गे बलवान् शुक्राशयविशुद्धये।
पुमान् सुतृप्तः+ वृष्याणां मांसानां कुक्कुटस्य च॥42॥
कामं सकामाः सेवेत प्रमदा मददायिनी।
सिद्धैरुपक्रमैः+एभिः+न चेत्+शान्तिः+तदा भिषक्॥43॥
इति राजानम्+आपृच्छ्य शस्त्रं साधु+अवचारयेत्।
अक्रियायां ध्रुवः+ मृत्युः क्रियायां संशयः+ भवेत्॥44॥
निश्चितस्य+अपि वैद्यस्य बहुशः सिद्धकर्मणः।

अथ+आतुरम्+उपस्निग्धशुद्धम्+ईषत्+च कर्शितम्॥45॥
अभ्यक्तस्विन्नवपुषम्+अभुक्तं कृतमङ्गलम्।
आजानुफलकस्थस्य नरस्याङ्के व्यपाश्रितम्॥46॥
पूर्वेण कायेन+उत्तानं निषण्णं वस्त्रचुम्भले।
ततः+अस्य+आकुञ्चिते जानुकूर्परे वाससा दृढम्॥47॥
सहाश्रयमनुष्येण बद्धस्य+आश्वासितस्य च।
नाभेः समान्तात्+अभ्यज्यात्+अधः+तस्याः+च वामतः॥48॥
मृदित्वा मुष्टिना+आक्रामेत्+यावत्+अश्मर्यधोगता।
तैलाक्ते वर्धितनखे तर्जनीमध्यमे ततः॥49॥
अदक्षिणे गुदे+अङ्गुल्यौ प्रणिधायानुसेवनि।
आसाद्य बलयत्नाभ्याम्+अश्मरीं गुदमेढ्रयोः॥50॥
कृत्वा+अन्तरे तथा बस्तिं निर्वलीकम्+अनायतम्।
उत्पीडयेत्+अङ्गुलिभ्यां यावत्+ग्रन्थिः+इव+उन्नतम्॥51॥
शल्यं स्यात्+सेवनीं मुक्त्वा यवमात्रेण पाटयेत्।
अश्ममानेन न यथा भिद्यते सा तथा+आहरेत्॥52॥
समग्रं सर्पवक्त्रेण, स्त्रीणां बस्तिः+तु पार्श्वगः।
गर्भशयाश्रयः+तासां शस्त्रम्+उत्सङ्गवत्+ततः॥53॥
न्यसेत्+अतः+अन्यथा हि+आसां मूत्रस्रावी व्रणः+ भवेत्।
मूत्रप्रसेकक्षणनात्+नरस्य+अपि च+एकधा॥54॥
बस्तिभेदः+अश्मरीहेतुः सिद्धिं याति न तु द्विधा।
विशल्यम्+उष्णपानीयद्रोण्यां तम्+अवगाहयेत्॥55॥
तथा न पूर्यते+अस्रेण बस्तिः, पूर्णे तु पीडयेत्।
मेढ्रान्तः क्षीरिवृक्षाम्बु मूत्रसंशुद्धये ततः॥56॥
कुर्यात्+गुडस्य सौहित्यं मध्वाज्याक्तव्रणः पिबेत्।
द्वौ कालौ सघृतां कोष्णां यवागूं मूत्रशोधनैः॥47॥
त्र्यहं, दशाहं पयसा गुडाढ्येन+अल्पम्+ओदनम्।
भुञ्जीत+ऊर्ध्वं फलाम्लैः+च रसैः+जाङ्गलचारिणाम्॥48॥
क्षीरिवृक्षकषायेण व्रणं प्रक्षाल्य लेपयेत्।
प्रपौण्डरीकमञ्जिष्ठायष्ट्याह्वनयनौषधैः॥59॥
व्रणाभ्यङ्गे पचेत्+तैलम्+एभिः+एवं निशान्वितैः।
दशाहं स्वेदयेत्+च+एनं, स्वमार्गं सप्तरात्रतः॥60॥
मूत्रे त्वगच्छति दहेत्+अश्मरीव्रणम्+अग्निना।

स्वमार्गप्रतिपत्तौ तु स्वादुप्रायैः+उपाचरेत्॥60॥

तं बस्तिभिः न च+आरोहेत्+वर्षं रूढव्रणः+अपि सः।

नगनागाश्ववृक्षस्त्रीरथान्नाप्सु प्लवेत च॥62॥

मूत्रशक्रवहौ बस्तिवृषणौ सेवनीं गुदम्।

मूत्रप्रसेकं योनिं च शस्त्रेण+अष्टौ विवर्जयेत्॥63॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने

मूत्राघातचिकित्सितं नाम+एकादशः+अध्ययाः॥11॥

द्वादशः+अध्यायः।

अथ+अतः प्रमेहचिकित्सितं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

मेहिनः+ बलिनः कुर्यात्+आदौ वमनरेचने।

स्निग्धस्य सर्षपारिष्टनिकुम्भाक्षकरञ्जजैः॥1॥

तैलैः+त्रिकण्टकाद्येन यथास्वं साधितेन वा।

स्नेहेन मुस्तदेवाह्वनागरप्रतिवापवत्॥2॥

सुरसादिकषायेण दद्यात्+आस्थापनं ततः।

न्यग्रोधादेः+तु पित्तार्तं रसैः शुद्धं च तर्पयेत्॥3॥

मूत्रग्रहरुजागुल्मक्षयाद्याः+तु+अपतर्पणात्।

ततः+अनुबन्धरक्षार्थं शमनानि प्रयोजयेत्॥4॥

असंशोध्यस्य तानि+एव सर्वमेहेषु पाययेत्।

धात्रीरसप्लुतां प्राह्णे हरिद्रां माक्षिकान्विताम्॥5॥

दार्वीसुराह्वत्रिफलामुस्ता वा क्वथिता जले।

चित्रकत्रिफलादार्वीकलिङ्गान् वा समाक्षिकान्॥6॥

मधुयुक्तं गुडूच्या वा रसम्+आमलकस्य वा।

रोध्राभयातोयदकट्फलानां पाठाविडङ्गार्जुनधन्वनानाम्।

गायत्रिदार्वीकृमिहृद्धवानां कफे त्रयः क्षौद्रयुताः कषायाः॥7॥

उशीररोध्रार्जुनचन्दनानां पटोलनिम्बामलकामृतानाम्।

रोध्राम्बुकालीयकधातकीनां पित्ते त्रयः क्षौद्रयुताः कषायाः॥8॥

यथास्वम्+एभिः पानान्नं यवगोधूमभावनाः॥9॥

वातोल्बणेषु स्नेहान्+च प्रमेहेषु प्रकल्पयेत्।

अपूपसक्तुवाट्यादिः+यवानां विकृतिः+हिता॥10॥

गजाश्वगुदमुक्तानाम्+अथवा वेणुजन्मनाम्।

तृणधान्यानि मुद्गाद्याः शालिः+जीर्णः सषष्टिकः॥11॥

श्रीकुक्कुटः+अम्लः खलकः+तिलसर्षपकिट्टजः।
कपित्थं तिन्दुकं जम्बुः+तत्+कृता रागषाडवाः॥12॥
तिक्तं शाकं मधु श्रेष्ठा भक्ष्याः शुष्काः ससक्तवः।
धन्वमांसानि शूल्यानि परिशुष्काणि+अयस्कृतिः॥13॥
मध्वरिष्टासवा जीर्णाः सीधुः पक्वारसोद्भवः।
तथा+असनादिसाराम्बु दर्भाम्भः+ माक्षिकोदकम्॥14॥
वासितेषु वराक्वाथे शर्वरीं शोषितेषु+अहः।
यवेषु सुकृतान् सक्तून् सक्षौद्रान् सीधुना पिबेत्॥15॥
शालसप्ताह्वकम्पिल्लवृक्षकाक्षकपित्थजम्।
रोहीतकं त कुसुमं मधुना+अद्यात्+सुचूर्णितम्॥16॥
कफपित्तप्रमेहेषु पिबेत्+धात्रीरसेन वा।
त्रिकण्टकनिशारोध्रसोमवल्कवचार्जुनैः॥17॥
पद्मकाश्मन्तकारिष्टचन्दनागुरुदीप्यकैः।
पटोलमुस्तमञ्जिष्ठामाद्रीभल्लातकैः पचेत्॥18॥
तैलं वातकफे पित्ते घृतं मिश्रेषु मिश्रकम्।
दशमूलशठीदन्तीसुराह्वं द्विपुनर्नवम्॥19॥
मूलं स्नुगर्कयोः पथ्यां भूकदम्बम्+अरुष्करम्।
करञ्जौ वरुणात्+मूलं पिप्पल्याः पौष्करं च यत्॥20॥
पृथक्+ दशपलं प्रस्थान् यवकोलकुलत्थतः।
त्रीन्+च+अष्टगुणिते तोये विपचेत्+पादवर्तिना॥21॥
तेन द्विपिप्पलीचव्यवचानिचुलरोहिषैः।
त्रिवृद्विडङ्गकम्पिल्लभार्गीविश्वैः+च साधयेत्॥22॥
प्रस्थं घृतात्+जयेत्+सर्वान्+तत्+मेहान् पिटिका विषम्।
पाण्डुविद्रधिगुल्मार्शः शोषशोफगरोदरम्॥23॥
श्वासं कासं वमिं वृद्धिं प्लीहानं वातशोणितम्।
कुष्ठोन्मादौ+अपस्मारं धान्वन्तरम्+इदं घृतम्॥24॥
रोध्रमूर्वाशठीवेल्लभार्गीनतनखप्लवान्।
कलिङ्गकुष्ठक्रमुकप्रियङ्ग्वतिविषाग्निकान्॥25॥
द्वे विशाले चतुर्जातं भूनिम्बं कटुरोहिणीम्।
यवानीं पौष्करं पाठां ग्रन्थिं चव्यं फलत्रयम्॥26॥
कर्षांशम्+अम्बुकलशे पादशेषे स्रुते हिमे।
द्वौ प्रस्थौ माक्षिकात्+क्षिप्त्वा रक्षेत्+पक्षम्+उपेक्षया॥27॥

रोध्रासवः+अयं मेहार्शःश्वित्रकुष्ठारुचिकृमीन्।
पाण्डुत्वं ग्रहणीदोषं स्थूलतां च नियच्छति॥28॥
साधयेत्+असनादीनां पलानां विंशतिं पृथक्।
द्विवहे+अपां क्षिपेत्+तत्र पादस्थे द्वे शते गुडात्॥29॥
क्षौद्राढकार्धं पलिकं वत्सकादिं च कल्कितम्।
तत्+क्षौद्रपिप्पलीचूर्णप्रदिग्धे घृतभाजने॥30॥
स्थितं दृढे जतुसृते यवराशौ निधापयेत्।
खदिराङ्गारतप्तानि बहुशः+अत्र निमज्जयेत्॥31॥
तनूनि तीक्ष्णलोहस्य पत्राणि+आलोहसङ्क्षयात्।
अयस्कृतिः स्थिता पीता पूर्वस्मात्+अधिका गुणैः॥32॥
रूक्षम्+उद्वर्तनं गाढं व्यायामः+ निशि जागरः।
यत्+च+अन्यच्छ्लेष्ममेदोघ्नं बहिः+अन्तः+च तत्+हितम्॥33॥
सुभावितां सारजलैः+तुलां पीत्वा शिलोद्भवात्।
साराम्बुना+एव भुञ्जानः शालीन् जाङ्गलजै रसैः॥34॥
सर्वान्+अभिभवेत्+मेहान् सुबहूपद्रवान्+अपि।
गण्डमालार्बुदग्रन्थिस्थौल्यकुष्ठभगन्दरान्॥35॥
कृमिश्लीपदशोफान्+च परं च+एतत्+रसायनम्।
अधनश्छत्रपादत्ररहितः+ मुनिवर्तनः॥36॥
योजनानां शतं यायात्+खनेत्+वा सलिलाशयान्।
गोशकृन्मूत्रवृत्तिः+वा गोभिः+एव सह भ्रमेत्॥37॥
बृंहयेत्+औषधाहारैः+अमेदोमूत्रलैः कृशम्।
शराविकाद्याः पिटिकाः शोफवत्+समुपाचरेत्॥38॥
अपक्वा व्रणवत्+पक्वाः तासां प्राग्रूपः+ एव च।
क्षीरिवृक्षाम्बु पानाय बस्तमूत्रं च शस्यते॥39॥
तीक्ष्णं च शोधनं, प्रायः+ दुर्विरेच्या हि मेहिनः।
तैलम्+एलादिना कुर्यात्+गणेन व्रणरोपणम्॥40॥
उद्वर्तने कषायं तु वर्गेण+आरग्वधादिना।
परिषेकः+असनात्+येन पानान्ने वत्सकादिना॥41॥
पाठाचित्रकशार्ङ्गेष्टासारिवाकण्टकारिकाः।
सप्ताह्वं कौटजं मूलं सोमवल्कं नृपद्रुमम्॥42॥
सञ्चूर्ण्य मधुना लिह्यात्+तद्वत्+चूर्णं नवायसम्।
मधुमेहित्वम्+आपन्नः+ भिषग्भिः परिवर्जितः॥43॥

शिलाजतुतुलामद्यात्+प्रमेहार्तः पुनर्नवः॥43 1/2 ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटवरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने प्रमेहचिकित्सितं नाम द्वादशः+अध्यायः॥12॥

त्रयोदशः +अध्ययाः।

अथ+अतः विद्रधिवृद्धिचिकित्सितं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

विद्रधिं सर्वम्+एव+आमं शोफवत्+समुपाचरेत्।

प्रततं च हरेत्+रक्तं पक्वे तु व्रणवत्+क्रिया॥1॥

पञ्चमूलजलैः+धौतं वातिकं लवणोत्तरैः।

भद्रादिवर्गयष्ट्याह्वतिलैः+आलेपयेत्+व्रणम्॥2॥

वैरेचनिकयुक्तेन त्रैवृतेन विशोध्य च।

विदारीवर्गसिद्धेन त्रैवृतेन+एव रोपयेत्॥3॥

क्षालितं क्षीरितोयेन लिम्पेत्+यष्ट्यमृतातिलैः।

पैत्तं घृतेन सिद्धेन मञ्जिष्ठोशीरपद्मकैः॥4॥

पयस्यात्+विनिशाश्रेष्ठायष्टीदुग्धैः+च रोपयेत्।

न्यग्रोधादिप्रवालत्वक्फलैः+वा कफजं पुनः॥5॥

आरग्वधादिना धौतं सक्तुकुम्भनिशातिलैः।

लिम्पेत्+कुलत्थिकादन्तीत्रिवृच्छ्यामाग्नितिल्वकैः॥6॥

ससैन्धवैः सगोमूत्रैः+तैलं कुर्वीत रोपणम्।

रक्तागन्तूद्भवे कार्या पित्तविद्रधिवत्+क्रिया॥7॥

वरुणादिगणक्वाथमपक्वे+अभ्यन्तरोत्थिते।

ऊषकादिप्रतीवापं पूर्वाह्णे विद्रधौ पिबेत्॥8॥

घृतं विरेचनद्रव्यैः सिद्धं ताभ्यां च पाययेत्।

निरूहं स्नेहबस्तिं च ताभ्याम्+एव प्रकल्पयेत्॥9॥

पानभोजनलेपेषु मधुशिग्रुः प्रयोजितः।

दत्तावापः+ यथादोषम्+अपक्वं हन्ति विद्रधिम्॥10॥

त्रायन्तीत्रिफलानिम्बकटुकामधुकं समम्।

त्रिवृत्पटोलमूलाभ्यां चत्वारो+अंशाः पृथक् पृथक्॥11॥

मसूरात्+निस्तुषात्+अष्टौ तत्+क्वाथः सघृतः+ जयेत्।

विद्रधीगुल्मवीसर्पदाहमोहमदज्वरान्॥12॥

तृण्मूर्च्छाच्छर्दिहृद्रोगपित्तासृक्कुष्ठकामलाः।

कुडवं त्रायमाणायाः साध्यम्+अष्टगुणे+अम्भसि॥13॥

कुडवं तत्+रसात्+धात्रीस्वरसात्+क्षीरतः+ घृतात्।
कर्षांशं कल्कितं तिक्तात्रायन्तीधन्वयासकम्॥14॥
मुस्तातामलकीवीराजीवन्तीचन्दनोत्पलम्।
पचेत्+एकत्र संयोज्य तत्+घृतं पूर्ववद्गुणैः॥15॥
द्राक्षा मधूकं खर्जूरं विदारी सशतावरी।
परूषकाणि त्रिफला तत्+क्वाथे पाचयेत्+घृतम्॥16॥
क्षीरेक्षुधात्रीनिर्यासप्राणदाकल्कसंयुतम्।
तत्+शीतं शर्कराक्षौद्रपादिकं पूर्ववद्गुणैः॥17॥
हरेत्+शृङ्गादिभिः+असृक् सिरया वा यथान्तिकम्।
विद्रधिं पच्यमानं च कोष्ठस्थं बहिः+उन्नतम्॥18॥
ज्ञात्वा+उपनाहयेत् शूले स्थिते तत्र+एव पिण्डिते।
तत्+पार्श्वपीडनात्+सुप्तौ दाहादिषु+अल्पकेषु च॥19॥
पक्वः स्यात्+विद्रधिं भित्त्वा व्रणवत्+तम्+उपाचरेत्।
अन्तर्भागस्य च+अपि+एतत्+चिह्नं पक्वस्य विद्रधेः॥20॥
पक्वः स्रोतांसि सम्पूर्य सः+ याति+ऊर्ध्वम्+अधः+अथवा।
स्वयं प्रवृत्तं तं दोषम्+उपेक्षेत हिताशिनः॥21॥
दशाहं द्वादशाहं वा रक्षन् भिषक्+उपद्रवान्।
असम्यक्+वहति क्लेदे वरुणादिं सुखाम्भसा॥22॥
पाययेत्+मधुशिग्रुं वा यवागूं तेन वा कृताम्।
यवकोलकुलत्थोत्थयूषैः+अन्नं च शस्यते॥23॥
ऊर्ध्वं दशाहात्+त्रायन्तीसर्पिषा तैल्वकेन वा।
शोधयेत्+बलतः, शुद्धः सक्षौद्रं तिक्तकं पिबेत्॥24॥
सर्वशः+ गुल्मवत्+च+एनं यथादोषम्+उपाचरेत्।
सर्वावस्थासु सर्वासु गुग्गुलुं विद्रधीषु च॥25॥
कषायैः+यौगिकैः+युञ्ज्यात्+स्वैःस्वैः+तद्वत्+शिलाजतु।
पाकं च वारयेत्+यत्नात्+सिद्धिः पक्वे हि दैविकी॥26॥
अपि च+आशु विदाहित्वात्+विद्रधिः सः+अभिधीयते।
सति च+आलोचयेत्+मेहे प्रमेहाणां चिकित्सितम्॥27॥
स्तनजे व्रणवत्+सर्वं न तु+एनम्+उपनाहयेत्।
पाटयेत्+पालयन् स्तन्यवाहिनीः कृष्णचूचुकौ॥28॥
सर्वास्वामाद्यवस्थासु निर्दुहीत च तत्+स्तनम्।
शोधयेत्+त्रिवृता स्निग्धं वृद्धौ स्नेहैः+चलात्मके॥29॥

कौशाम्रतिल्वकैः+अण्डसुकुमारकमिश्रकैः।
ततः+अनिलघ्ननिर्यूहकल्कस्नेहैः+निरूहयेत्॥30॥
रसेन भोजितं यष्टितैलेन+अन्वासयेत्+अनु।
स्वेदप्रलेपा वातघ्नाः पक्वे भित्त्वा व्रणक्रियाम्॥31॥
पित्तरक्तोद्भवे वृद्धौ+आमपक्वे यथायथम्।
शोफव्रणक्रियां कुर्यात् प्रततं च हरेत्+असृक्॥32॥
गोमूत्रेण पिबेत्+कल्कं श्लैष्मिके पीतदारुजम्।
विम्लापनात्+ऋते च+अस्य श्लेष्मग्रन्थिक्रमः+ हितः॥33॥
पक्वे च पाटिते तैलम्+इष्यते व्रणशोधनम्।
सुमनोरुष्कराङ्कोल्लसप्तपर्णेषु साधितम्॥34॥
पटोलनिम्बरजनीविडङ्गकुटजेषु च।
मेदोजं मूत्रपिष्टेन सुस्विन्नं सुरसादिना॥35॥
शिरोविरेकद्रव्यैः+वा वर्जयन् फलसेवनीम्।
दारयेत्+वृद्धिपत्रेण सम्यक्+भेदसि सूद्धृते॥36॥
व्रणं माक्षिककासीससैन्धवप्रतिसारितम्।
सीव्येत्+अभ्यञ्जनं च+अस्य योज्यं मेदोविशुद्धये॥37॥
मनःशिलैलासुमनोग्रन्थिभल्लातकैः कृतम्।
तैलम्+आव्रणसन्धानात्+स्नेहस्वेदौ च शीलयेत्॥38॥
मूत्रजं स्वेदितं स्निग्धैः+वस्त्रपट्टेन वेष्टितम्।
विध्येत्+अधस्तात्+सेवन्याः स्रावयेत्+च यथा+उदरम्॥39॥
व्रणं च स्थगिकाबद्धं रोपयेत् अन्त्रहेतुके।
फलकोशम्+असम्प्राप्ते चिकित्सा वातवृद्धिवत्॥40॥
पचेत्+पुनः+नवतुलां तथा दशपलाः पृथक्।
दशमूलपयस्याश्वगन्धैः+अण्डशतावरीः॥41॥
द्विदर्भशरकाशेक्षुमूलपोटगलान्विताः।
वहे+अपाम्+अष्टभागस्थे तत्र त्रिंशत्पलं गुडात्॥42॥
प्रस्थम्+एरण्डतैलस्य द्वौ घृतात्+पयसः+तथा।
आवपेत्+ द्विपलांशं च कृष्णातन्मूलसैन्धवम्॥43॥
यष्टीमधु(चित्र)कमृद्वीकायवानीनागराणि च(क्षारनागरम्)।
तत्+सिद्धं सुकुमाराख्यं सुकुमारं रसायनम्॥44॥
वातातपाध्वयानादिपरिहार्येषु+अयन्त्रणम्।
प्रयोज्यं सुकुमाराणाम्+ईश्वराणां सुखात्मनाम्॥45॥

नृणां स्त्रीवृन्दभर्तॄणाम्+अलक्ष्मीकलिनाशनम्।
सर्वकालोपयोगेन कान्तिलावण्यपुष्टिदम्॥46॥
वर्ध्मविद्रधिगुल्मार्शोयोनिमेढ्रानिलार्तिषु।
शोफोदरखुडप्लीहविड्विबन्धेषु च+उत्तमम्॥47॥
यायात्+वर्ध्म न चेत्+शान्तिं स्नेहरेकानुवासनैः।
बस्तिकर्म पुरः कृत्वा वङ्क्षणस्थं ततः+ दहेत्॥48॥
अग्निना मार्गरोधार्थं मरुतः अर्धेन्दुवक्रया।
अङ्गुष्ठस्य+उपरि स्नाव पीतं तन्तुसमं च यत्॥49॥
उत्क्षिप्य सूच्या तत्+तिर्यगक्+दहेत्+छित्त्वा यतः+ गदः।
ततः+अन्यपार्श्वे+अन्ये तु+आहुः+दहेत्+वा+अनामिकाङ्गुलेः॥50॥
गुल्मे+अन्यैः+वातकफजे प्लीह्नि च+अयं विधिः स्मृतः।
कनिष्ठिकानामिकयोः+विश्वाच्यां च यतः+ गदः॥51॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने
विद्रधिवृद्धिचिकित्सितं नाम त्रयोदशः+अध्यायः॥13॥
चतुर्दशः+अध्यायः।
अथ+अतः+ गुल्मचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
गुल्मं बद्धशकृद्वातं वातिकं तीव्रवेदनम्।
रूक्षशीतोद्भवं तैलैः सादयेत्+वातरोगिकैः॥1॥
पानान्नान्वासनाभ्यङ्गैः स्निग्धस्य स्वेदम्+आचरेत्।
आनाहवेदनास्तम्भविबन्धेषु विशेषतः॥2॥
स्रोतसां मार्दवं कृत्वा जित्वा मारुतम्+उल्बणम्।
भित्त्वा विबन्धं स्निग्धस्य स्वेदः+ गुल्मम्+अपोहति॥3॥
स्नेहपानं हितं गुल्मे विशेषेण+ऊर्ध्वनाभिजे।
पक्वाशयगते बस्तिः+उभयं जठराश्रये॥4॥
दीप्ते+अग्नौ वातिके गुल्मे विबन्धे+अनिलवर्चसोः।
बृंहणानि+अन्नपानानि स्निग्धोष्णानि प्रदापयेत्॥5॥
पुनःपुनः स्नेहपानं निरूहाः सानुवासनाः।
प्रयोज्या वातजे गुल्मे कफपित्तानुरक्षिणः॥6॥
बस्तिकर्म परं विद्यात्+गुल्मघ्नं, तत्+हि मारुतम्।
स्वस्थाने प्रथमं जित्वा सद्यः+ गुल्मम्+अपोहति॥7॥
तस्मात्+अभीक्ष्णशः+ गुल्मा निरूहैः सानुवासनैः।

प्रयुज्यमानैः शाम्यन्ति वातपित्तकफात्मकाः॥8॥
हिङ्गुसौवर्चलव्योषबिडदाडिमदीप्यकैः।
पुष्कराजाजिधान्याम्लवेतसक्षारचित्रकैः॥9॥
शठीवचाजगन्धैलासुरसैः+दधिसंयुतैः।
शूलानहहरं सर्पिः सादयेत्+वातगुल्मिनाम्॥10॥
हपुषोषणपृथ्वीकापञ्चकोलकदीप्यकैः।
साजाजीसैन्धवैः+दध्ना दुग्धेन च रसेन च॥11॥
दाडिमात्+मूलकात्+कोलात्+पचेत्+सर्पिः+निहन्ति तत्।
वातगुल्मोदरानाहपार्श्वहृत्कोष्ठवेदनाः॥12॥
योन्यर्शोग्रहणीदोषकासश्वासारुचिज्वरान्।
दशमूलं बलां कालां सुषवीं द्वौ पुनर्नवौ॥13॥
पौष्करैः+अण्डरास्नाश्वगन्धाभार्ग्यमृताशठीः।
पचेत्+गन्धपलाशं च द्रोणे+अपां द्विपलोन्मितम्॥14॥
यवैः कोलैः कुलत्थैः+च माषैः+च प्रास्थिकैः सह।
क्वाथे+अस्मिन्+दधिपात्रे च घृतप्रस्थं विपाचयेत्॥15॥
स्वरसैः+दाडिमाम्रातमातुलुङ्गोद्भवैः+युतम्।
तथा तुषाम्बुधान्याम्लशुक्तैः श्लेक्ष्णैः+च कल्कितैः॥16॥
भार्गीतुम्बुरुषड्ग्रन्थाग्रन्थिरास्नाग्निधान्यकैः।
यवानकयवान्यम्लवेतसासितजीरकैः॥17॥
अजाजीहिङ्गुहपुषाकारवीवृषकोषकैः।
निकुम्भकुम्भमूर्वेभपिप्पलीवेल्लदाडिमैः॥18॥
श्वदंष्ट्रात्रपुसैर्वारुबीजहिंस्राश्मभेदकैः।
मिसिद्विक्षारसुरससारिवानीलिनीफलैः॥19॥
त्रिकटुत्रिपटूपेतैः+दाधिकं तत्+व्यपोहति।
रोगान्+आशुतरान् पूर्वान् कष्टान्+अपि च शीलितम्॥20॥
अपस्मारगदोन्मादमूत्राघातानिलामयान्।
त्र्यूषणत्रिफलाधान्यचविकावेल्लचित्रकैः॥21॥
कल्कीकृतैः+घृतं पक्वं सक्षीरं वातगुल्मनुत्।
तुलां लशुनकन्दानां पृथक्+पञ्चपलांशकम्॥22॥
पञ्चमूलं महत्+च+अम्बुभारार्धे तत्+विपाचयेत्।
पादशेषं तत्+अर्धेन दाडिमस्वरसं सुराम्॥23॥
धान्याम्लं दधि च+आदाय पिष्टान्+च+अर्धपलांशकान्।

त्र्यूषणत्रिफलाहिङ्गुयवानीचव्यदीप्यकान्॥24॥
साम्लवेतससिन्धूत्थदेवदारून् पचेत्+घृतात्।
तैः प्रस्थं तत्परं सर्ववातगुल्मविकारजित्॥25॥
षट्पलं वा पिबेत् सर्पिः+यदुक्तं राजयक्ष्मणि।
प्रसन्नया वा क्षीरार्थः सुरया दाडिमेन वा॥26॥
घृते मारुतगुल्मघ्नः कार्यः+ दध्नः सरेण वा।
वातगुल्मे कफः+ वृद्धः+ हत्वा+अग्निम्++अरुचिं यदि॥27॥
हृल्लासं गौरवं तन्द्रां जनयेत्+उल्लिखेत्+तु तम्।
शूलानाहविबन्धेषु ज्ञात्वा सस्नेहम्+आशयम्॥28॥
निर्यूहचूर्णवटकाः प्रयोज्या घृतभेषजैः।
कोलदाडिमघर्माम्बुतक्रमद्याम्लकाञ्जिकैः॥29॥
मण्डेन वा पिबेत्+प्रातः+चूर्णानि+अन्नस्य वा पुरः।
चूर्णानि मातुलुङ्गस्य भावितानि+असकृत्+रसे॥30॥
कुर्वीत कार्मुकतरान् वटकान् कफवातयोः।
हिङ्गुवचाविजयापशुगन्धादाडिमदीप्यकधान्यकपाठाः।
पुष्करमूलशठीहपुषाग्निक्षारयुगत्रिपटुत्रिकटूनि॥31॥
साजाजिचव्यं सहतित्तिडीकं सवेतसाम्लं विनिहन्ति चूर्णम्।
हृत्पार्श्वबस्तित्रिकयोनिपायुशूलानि वाय्वामकफोद्भवानि॥32॥
कृच्छ्रान् गुल्मान् वातविण्मूत्रसङ्गं कण्ठे बन्धं हृद्ग्रहं पाण्डुरोगम्।
अन्नाश्रद्धाप्लीहदुर्नामहिध्मावर्ध्माध्मानश्वासकासाग्निसादान्॥33॥
लवणयवानीदीप्यककणनागरम्+उत्तरोत्तरं वृद्धम्।
सर्वसमांशहरीतकीचूर्णं वैश्वानरः साक्षात्॥34॥
त्रिकटुकम्+अजमोदा सैन्धवं जीरके द्वे समधरणधृतानाम्+अष्टमः+ हिङ्गुभागः।
प्रथमकवलभोज्यः सर्पिषा संप्रयुक्तो जनयति जठराग्निं वातगुल्मं निहन्ति॥35॥
हिङ्गूग्राबिडशुण्ठ्यजाजिविजयावाट्याभिधानामयैः+चूर्णः कुम्भनिकुम्भमूलसहितैः+भागोत्तरं वर्धितैः।
पीतः कोष्णजलेन कोष्ठजरुजः+ गुल्मोदरादीन्+अयं शार्दूलः प्रसभं प्रमथ्य हरति व्याधीन् मृगौघानिव॥36॥
सिन्धूत्थपथ्याकणदीप्यकानां चूर्णानि तोयैः पिबतां कवोष्णैः।
प्रयाति नाशं कफवातजन्मा नाराचनिर्भिन्नः+ इव+आमयौघः॥37॥
पूतीकपत्रगजचिर्भटचव्यवह्निव्योषं च संस्तरचितं लवणोपधानम्।
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं गुल्मोदरश्वयथुपाण्डुगुदोद्भवेषु॥38॥
हिङ्गुत्रिगुणं सैन्धवम्+अस्मात्+त्रिगुणं च तैलमैः+अण्डम्॥39॥
तत्+त्रिगुणरसोनरसं गुल्मोदरवर्ध्मशूलघ्नम्।

मातुलुङ्गरसः+ हिङ्गु दाडिमं बिडसैन्धवम्॥40॥
सुरामण्डेन पातव्यं वातगुल्मरुजापहम्।
शुण्ठ्याः कर्षं गुडस्य द्वौ धौतात्+कृष्णतिलात्+पलम्॥41॥
खादन्+एकत्र सञ्चूर्ण्य कोष्णक्षीरानुपः+ जयेत्।
वातहृद्रोगगुल्मार्शोयोनिशूलशकृद्ग्रहान्॥42॥
पिबेत्+एरण्डतैलं तु वातगुल्मी प्रसन्नया।
श्लेष्मणि+अनुबले वायौ, पित्ते तु पयसा सह॥43॥
विवृद्धं यदि वा पित्तं सन्तापं वातगुल्मिनः।
कुर्यात्+विरेचनीयः+असौ सस्नेहैः+अनुलोमिकैः॥44॥
तापानुवृत्तौ+एवं च रक्तं तस्य+अवसेचयेत्।
साधयेत्+शुद्धशुष्कस्य लशुनस्य चतुष्पलम्॥45॥
क्षीरोदके+अष्टगुणिते क्षीरशेषं च पाचयेत्।
वातगुल्मम्+उदावर्तं गृध्रसीं विषमज्वरम्॥46॥
हृद्रोगं विद्रधिं शोषं साधयति+आशु तत्+पयः।
तैलं प्रसन्नां गोमूत्रम्+आरनालं यवाग्रजः॥47॥
गुल्मं जठरम्+आनाहं पीतम्+एकत्र साधयेत्।
चित्रकग्रन्थिकैः+अण्डशुण्ठीक्वाथः परं हितः॥48॥
शूलानाहविबन्धेषु सहिङ्गुबिडसैन्धवः।
पुष्कररैण्डयोः+मूलं यवधन्वयवासकम्॥49॥
जलेन क्वथितं पीतं कोष्ठदाहरुजापहम्।
वाट्याह्वैः+अण्डदर्भाणां मूलं दारु महौषधम्॥50॥
पीतं निःक्वाथ्य तोयेन कोष्ठपृष्ठांसशूलजित्।
शिलाजं पयसा+अनल्पपञ्चमूलशृतेन वा॥51॥
वातगुल्मी पिबेत् वाट्यम्+उदावर्ते तु भोजयेत्।
स्निग्धं पैप्पलिकैः+यूषैः+मूलकानां रसेन वा॥52॥
बद्धविण्मारुतः+अश्नीयात्+क्षीरेण+उष्णेन यावकम्।
कुल्माषान् वा बहुस्नेहान् भक्षयेत्+लवणोत्तरान्॥53॥
नीलिनीत्रिवृतादन्तीपथ्याकम्पिल्लकैः सह।
समलाय घृतं देयं सबिडक्षारनागरम्॥54॥
नीलिनीं त्रिफलां रास्नां बलां कटुकरोहिणीम्।
पचेत्+विडङ्गं व्याघ्रीं च पालिकानि जलाढके॥55॥
रसे+अष्टभागशेषे तु घृतप्रस्थं विपाचयेत्।

दध्नः प्रस्थेन संयोज्य सुधाक्षीरपलेन च॥56॥

ततः+ घृतपलं दद्यात्+यवागूमण्डमिश्रितम्।

जीर्णे सम्यक्+विरिक्तं च भोजयेत्+रसभोजनम्॥57॥

गुल्मकुष्ठोदरव्यङ्गशोफपाण्ड्वामयज्वरान्।

श्वित्रं प्लीहानम्+उन्मादं हन्ति+एतत्+नीलिनीघृतम्॥58॥

कुक्कुटाः+च मयूराः+च तित्तिरिक्रौञ्चवर्तकाः।

शालयः+ मदिरा सर्पिः+वातगुल्मचिकित्सितम्॥59॥

मितम्+उष्णं द्रवं स्निग्धं भोजनं वातगुल्मिनाम्।

समण्डा वारुणी पानं तप्तं वा धान्यकैः+जलम्॥60॥

स्निग्धोष्णेन+उदिते गुल्मे पैत्तिके स्रंसनं हितम्।

द्राक्षाभयागुडरसं कम्पिल्लं वा मधुद्रुतम्॥61॥

कल्पोक्तं रक्तपित्तोक्तं गुल्मे रूक्षोष्णजे पुनः।

परं संशमनं सर्पिः+तिक्तं वासाघृतं श्रृतम्॥62॥

तृणाख्यपञ्चकक्वाथे जीवनीयगणेन वा।

श्रृतं तेन+एव वा क्षीरं न्यग्रोधादिगणेन वा॥63॥

तत्र+अपि स्रंसनं युञ्ज्यात्+शीघ्रम्+आत्ययिके भिषक्।

वैरेचनिकसिद्धेन सर्पिषा पयसा+अपि वा॥64॥

रसेन+आमलकेक्षूणां घृतप्रस्थं विपाचयेत्।

पथ्यापादं पिबेत्+सर्पिः+तत्+सिद्धं पित्तगुल्मनुत्॥65॥

पिबेत्+वा तैल्वकं सर्पिः+यत्+च+उक्तं पित्तविद्रधौ।

द्राक्षां पयस्यां मधुकं चन्दनं पद्मकं मधु॥66॥

पिबेत्+तण्डुलतोयेन पित्तगुल्मोपशान्तये।

द्विपलं त्रायमाणाया जलत्+विप्रस्थसाधितम्॥67॥

अष्टभागस्थितं पूतं कोष्णं क्षीरसमं पिबेत्।

पिबेत्+उपरि तस्य+उष्णं क्षीरम्+एव यथाबलम्॥68॥

तेन निर्हृतदोषस्य गुल्मः शाम्यति पैत्तिकः।

दाहे+अभ्यङ्गः+ घृतैः शीतैः साज्यैः+लेपः+ हिमौषधैः॥39॥

स्पर्शः सरोरुहां पत्रैः पात्रैः+च प्रचलत्+जलैः।

विदाहपूर्वरूपेषु शूले वह्नेः+च मार्दवे॥70॥

बहुशः+अपहरेत्+रक्तं पित्तगुल्मे विशेषतः।

छिन्नमूला विदह्यन्ते न गुल्मा यान्ति च क्षयम्॥71॥

रक्तं हि व्यम्लतां याति, तत्+च न+अस्ति न च+अस्ति रुक्।

हृतदोषं परिम्लानं जाङ्गलैः+तर्पितं रसैः॥72॥
समाश्वस्तं सशेषार्तिं सर्पिः+अभ्यासयेत्+पुनः।
रक्तपित्तातिवृद्धत्वात्+क्रियाम्+अनुपलभ्य वा॥73॥
गुल्मे पाकोन्मुखे सर्वा पित्तविद्रधिवत्+क्रिया।
शालिः+गव्याजपयसी पटोली जाङ्गलं घृतम्॥74॥
धात्री परूषकं द्राक्षा खर्जूरं दाडिमं सिता।
भोज्यं, पाने+अम्बु बलया बृहत्याद्यैः+च साधितम्॥75॥
श्लेष्मजे वामयेत्+पूर्वम्+अवम्यम्+उपवासयेत्।
तिक्तोष्णकटुसंसर्ग्या वह्निं सन्धुक्षयेत्+ततः॥76॥
हिङ्ग्वादिभिः+च द्विगुणक्षारहिङ्ग्वम्लवेतसैः।
निगूढं यदि वा+उन्नद्धं स्तिमितं कठिनं स्थिरम्॥77॥
आनाहादियुतं गुल्म संस्वेद्यं विनयेत्+अनु।
घृतं सक्षारकटुकं पातव्यं कफगुल्मिनाम्॥78॥
सव्योषक्षारलवणं सहिङ्गुबिडदाडिमम्।
कफगुल्मं जयति+आशु दशमूलशृतं घृतम्॥79॥
भल्लातकानां द्विपलं पञ्चमूलं पलोन्मितम्।
अल्पं तोयाढके साध्यं पादशेषेण तेन च॥80॥
तुल्यं घृतं तुल्यपयः+ विपचेत्+अक्षसम्मितैः।
विडङ्गहिङ्गुसिन्धूत्थयावशूकशठीबिडैः॥81॥
सद्वीपिरास्नायष्ट्याह्वषड्ग्रन्थाकणनागरैः।
एतत्+भल्लातकघृतं कफगुल्महरं परम्॥82॥
प्लीहपाण्ड्वामयश्वासग्रहणीरोगकासजित्।
ततः+अस्य गुल्मे देहे च समस्ते स्वेदम्+आचरेत्॥83॥
सर्वत्र गुल्मे प्रथमं स्नेहस्वेदोपपादिते।
या क्रिया क्रियते याति सा सिद्धिं न विरूक्षिते॥84॥
स्निग्धस्विन्नशरीरस्य गुल्मे शैथिल्यम्+आगते।
यथा+उक्तां घटिकां न्यस्येत्+गृहीते+अपनयेत्+च ताम्॥85॥
वस्त्रान्तरं ततः कृत्वा छिन्द्यात्+गुल्मं प्रमाणवित्।
विमार्गाजपदादर्शैः+यथालाभं प्रपीडयेत्॥86॥
प्रमृज्यात्+गुल्मम्+एव+एकं न तु+अन्त्रहृदयं स्पृशेत्।
तिलैः+अण्डातसीबीजसर्षपैः परिलिप्य च॥87॥
श्लेष्मगुल्मम्+अयस्पात्रैः सुखोष्णैः स्वेदयेत्+ततः।

एवं च विसृतं स्थानात् कफगुल्मं विरेचनैः॥88॥
सस्नेहैः+बस्तिभिः+च+एनं शोधयेत्+दाशमूलिकैः।
पिप्पल्यामलकद्राक्षाश्यामाद्यैः पालिकैः पचेत्॥89॥
एरण्डतैलहविषोः प्रस्थौ पयसि षड्गुणे।
सिद्धः+अयं मिश्रकः स्नेहः+ गुल्मिनां स्रंसनं हितम्॥90॥
वृद्धिविद्रधिशूलेषु वातव्याधिषु च+अमृतम्।
पिबेत्+वा नीलिनीसर्पिः+मात्रया द्विपलीनया॥91॥
तथा+एव सुकुमाराख्यं घृतानि+औदरिकाणि वा।
द्रोणे+अम्भसः पचेत्+दन्त्याः पलानां पञ्चविंशतिम्॥92॥
चित्रकस्य तथा पथ्याः+तावतीः+तत्+रसे स्रुते।
द्विप्रस्थे साधयेत्+पूते क्षिपेत्+दन्तीसमं गुडम्॥93॥
तैलात्+पलानि चत्वारि त्रिवृतायाः+च चूर्णतः।
कणाकर्षौ तथा शुण्ठ्याः सिद्धे लेहे तु शीतले॥94॥
मधु तैलसमं दद्यात्+चतुर्जातात्+चतुर्थिकाम्।
अतः+ हरीतकीम्+एकां सावलेहपलाम्+अदन्॥95॥
सुखं विरिच्यते स्निग्धः+ दोषप्रस्थम्+अनामयः।
गुल्महृद्रोगदुर्नामशोफानाहगरोदरान्॥96॥
कुष्ठोत्क्लेशारुचिप्लीहग्रहणीविषमज्वरान्।
घ्नन्ति दन्तीहरीतक्यः पाण्डुतां च सकामलाम्॥97॥
सुधाक्षीरद्रवं चूर्णं त्रिवृतायाः सुभावितम्।
कार्षिकं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते॥98॥
कुष्ठश्यामात्रिवृद्दन्तीविजयाक्षारगुग्गुलून्।
गोमूत्रेण पिबेत्+एकं तेन गुग्गुलुम्+एव वा॥99॥
निरूहान् कल्पसिध्द्युक्तान् योजयेत्+गुल्मनाशनान्।
कृतमूलं महावास्तुं कठिनं स्तिमितं गुरुम्॥100॥
गुढमांसं जयेत्+गुल्मं क्षारारिष्टाग्निकर्मभिः।
एकान्तरं द्व्यन्तरं वा विश्रमय्याथ वा त्र्यहम्॥101॥
शरीरदोषबलयोः+वर्धनक्षपणोद्यतः।
अर्शोश्मरीग्रहण्युक्ताः क्षारा योज्याः कफोल्बणे॥102॥
देवदारुत्रिवृद्दन्तीकटुकापञ्चकोलकम्।
स्वर्जिकायावशूकाख्यौ श्रेष्ठापाठोपकुञ्चिकाः॥103॥
कुष्ठं सर्पसुगन्धां च द्व्यक्षांशं पटुपञ्चकम्।

पालिकं चूर्णितं तैलवसादधिघृताप्लुतम्॥104॥
घटस्य+अन्तः पचेत्+पक्वाम्+अग्निवर्णे घटे च तम्।
क्षारं गृहीत्वा क्षीराज्यतक्रमद्यादिभिः पिबेत्॥105॥
गुल्मोदावर्तवर्ध्माशोजठरग्रहणीकृमीन्।
अपस्मारगरोन्मादयोनिशुक्रामयाश्मरीः॥106॥
क्षारागदः+अयं शमयेत्+विषं च+आखुभुजङ्गजम्।
श्लेष्माणं मधुरं स्निग्धं रसक्षीरघृताशिनः॥107॥
छित्त्वा भित्त्वा+आशयात् क्षारः क्षरत्वात्+क्षारयति+अधः।
मन्दे+अग्नावरुचौ सात्म्यैः+मद्यैः सस्नेहमश्नताम्॥108॥
योजयेत्+आसवारिष्टात्+निगदान् मार्गशुद्धये।
शालयः षष्टिका जीर्णाः कुलत्था जाङ्गलं पलम्॥109॥
चिरिबिल्वाग्नितर्कारीयवानीवरुणाङ्कुराः।
शिग्रुस्तरुणबिल्वानि बालं शुष्कं च मूलकम्॥110॥
बीजपूरकहिङ्ग्वम्लवेतसक्षारदाडिमम्।
व्योषं तक्रं घृतं तैलं भक्तं, पानं तु वारुणी॥111॥
धान्याम्लं मस्तु तक्रं च यवानीबिडचूर्णितम्।
पञ्चमूलशृतं वारि जीर्णं मार्द्वीकम्+एव वा॥112॥
पिप्पलीपिप्पलीमूलचित्रकाजाजिसैन्धवैः।
सुरा गुल्मं जयति+आशु जगलः+च विमिश्रितः॥113॥
वमनैः+लङ्घनैः स्वेदैः सर्पिः पानैः+विरेचनैः।
बस्तिक्षारासवारिष्टगुलिकापथ्यभोजनैः॥114॥
श्लैष्मिकः+ बद्धमूलत्वात्+यदि गुल्मः+ न शाम्यति।
तस्य दाहं हृते रक्ते कुर्यात्+अन्ते शरादिभिः॥115॥
अथ गुल्मं सपर्यन्तं वाससा+अन्तरितं भिषक्।
नाभिबस्त्यन्त्रहृदयं रोमराजीं च वर्जयन्॥116॥
न+अतिगाढं परिमृशेत्+शरेण ज्वलता+अथवा।
लोहेन+अरणिकोत्थेन दारुणा तैन्दुकेन वा॥117॥
ततः+अग्निवेगे शमिते शीतैः+व्रणः+ इव क्रिया।
आमान्वये तु पेयाद्यैः सन्धुक्ष्याग्निं विलङ्घिते॥118॥
स्वं स्वं कुर्यात्+क्रमं मिश्रं मिश्रदोषे च कालवित्।
गतप्रसवकालायै नार्यै गुल्मे+अस्रसम्भवे॥119॥
स्निग्धस्विन्नशरीरायै दद्यात्+स्नेहविरेचनम्।

तिलक्वाथः+ घृतगुडव्योषभार्गीरजोन्वितः॥120॥
पानं रक्तभवे गुल्मे नष्टे पुष्पे च योषितः।
भार्गीकृष्णाकरञ्जत्वग्ग्रन्थिकामरदारुजम्॥121॥
चूर्णं तिलानां क्वाथेन पीतं गुल्मरुजापहम्।
पलाशक्षारपात्रे द्वे द्वे पात्रे तैलसर्पिषोः॥122॥
गुल्मशैथिल्यजननीं पक्त्वा मात्रां प्रयोजयेत्।
न प्रभिद्येत यदि+एवं दद्यात्+योनिविरेचनम्॥123॥
क्षारेम युक्तं पललं सुधाक्षीरेण वा ततः।
ताभ्यां वा भावितान्+दद्यात्+योनौ कटुकमत्स्यकान्॥124॥
वराहमत्स्यापित्ताभ्यां नक्तकान् वा सुभावितान्।
किण्वं वा सगुडक्षारं दद्यात्+योनौ विशुद्धये॥125॥
रक्तपित्तहरं क्षारं लेहयेत्+मधुसर्पिषा।
लशुनं मदिरां तीक्ष्णां मस्त्यान्+च+अस्यै प्रयोजयेत्॥126॥
बस्तिं सक्षीरगोमूत्रं सक्षारं दाशमूलिकम्।
अवर्तमाने रुधिरे हितं गुल्मप्रभेदनम्॥127॥
यमकाभ्यक्तदेहायाः प्रवृत्ते समुपेक्षणम्।
रसौदनः+तथा+आहारः पानं च तरुणी सुरा॥128॥
रुधिरे+अतिप्रवृत्ते तु रक्तपित्तहराः क्रियाः।
कार्या वातरुगार्तायाः सर्वा वातहराः पुनः॥129॥
आनाहादौ+उदावर्तबलासघ्न्यः+ यथायथम्॥129 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने गुल्मचिकित्सितं नाम चतुर्दशः+अध्यायः॥14॥
पञ्चदशः+अध्ययाः।
अथात उदरचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
दोषातिमात्रोपचयात्+स्रोतोमार्गनिरोधनात्।
सम्भवति+उदरं तस्मान्+नित्यम्+एनं विरेचयेत्॥1॥
पाययेत्+तैलम्+एरण्डं समूत्रं सपयः+अपि वा।
मासं द्वौ वा+अथवा गव्यं मूत्रं माहिषम्+एव वा॥2॥
पिबेत्+गोक्षीरभुक् स्यात्+वा करभीक्षीरवर्तनः।
दाहानाहातितृण्मूर्च्छापरीतः+तु विशेषतः॥3॥
रूक्षाणां बहुवातानां दोषसंशुद्धिकाङ्क्षिणाम्।

स्नेहनीयानि सर्पींषि जठरघ्नानि योजयेत्॥4॥
षट्पलं दशमूलाम्बुमस्तुद्व्याढकसाधितम्।
नागरत्रिपलं प्रस्थं घृततैलात्+तथा+आढकम्॥5॥
मस्तुनः साधयित्वा+एतत्+पिबेत्+सर्वोदरापहम्।
कफमारुतसम्भूते गुल्मे च परमं हितम्॥6॥
चतुर्गुणे जले मूत्रे द्विगुणे चित्रकात्+पले।
कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत्॥7॥
यवकोलकुलत्थानां पञ्चमूलस्य च+अम्भसा।
सुरासौवीरकाभ्यां च सिद्धं वा पाययेत्+घृतम्॥8॥
एभिः स्निग्धाय सञ्जाते बले शान्ते च मारुते।
स्रस्ते दोषाशये दद्यात्+कल्पदृष्टं विरेचनम्॥9॥
पटोलमूलं त्रिफलां निशां वेल्लं च कार्षिकम्।
कम्पिल्लनीलिनीकुम्भभागान् द्वित्रिचतुर्गुणान्॥10॥
पिबेत्+सञ्चूर्ण्य मूत्रेण पेयापूर्वं ततः+ रसैः।
विरिक्तः+ जाङ्गलैः+अद्यात्+ततः षड्दिवसं पयः॥11॥
शृतं पिबेत्+व्योषयुतं पीतम्+एवं पुनः पुनः।
हन्ति सर्वोदराणि+एतत्+चूर्णं जातोदकानि+अपि॥12॥
गवाक्षीं शङ्खिनीं दन्तीं तिल्वकस्य त्वचं वचाम्।
पिबेत्+कर्कन्धुमृद्वीकाकोलाम्भोमूत्रसीधुभिः॥13॥
यवानी हपुषा धान्यं शतपष्पोपकुञ्चिका।
कारवी पिप्पलीमूलम्+अजगन्धा शठी वचा॥14॥
चित्रकः+अजाजिकं व्योषं स्वर्णक्षीरी फलत्रयम्।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम्॥15॥
विडङ्गं च समांशानि दन्त्या भागत्रयं तथा।
त्रिवृद्विशाले द्विगुणे सातला च चतुर्गुणा॥16॥
एषः+ नारायणः+ नाम चूर्णः+ रोगगणापहः।
न+एनं प्राप्याभिवर्धन्ते रोगा विष्णुम्+इव+असुराः॥17॥
तक्रेण+उदरिभिः पेयः+ गुल्मिभिः+बदराम्बुना।
आनाहवाते सुरया वातरोगे प्रसन्नया॥18॥
दधिमण्डेन विट्सङ्गे दाडिमाम्भोभिः+अर्शसैः।
परिकर्ते सवृक्षाम्लैः+उष्णाम्बुभिः+अजीर्णके॥19॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे।

हृद्रोगे ग्रहणीदोषे कुष्ठे मन्दे+अनले ज्वरे॥20॥
दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे।
यथार्हं स्निग्धकोष्ठेन पेयम्+एतत्+विरेचनम्॥21॥
हपुषां काञ्चनक्षीरीं त्रिफलां नीलिनीफलम्।
त्रायन्तीं रोहिणीं तिक्तां सातलां त्रिवृतां वचाम्॥22॥
सैन्धवं काललवणं पिप्पलीं च+इति चूर्णयेत्।
दाडिमत्रिफलामांसरसमूत्रसुखोदकैः॥23॥
पेयः+अयं सर्वगुल्मेषु प्लीह्नि सर्वोदरेषु च।
श्वित्रे कुष्ठेषु+अजरके सदने विषमे+अनले॥24॥
शोफार्शःपाण्डुरोगेषु कामलायां हलीमके।
वातपित्तकफान्+च+आशु विरेकेण प्रसाधयेत्॥25॥
नीलिनीं निचुलं व्योषं क्षारौ लवणपञ्चकम्।
चित्रकं च पिबेत्+चूर्णं सर्पिषोदरगुल्मनुत्॥26॥
पूर्ववत्+च पिबेत्+दुग्धं क्षामः शुद्धः+अन्तरा+अन्तरा।
कारभं गव्यम्+आजं वा दद्यात्+आत्ययिके गदे॥27॥
स्नेहान्+एव विरेकार्थे दुर्बलेभ्यः+ विशेषतः।
हरीतकीसूक्ष्मरजः प्रस्थयुक्तं घृताढकम्॥28॥
अग्नौ विलाप्य मथितं खजेन यवपल्लके।
निधापयेत्+ततः+ मासात्+उद्धृतं गालितं पचेत्॥29॥
हरीतकीनां क्वाथेन दध्ना च+अम्लेन संयुतम्।
उदरं गरमष्ठीलाम्+आनाहं गुल्मविद्रधी॥30॥
हन्ति+एतत्+कुष्ठम्+उन्मादम्+अपस्मारं च पानतः।
स्नुक्क्षीरयुक्तात्+गोक्षीरात्+शृतशीतात् खजाहतात्॥31॥
यत्+जातम्+आज्यं स्नुक्क्षीरसिद्धं तत्+च तथागुणम्।
क्षीरद्रोणं सुधाक्षीरप्रस्थार्धसहितं दधि॥32॥
जातं मथित्वा तत्+सर्पिः+त्रिवृत्सिद्धं च तद्गुणम्।
तथा सिद्धं घृतप्रस्थं पयसि+अष्टगुणे पिबेत्॥33॥
स्नुक्क्षीरपलकल्केन त्रिवृताषट्पलेन च।
एषां च+अनु पिबेत्+पेयां रसं स्वादु पयः+अथवा॥34॥
घृते जीर्णे विरिक्तः+च कोष्णं नागरसाधितम्।
पिबेत्+अम्बु ततः पेयां ततः+ यूषं कुलत्थजम्॥35॥
पिबेत्+रूक्षः+त्र्यहं तु+एवं भूयः+ वा प्रतिभोजितः।

पुनः पुनः पिबेत्+सर्पिः+आनुपूर्व्या+अनया+एव च॥36॥
घृतानि+एतानि सिद्धानि विदध्यात्+कुशलः+ भिषक्।
गुल्मानां गरदोषाणाम्+उदराणां च शान्तये॥37॥
पीलुकल्कोपसिद्धं वा घृतम्+आनाहभेदनम्।
तैल्वकं नीलिनीसर्पिः स्नेहं वा मिश्रकं पिबेत्॥38॥
हृतदोषः क्रमात्+अश्नन् लघुशाल्योदनप्रति।
उपयुञ्जीत जठरी दोषशेषनिवृत्तये॥39॥
हरीतकीसहस्रं वा गोमूत्रेण पयोनुपः।
सहस्रं पिप्पलीनां वा स्नुक्क्षीरेण सुभावितम्॥40॥
पिप्पलीवर्धमानं वा क्षीराशी वा शिलाजतु।
तद्वत्+वा गुग्गुलुं क्षीरं तुल्यार्द्रकरसं तथा॥41॥
चित्रकामरदारुभ्यां कल्कं क्षीरेण वा पिबेत्।
मासं युक्तः+तथा हस्तिपिप्पलीविश्वभेषजम्॥42॥
विडङ्गं चित्रकः+ दन्ती चव्यं व्योषं च तैः पयः।
कल्कैः कोलसमैः पीत्वा प्रवृद्धम्+उदरं जयेत्॥43॥
भोज्यं भुञ्जीत वा मासं स्नुहीक्षीरघृतान्वितम्।
उत्कारिकां वा स्नुक्क्षीरपीतपथ्याकणाकृताम्॥44॥
पार्श्वशूलम्+उपस्तम्भं हृद्ग्रहं च समीरणः।
यदि कुर्यात् ततः+तैलं बिल्वक्षारान्वितं पिबेत्॥45॥
पक्वं वा टिण्टुकबलापलाशतिलनालजैः।
क्षारैः कदल्यपमार्गतर्करीजैः पृथक्+कृतैः॥46॥
कफे वातेन पित्ते वा ताभ्यां वा+अपि+आवृते+अनिले।
बलिनः स्वौषधयुतं तैलम्+एरण्डजं हितम्॥47॥
देवदारुपलाशार्कहस्तिपिप्पलिशिग्रुकैः।
साश्वकर्णैः सगोमूत्रैः प्रदिह्यात्+उदरं बहिः॥48॥
वृश्चिकालीवचाशुण्ठीपञ्चमूलपुनर्नवात्।
वर्षाभूधान्यकुष्ठात्+च क्वाथैः+मूत्रैः+च सेचयेत्॥49॥
विरिक्तम्लानम्+उदरं स्वेदितं साल्वणादिभिः।
वाससां वेष्टयेत्+एवं वायुः+न+आध्मापयेत्+पुनः॥50॥
सुविरिक्तस्य यस्य स्यात्+आध्मानं पुनः+एव तम्।
सुस्निग्धैः+अम्ललवणैः+निरूहैः समुपाचरेत्॥51॥
सोपस्तम्भः+अपि वा वायुः+आध्मापयति यं नरम्।

तीक्ष्णाः सक्षारगोमूत्राः शस्यन्ते तस्य बस्तयः॥52॥
इति सामान्यतः प्रोक्ताः सिद्धा जठरिणां क्रियाः।
वातोदरे+अथ बलिनं विदार्यादिशृतं घृतम्॥53॥
पाययेत ततः स्निग्धं स्वेदताङ्गं विरेचयेत्।
बहुशः+तैल्वकेन+एनं सर्पिषा मिश्रकेण वा॥54॥
कृते संसर्जने क्षीरं बलार्थम्+अवचारयेत्।
प्राक्+उत्क्लेशात्+निवर्त्यं च बले लब्धे क्रमात्+पयः॥55॥
यूषै रसैः+वा मन्दाम्ललवणैः+एधितानलम्।
सोदावर्तं पुनः स्निग्धस्विन्नम्+आस्थापयेत्+ततः॥56॥
तीक्ष्णाधोभागयुक्तेन दाशमूलिकबस्तिना।
तिलोरुबूकतैलेन वातघ्नाम्लशृतेन च॥57॥
स्फुरणाक्षेपसन्ध्यस्थिपार्श्वपृष्ठत्रिकार्तिषु।
रूक्षं बद्धशकृत्+वातं दीप्ताग्निम्+अनुवासयेत्॥58॥
अविरेच्यस्य शमना बस्तिक्षीरघृतादयः।
बलिनं स्वादुसिद्धेन पैत्ते संस्नेह्य सर्पिषा॥59॥
श्यामात्रिभण्डीत्रिफलाविपक्वेन विरेचयेत्।
सितामधुघृताढ्येन निरूहः+अस्य ततः+ हितः॥60॥
न्यग्रोधादिकषायेण स्नेहबस्तिः+च तत्+शृतः।
दुर्बलं तु+अनुवास्य+आदौ शोधयेत्+क्षीरबस्तिभिः॥61॥
जाते च+अग्निबले स्निग्धं भूयः+ भूयः+ विरेचयेत्।
क्षीरेण सत्रिवृत्कल्केनोरुबूकशृतेन वा॥62॥
सातलात्रायमाणाभ्यां शृतेन+आरग्वधेन वा।
सकफे वा समूत्रेण सतिक्ताज्येन सानिले॥63॥
पयसा+अन्यतमेन+एषां विदार्यादिशृतेन वा।
भुञ्जीत जठरं च+अस्य पायसेन+उपनाहयेत्॥64॥
पुनः क्षीरं पुनः+बस्तिं पुनः+एव विरेचनम्।
क्रमेण ध्रुवम्+आतिष्ठन् यत्तः पित्तोदरं जयेत्॥65॥
वत्सकादिविपक्वेन कफे संस्नेह्य सर्पिषा।
स्विन्नं स्नुक्क्षीरसिद्धेन बलवन्तं विरेचितम्॥66॥
संसर्जयेत्+कटुक्षारयुक्तैः+अन्नैः कफापहैः।
मूत्रत्र्यूषणतैलाढ्यः+ निरूहः+अस्य ततः+ हितः॥67॥
मुष्ककादिकषायेण स्नेहबस्तिः+च तत्+शृतः।

भोजनं व्योषदुग्धेन कौलत्थेन रसेन वा॥68॥
स्तैमित्यारुचिहृल्लासे मन्दे+अग्नौ मद्यपाय च।
दद्यात्+अरिष्टान् क्षारान्+च कफस्त्यानस्थिरोदरे॥69॥
हिङ्गूपकुल्ये त्रिफलां देवदारु निशाद्वयम्।
भल्लातकं शिग्रुफलं कटुकां तिक्तकं वचाम्॥70॥
शुण्ठीं माद्रीं घनं कुष्ठं सरलं पटुपञ्चकम्।
दाहयेत्+जर्जरीकृत्य दधिस्नेहचतुष्कवत्॥71॥
अन्तर्धूमं ततः क्षारात्+बिडालपदकं पिबेत्।
मदिरादधिमण्डोष्णजलारिष्टसुरासवैः॥72॥
उदं गुल्ममष्ठीलां तून्यौ शोफं विसूचिकाम्।
प्लीहहृद्रोगगुदजानुदावर्तं च नाशयेत्॥73॥
जयेत्+अरिष्टगोमूत्रचूर्णायस्कृतिपानतः।
सक्षारतैलपानैः+च दुर्बलस्य कफोदरम्॥74॥
उपनाह्यं ससिद्धार्थकिण्वैः+बीजैः+च मूलकात्।
कल्कितैः+उदरं स्वेदम्+अभीक्ष्णं च+अत्र योजयेत्॥75॥
सन्निपातोदरे कुर्यात्+न+अतिक्षीणबलानले।
दोषोद्रेकानुरोधेन प्रत्याख्याय क्रियाम्+इमाम्॥76॥
दन्तीद्रवन्तीफलजं तैलं पाने च शस्यते।
क्रियानिवृत्ते जठरे त्रिदोषे तु विशेषतः॥77॥
दद्यात्+आपृच्छ्य तत्+ज्ञातीन् पातुं मद्येन कल्कितम्।
मूलं काकादनीगुञ्जाकरवीरकसम्भवम्॥78॥
पानभोजनसंयुक्तं दद्यात्+वा स्थावरं विषम्।
यस्मिन् वा कुपितः सर्पः+ विमुञ्चति फले विषम्॥79॥
तेन+अस्य दोषसङ्घातः स्थिरः+ लीनः+ विमार्गगः।
बहिः प्रवर्तते भिन्नः+ विषेण+आशु प्रमाथिना॥80॥
तथा व्रजति+अगदतां शरीरान्तरम्+एव वा।
हृतदोषं तु शीताम्बुस्नातं तं पाययेत्+पयः॥81॥
पेयां वा त्रिवृतः शाकं मण्डूक्या वास्तुकस्य वा।
कालशाकं यवाख्यं वा खादेत्+स्वरससाधितम्॥82॥
निरम्ललवणस्नेहं स्विन्नास्विन्नम्+अनन्नभुक्।
मासम्+एकं ततः+च+एव तृषितः स्वरसं पिबेत्॥83॥
एवं विनिर्हृते शाकैः+दोषे मासात् परं ततः।

दुर्बलाय प्रयुञ्जीत प्राणभृत्+कारभं पयः॥84॥
प्लीहोदरे यथादोषं स्निग्धस्य स्वेदितस्य च।
सिरां भुक्तवतः+ दध्ना वामबाहौ विमोक्षयेत्॥85॥
लब्धे बले च भूयः+अपि स्नेहपीतं विशोधितम्।
समुद्रशुक्तिजं क्षारं पयसा पाययेत्+तथा॥86॥
अम्लस्रुतं बिडकणाचूर्णाढ्यं नक्तमालजम्।
सौभाञ्जनस्य वा क्वाथं सैन्धवाग्निकणान्वितम्॥87॥
हिङ्ग्वादिचूर्णं क्षाराज्यं युञ्जीत च यथाबलम्।
पिप्पलीनागरं दन्तीसमांशं द्विगुणाभयम्॥88॥
बिडार्धांशयुतं चूर्णम्+इदम्+उष्णाम्बुना पिबेत्।
विडङ्गं चित्रकं सक्तून् सघृतान् सैन्धवं वचाम्॥89॥
दग्ध्वा कपाले पयसा गुल्मप्लीहापहं पिबेत्।
तैलोन्मिश्रैः+बदरकपत्रैः सम्मर्दितैः समुपनद्धः॥90॥
मुसलेन पीडितः+अनु च याति प्लीहा पयोभुजः+ नाशम्।
रोहीतकलताः क्लृप्ताः खण्डशः साभया जले॥91॥
मूत्रे वा+आसुनुयात्+तत्+च सप्तरात्रस्थितं पिबेत्।
कामलाप्लीहगुल्मार्शः कृमिमेहोदरापहम्॥92॥
रोहीतकत्वचः कृत्वा पलानां पञ्चविंशतिम्।
कोलद्विप्रस्थसंयुक्तं कषायम्+उपकल्पयेत्॥93॥
पालिकैः पञ्चकोलैः+तु तैः समस्तैः+च तुल्यया।
रोहीतकत्वचा पिष्टैः+घृतप्रस्थं विपाचयेत्॥94॥
प्लीहाभिवृद्धिं शमयति+एतत्+आशु प्रयोजितम्।
कदल्याः+तिलनालानां क्षारेण क्षुरकस्य च॥95॥
तैलं पक्वं जयेत्+पानात्+प्लीहानं कफवातजम्।
अशान्तौ गुल्मविधिना योजयेत्+अग्निकर्म च॥96॥
अप्राप्तपिच्छासलिले प्लीह्नि वातकफोल्बणे।
पैत्तिके जीवनीयानि सर्पींषि क्षीरबस्तयः॥97॥
रक्तावसेकः संशुद्धिः क्षीरपानं च शस्यते।
यकृति प्लीहवत्+कर्म दक्षिणे तु भुजे सिराम्॥98॥
स्विन्नाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम्।
सतैललवणं दद्यात्+निरूहं सानुवासनम्॥99॥
परिस्रंसीनि च+अन्नानि तीक्ष्णं च+अस्मै विरेचनम्।

उदावर्तहरं कर्म कार्यं यत्+च+अनिलापहम्॥100॥

छिद्रोदरम्+ऋते स्वेदात्+श्लेष्मोदरवत्+आचरेत्।

जातं जातं जलं स्राव्यम्+एवं तत्+यापयेत्+भिषक्॥101॥

अपां दोषहराण्यादौ योजयेत्+उदकोदरे।

मूत्रयुक्तानि तीक्ष्णानि विविधक्षारवन्ति च॥102॥

दीपनीयैः कफघ्नैः+च तम्+आहारैः+उपाचरेत्।

क्षारं छागकरीषाणां स्रुतं मूत्रे+अग्निना पचेत्॥103॥

घनीभवति तस्मिन्+च कर्षांशं चूर्णितं क्षिपेत्।

पिप्पली पिप्पलीमूलं शुण्ठी लवणपञ्चकम्॥104॥

निकुम्भकुम्भत्रिफलास्वर्णक्षीरीविषाणिकाः।

स्वर्जिकाक्षारषड्ग्रन्थासातलायवशूकजम्॥105॥

कोलाभा गुटिकाः कृत्वा ततः सौवीरकाप्लुताः।

पिबेत्+अजरके शोफे प्रवृद्धे च+उदकोदरे॥106॥

इति+औषधैः+अप्रशमे त्रिषु बद्धोदरादिषु।

प्रयुञ्जीत भिषक् शस्त्रम्+आर्तबन्धुनृपार्थितः॥107॥

स्निग्धस्विन्नतनोः+नाभेः+अधः+ बद्धक्षतान्त्रयोः।

पाटयेत्+उदरं मुक्त्वा वामतः+चतुरङ्गुलात्॥108॥

चतुरङ्गुलमानं तु निष्कास्य+अन्त्राणि तेन च।

निरीक्ष्य+अपनयेत्+बालमललेपोपलादिकम्॥109॥

छिद्रे तु शल्यम्+उद्धृत्य विशोध्यान्त्रपरिस्रवम्।

मर्कोटैः+दंशयेत्+छिद्रं तेषु लग्नेषु च+आहरेत्॥110॥

कायं मूर्ध्नः+अनु च+अन्त्राणि यथास्थानं निवेशयेत्।

अक्तानि मधुसार्पिर्भ्याम्+अथ सीव्येत्+बहिः+व्रणम्॥111॥

ततः कृष्णमृदा+आलिप्य बध्नीयात्+यष्टिमिश्रया।

निवातस्थः पयोवृत्तिः स्नेहद्रोण्यां वसेत्+ततः॥112॥

सजले जठरे तैलैः+अभ्यक्तस्य+अनिलापहैः।

स्विन्नस्य+उष्णाम्बुना+आकक्षम्+उदरे पट्टवेष्टिते॥103॥

बद्धच्छिद्रोदितस्थाने विध्येत्+अङ्गुलमात्रकम्।

निधाय तस्मिन्+नाडीं च स्रावायेत्+अर्धम्+अम्भसः॥114॥

अथ+अस्य नाडीम्+आकृष्य तैलेन लवणेन च।

व्रणम्+अभ्यज्य बध्वा च वेष्टयेत्+वाससोदरम्॥115॥

तृतीये+अह्नि चतुर्थे वा यावत्+आषोडशं दिनम्।

तस्य विश्रम्य विश्रम्य स्रावयेत्+अल्पशः+ जलम्॥116॥
विवेष्टयेत्+गाढतरं जठरं वाससा श्लथम्।
निःस्रुते लङ्घितः पेयाम्+अस्नेहलवणां पिबेत्॥117॥
स्यात्+क्षीरवृत्तिः षण्मासान्+त्रीन् पेयां पयसा पिबेत्।
त्रीन्+च+अन्यान् पयसा+एव+अद्यात् फलाम्लेन रसेन वा॥118॥
अल्पशः+अस्नेहलवणं जीर्णं श्यामाककोद्रवम्।
प्रयतः+ वत्सरेण+एवं विजयेत जलोदरम्॥119॥
वर्ज्येषु यन्त्रितः+ दिष्टे न+अत्यदिष्टे जितेन्द्रियः।
सर्वम्+एव+उदरं प्रायः+ दोषसङ्घातजं यतः॥120॥
अतः+ वातादिशमनी क्रिया सर्वत्र शस्यते।
वह्निः+मन्दत्वम्+आयाति दोषैः कुक्षौ प्रपूरिते॥121॥
तस्मात्+भोज्यानि भोज्यानि दीपनानि लघूनि च।
सपञ्चमूलानि+अल्पाम्लपटुस्नेहकटूनि च॥122॥
भावितानां गवां मूत्रे षष्टिकानां च तण्डुलैः।
यवागूं पयसा सिद्धां प्रकामं भोजयेत्+नरम्॥123॥
पिबेत्+इक्षुरसं च+अनु जठराणां निवृत्तये।
स्वं स्वं स्थानं व्रजन्ति+एषां वातपित्तकफाः+तथा॥124॥
अत्यर्थोष्णाम्ललवणं रूक्षं ग्राहि हिमं गुरु।
गुडं तैलकृतं शाकं वारि पानावगाहयोः॥126॥
आयासाध्वदिवास्वप्नयानानि च परित्यजेत्।
न+अत्यच्छसान्द्रमधुरं तक्रं पाने प्रशस्यते॥126॥
सकणालवणं वाते, पित्तः+ सोषणशर्करम्।
यवानीसैन्धवाजाजीमधुव्योषैः कफोदरे॥127॥
त्र्यूषणक्षारलवणैः संयुतं निचयोदरे।
मधुतैलवचाशुण्ठीशताह्वाकुष्ठसैन्धवैः॥128॥
प्लीह्नि, बद्धे तु हपुषायवानीपङ्वजाजिभिः।
सकृष्णामाक्षिकं छिद्रे, व्योषवत्+सलिलोदरे॥129॥
गौरवारोचकानाहमन्दवह्न्यतिसारिणाम्।
तक्रं वातकफार्तानाम्+अमृतत्वाय कल्पते॥130॥
प्रयोगाणां च सर्वेषाम्+अनु क्षीरं प्रयोजयेत्।
स्थैर्यकृत्+सर्वधातूनां बल्यं दोषानुबन्धहृत्॥131॥
भेषजापचिताङ्गानां क्षीरम्+एव+अमृतायते॥131 1/2 ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायं चतुर्थे चिकित्सितस्थाने उदरचिकित्सितं नाम पञ्चदशः+अध्ययः॥15॥

षोडशोऽध्यायाः।

अथ+अतः पाण्डुरोगचिकित्सितं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

पाण्ड्वामयी पिबेत्+सर्पिः+अदौ कल्याणकाह्वयम्।

पञ्चगव्यं महातिक्तं शृतं वा+आरग्वधादिना॥1॥

दाडिमात्+कुडवः+ धान्यात्+कुडवार्धं पलं पलम्।

चित्रकात्+शृङ्गबेरात्+च पिप्पल्यर्धपलं च तैः॥2॥

कल्कितैः+विंशतिपलं घृतस्य सलिलाढके।

सिद्धं हृत्पाण्डुगुल्मार्शःप्लीहवातकफार्तिनुत्॥3॥

दीपनं श्वासकासघ्नं मूढवातानुलोमनम्।

दुःखप्रसविनीनां च वन्ध्यानां च प्रशस्यते॥4॥

स्नेहितं वामयेत्+तीक्ष्णैः पुनः स्निग्धं च शोधयेत्।

पयसा मूत्रयुक्तेन बहुशः केवलेन वा॥5॥

दन्तीफलरसे कोष्णे काश्मर्याञ्जलिम्+आसुतम्।

द्राक्षाञ्जलिं वा मृदितं तत् पिबेत् पाण्डुरोगजित्॥6॥

मूत्रेण पिष्टां पथ्यां वा तत्+सिद्धं वा फलत्रयम्।

स्वर्णक्षीरीत्रिवृच्छ्यामाभद्रदारुमहौषधम्॥7॥

गोमूत्राञ्जलिना पिष्टं शृतं तेन+एव वा पिबेत्।

साधितं क्षीरम्+एभिः+वा पिबेत्+दोषानुलोमनम्॥8॥

मूत्रे स्थितं वा सप्ताहं पयसा+अयोरजः पिबेत्।

जीर्णे क्षीरेण भुञ्जीत रसेन मधुरेण वा॥9॥

शुद्धः+च+उभयतः+ लिह्यात्+पथ्यां मधुघृतद्रुताम्।

विशालाकटुकामुस्ताकुष्ठदारुकलिङ्गकाः॥10॥

कर्षांशा द्विपिचुः+मूर्वा कर्षार्धांशा घुणप्रिया।

पीत्वा तत्+चूर्णम्+अम्भोभिः सुखैः+लिह्यात्+ततः+ मधु॥11॥

पाण्डुरोगं ज्वरं दाहं कासं श्वासम्+अरोचकम्।

गुल्मानाहामवातान्+च रक्तपित्तं च तत्+जयेत्॥12॥

वासागुडूचीत्रिफलाकट्वीभूनिम्बनिम्बजः।

क्वाथः क्षौद्रयुतः+ हन्ति पण्डुपित्तास्रकामलाः॥13॥

व्योषाग्निवेल्लत्रिफलामुस्तैः+तुल्यमयोरजः।

चूर्णितं तक्रमध्वाज्यकोष्णाम्भोभिः प्रयोजितम्॥14॥
कामलापाण्डुहृद्रोगकुष्ठार्शोमेहनाशनम्।
गुडनागरमण्डूरतिलांशान् मानतः समान्॥15॥
पिप्पलीद्विगुणान् दद्यात्+गुटिकां पाण्डुरोगिणे।
ताप्यं दार्व्याः+त्वचं चव्यं ग्रन्थिकं देवदारु च॥16॥
व्योषादिनवकं च+एतत्+चूर्णयेत्+ द्विगुणं ततः।
मण्डूरं च+अञ्जननिभं सर्वतः+अष्टगुणे+अथ तत्॥17॥
पृथक्+विपक्वे गोमूत्रे वटकीकरणक्षमे।
प्रक्षिप्य वटकान् कुर्यात्+तान् खादेत्+तक्रभोजनः॥18॥
एते मण्डूरवटकाः प्राणदाः पाण्डुरोगिणाम्।
कुष्ठानि+अजरकं शोफमूरुस्तम्भम्+अरोचकम्॥19॥
अर्शांसि कामलां मेहान् प्लीहानं शमयन्ति च।
ताप्याद्रिजतुरौप्यायोमलाः पञ्चपलाः पृथक्॥20॥
चित्रकत्रिफलाव्योषविडङ्गैः पालिकैः सह।
शर्कराष्टपलोन्मिश्राः+चूर्णिता मधुना द्रुताः॥21॥
पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम्।
कुष्ठानि+अजरकं मेहं शोफं श्वासम+अरोचकम्॥22॥
विशेषात्+हन्ति+अपस्मारं कामलां गुदजानि च।
कौटजत्रिफलानिम्बपटोलघननागरैः॥23॥
भावितानि दशाहानि रसैः+द्वित्रिगुणानि वा।
शिलाजतुपलानि+अष्टौ तावती सितशर्करा॥24॥
त्वक्क्षीरीपिप्पलीधात्रीकर्कटाख्याः पलोन्मिताः।
निदिग्ध्याः फलमूलाभ्यां पलं युक्त्या त्रिजातकम्॥25॥
मधुत्रिपलसंयुक्तान् कुर्यात्+अक्षसमान् गुडान्।
दाडिमाम्बुपयः पक्षिरसतोयसुरासवान्॥26॥
तान् भक्षयित्वा+अनु पिबेत्+निरन्नः+ भुक्तः+ एव वा।
पाण्डुकुष्ठज्वरप्लीहतमकार्शोभगन्दरम्॥27॥
हृन्मूत्रपूतिशुक्राग्निदोषशोषगरोदरम्।
कासासृग्दरपित्तासृक्शोफगुल्मगलामयान्॥28॥
मेहवर्ध्मभ्रमान् हन्युः सर्वदोषहराः शिवाः।
द्राक्षाप्रस्थं कणाप्रस्थं शर्करार्धतुलां तथा॥29॥
द्विपलं मधुकं शुण्ठीं त्वक्क्षीरीं च विचूर्णितम्।

धात्रीफलरसद्रोणे तत्+क्षिप्त्वा लेहवत्+पचेत्॥30॥
शीतात्+मधुप्रस्थयुतात्+ लिह्यात्+पाणितलं ततः।
हलीमकं पाण्डुरोगं कामलां च नियच्छति॥31॥
कनीयः पञ्चमूलाम्बु शस्यते पानभोजने।
पाण्डूनां, कामलार्तानां मृद्वीकामलकात्+रसः॥32॥
इति सामान्यतः प्रोक्तं पाण्डुरोगे भिषग्जितम्।
विकल्प्य योज्यं विदुषा पृथक्+दोषबलं प्रति॥33॥
स्नेहप्रायं पवनजे तिक्तशीतं तु पैत्तिके।
श्लैष्मिके कटुरूक्षोष्णं विमिश्रं सान्निपातिके॥34॥
मृदं निर्यापयेत्+कायात्+तीक्ष्णैः संशोधनैः पुरः।
बलाधानानि सर्पींषि शुद्धे कोष्ठे तु योजयेत्॥35॥
व्योषबिल्वद्विरजनीत्रिफलाद्विपुनर्नवम्।
मुस्तानि+अयोरजः पाठा विडङ्गं देवदारु च॥36॥
वृश्चिकाली च भार्गी च सक्षीरैः+तैः शृतं घृतम्।
सर्वान् प्रशमयति+आशु विकारान् मृत्तिकाकृतान्॥37॥
मृद्द्वेषणाय तत्+लौल्ये वितरेत्+भावितां मृदम्॥38॥
वेल्लाग्निनिम्बप्रसवैः पाठया मूर्वया+अथवा।
मृद्भेदभिन्नदोषानुगमात्+योज्यं च भेषजम्॥39॥
कामलायां तु पित्तघ्नं पाण्डुरोगाविरोधि यत्।
पथ्याशतरसे पथ्यावृन्तार्धशतकल्कितः॥40॥
प्रस्थः सिद्धः+ घृताद्गुल्मकामलापाण्डुरोगनुत्।
आरग्वधं रसेन+इक्षोः+विदार्यामलकस्य वा॥41॥
सत्र्यूषणं बिल्वमात्रं पाययेत्+कामलापहम्।
पिबेत्+निकुम्भकल्कं वा द्विगुडं शीतवारिणा॥42॥
कुम्भस्य चूर्णं सक्षौद्रं त्रैफलेन रसेन वा।
त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसम्॥43॥
प्रातः प्रातः+मधुयुतं कामलार्ताय योजयेत्।
निशागैरिकधात्रीभिः कामलापहम्+अञ्जनम्॥44॥
तिलपिष्टनिभं यः+तु कामलावान् सृजेत्+मलम्।
कफरुद्धपथं तस्य पित्तं कफहरैः+जयेत्॥45॥
रूक्षशीतगुरुस्वादुव्यायामबलनिग्रहैः।
कफसम्मूर्च्छितः+ वायुः+यदा पित्तं बहिः क्षिपेत्॥46॥

हारिद्रनेत्रमूत्रत्वक्श्वेतवर्चाः+तदा नरः।
भवेत्+साटोपविष्टम्भः+ गुरुणा हृदयेन च॥47॥
दौर्बल्याल्पाग्निपार्श्वार्तिहिध्माश्वासारुचिज्वरैः।
क्रमेण+अल्पे+अनुषज्येत पित्ते शाखासमाश्रिते॥48॥
रसैः+तं रूक्षकट्वम्लैः शिखितित्तिरिदक्षजैः।
शुष्कमूलकजैः+यूषैः कुलत्थोत्थैः+च भोजयेत्॥49॥
भृशाम्लतीक्ष्णकटुकलवणोष्णं च शस्यते।
सबीजपूरकरसं लिह्यात्+व्योषं तथा+आशयम्॥50॥
स्वं पित्तम्+एति तेन+अस्य शकृत्+अपि+अनुरज्यते।
वायुः+च याति प्रशमं सहाटोपाद्युपद्रवैः॥51॥
निवृत्तोपद्रवस्यास्य कार्यः कामलिकः+ विधिः।
गोमूत्रेण पिबेत्+कुम्भकामलायां शिलाजतु॥52॥
मासं माक्षिकधातुं वा किट्टं वा+अथ हिरण्यजम्।
गुडूचीस्वरसक्षीरसाधितेन हलीमकी॥53॥
महिषीहविषा स्निग्धः पिबेत्+धात्रीरसेन तु।
त्रिवृतां तत्+विरिक्तः+अद्यात्+स्वादु पित्तानिलापहम्॥54॥
द्राक्षालेहं च पूर्वोक्तं सर्पींषि मधुराणि च।
यापनान् क्षीरबस्तीन्+च शीलयेत्+सानुवासनान्॥55॥
मार्द्वीकारिष्टयोगान्+च पिबेत्+युक्त्या+अग्निवृद्धये।
कासिकं च+अभयालेहं पिप्पलीं मधुकं बलाम्॥56॥
पयसा च प्रयुञ्जीत यथादोषं यथाबल्।
पाण्डुरोगेषु कुशलः शोफोक्तं च क्रियाक्रमम्॥57॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने
पाण्डुरोगचिकित्सितं नाम षोडशः+अध्यायाः॥16॥
सप्तदशः+अध्यायः।
अथ+अतः श्वयथुचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सर्वत्र सर्वाङ्गसरे दोषजे श्वयथौ पुरा।
सामे विशोषितः+ भुक्त्वा लघु कोष्णाम्भसा पिबेत्॥1॥
नागरातिविषादारुविडङ्गेन्द्रयवोषणम्।
अथवा विजयाशुण्ठीदेवदारुपुनर्नवम्॥2॥
नवायसं वा दोषाढ्यः शुद्ध्यै मूत्रहरीतकीः।

वराक्वाथेन कटुकाकुम्भायस्त्र्यूषणानि वा॥3॥
अथवा गुग्गुलुं तद्वत्+जतु वा शैलसम्भवम्।
मन्दाग्निः शीलयेत्+आमगुरुभिन्नविबद्धविट्॥4॥
तक्रं सौवर्चलव्योषक्षौद्रयुक्तं गुडाभयाम्।
तक्रानुपानम्+अथवा तद्वत्+वा गुडनागरम्॥5॥
आर्द्रकं वा समगुडं प्रकञ्चार्धविवर्धितम्।
परं पञ्चपलं मासं यूषक्षीररसाशनः॥6॥
गुल्मोदरार्शः श्वयथुप्रमेहान् श्वासप्रतिश्यालसकाविपाकान्।
सकामलाशोषमनोविकारान् कासं कफं च+एव जयेत्+प्रयोगः॥7॥
घृतमार्द्रकनागरस्य कल्कस्वरसाभ्यां पयसा च साधयित्वा।
श्वयथुक्षवथूदराग्निसादैः+अभिभूतः+अपि पिबन् भवति+अरोगः॥8॥
निरामः+ बद्धशमलः पिबेत्+श्वयथुपीडितः।
त्रिकटुत्रिवृतादन्तीचित्रकैः साधितं पयः॥9॥
मूत्रं गोः+वा महिष्या वा सक्षीरं क्षीरभोजनः।
सप्ताहं मासम्+अथवा स्यात्+उष्ट्रक्षीरवर्तनः॥10॥
यवानकं यवक्षारं यवानीं पञ्चकोलकम्।
मरिचं दाडिमं पाठां धानकाम्+अम्लवेतसम्॥11॥
बालबिल्वं च कर्षांशं साधयेत्+सलिलाढके।
तेन पक्वः+ घृतप्रस्थः शोफार्शोगुल्ममेहहा॥12॥
दध्नः+चित्रकगर्भात्+वा घृतं तत्+तक्रसंयुतम्।
पक्वं सचित्रकं तद्वत्+गुणैः युञ्ज्यात्+च कालवित्॥13॥
धान्वन्तरं महातिक्तं कल्याणम्+अभयाघृतम्।
दशमूलकषायस्य कंसे पथ्याशतं पेचत्॥14॥
दत्त्वा गुडतुलां तस्मिन् लेहे दद्यात्+विचूर्णितम्।
त्रिजातकं त्रिकटुकं किञ्चित्+च यवशूकजम्॥15॥
प्रस्थार्धं च हिमे क्षौद्रात्+तत्+निहन्ति+उपयोजितम्।
प्रवृद्धशोफज्वरमेहगुल्मकार्श्यामवाताम्लकरक्तपित्तम्।
वैवर्ण्यमूत्रानिलशुक्रदोषश्वासारुचिप्लीहगरोदरं च॥16॥
पुराणयवशाल्यन्नं दशमूलाम्बुसाधितम्॥17॥
अल्पम्+अल्पपटुस्नेहं भोजनं श्वयथोर्हितम्।
क्षारव्योषान्वितैः+मौद्गैः कौलत्थैः सकणै रसैः॥18॥
तथा जाङ्गलजैः कूर्मगोधाशल्यकजैः+अपि।

अनम्लं मथितं पाने मद्यानि+औषधवन्ति च॥19॥
अजाजीशठिजीवन्तीकारवीपौष्कराग्निकैः।
बिल्वमध्ययवक्षारवृक्षाम्लैः+बदरोन्मितैः॥20॥
कृता पेया+आज्यतैलाभ्यां युक्तिभृष्टां परं हिता।
शोफातिसारहृद्रोगगुल्मार्शोल्पाग्निमेहिनाम्॥21॥
गुणैः+तद्वत्+च पाठायाः पञ्चकोलेन साधिता।
शैलेयकुष्ठस्थौणेयरेणुकागुरुपद्मकैः॥22॥
श्रीवेष्टकनखस्पृक्कादेवदारुप्रियङ्गुभिः।
मांसीमागधिकावन्यधान्यध्यामकवालकैः॥23॥
चतुर्जातकतालीसमुस्तागन्धपलाशकैः।
कुर्यात्+अभ्यञ्जनं तैलं लेपं स्नानाय तु+उदकम्॥24॥
स्नानं वा निम्बवर्षाभूनक्तमालार्कवारिणा।
एकाङ्गशोफे वर्षाभूकरवीरककिंशुकैः॥25॥
विशालात्रिफलारोध्रनलिकादेवदारुभिः।
हिंस्राकोशातकीमाद्रीतालपर्णीजयन्तिभिः॥26॥
स्थूलकाकादनीशालनाकुलीवृषपर्णिभिः।
वृद्ध्यर्द्धिहस्तिकर्णैः+च सुखोष्णैः+लेपनं हितम्॥27॥
अथ+अनिलोत्थे श्वयथौ मासार्धं त्रिवृतं पिबेत्।
तैलम्+एरण्डजं वातविड्विबन्धे तत्+एव तु॥28॥
प्राग्भक्तं पयसा युक्तं रसैः+वा कारयेत्+तथा।
स्वेदाभ्यङ्गान् समीरघ्नान् लेपम्+एकाङ्गगे पुनः॥29॥
मातुलुङ्गाग्निमन्थेन शुण्ठीहिंस्राम्+अराह्वयैः।
पैत्ते तिक्तं पिबेत्+सर्पिः+न्यग्रोधाद्+येन वा शृतम्॥30॥
क्षीरं तृड्दाहमोहेषु लेपाभ्यङ्गाः+च शीतलाः।
पटोलमूलत्रायन्तीयष्ट्याह्वकटुकाभयाः॥31॥
दारु दार्वी हिमं दन्ती विशाला निचुलं कणा।
तैः क्वाथः सघृतः पीतः+ हन्ति+अन्तस्तापतृड्भ्रमान्॥32॥
ससन्निपातवीसर्पशोफदाहविषज्वरान्।
आरग्वधादिना सिद्धं तैलं श्लेष्मोद्भवे पिबेत्॥33॥
स्रोतोविबन्धे मन्दे+अग्नौ+अरुचौ स्तिमिताशयः।
क्षारचूर्णासवारिष्टमूत्रतक्राणि शीलयेत्॥34॥
कृष्णापुराणपिण्याकशिग्रुत्वक्सिकतातसीः।

प्रलेपोन्मर्दने युञ्ज्यात्+सुखोष्णा मूत्रकल्किताः॥35॥
स्नानं मूत्राम्भसी सिद्धे कुष्ठतर्कारिचित्रकैः।
कुलत्थनागराभ्यां वा चण्डा+अगुरु विलेपने॥36॥
कालाजशृङ्गीसरलबस्तगन्धाहयाह्वयाः।
एका+इषिका च लेपः स्यात्+श्वयथावेकगात्रगे॥37॥
यथादोषं यथासन्नं शुद्धिं रक्तावसेचनम्।
कुर्वीत, मिश्रदोषे तु दोषोद्रेकबलात्+क्रियाम्॥38॥
अजाजिपाठाघनपञ्चकोलव्याघ्रीरजन्यः सुखतोयपीताः।
शोफं त्रिदोषं चिरजं प्रवृद्धं निघ्नन्ति भूनिम्बमहौषधे च॥39॥
अमृताद्वितयं सिवाटिका सुरकाष्ठं सपुरं सगोजलम्।
श्वयथूदरकुष्ठपाण्डुताकृमिमेहोर्ध्वकफानिलापहम्॥40॥
इति निजम्+अधिकृत्य पथ्यम्+उक्तं क्षतजनिते क्षतजं विशोधनीयम्।
स्रुतिहिमघृतलेपसेकरेकैः+विषजनिते विषजित्+च शोफ इष्टम्॥41॥
ग्राम्याब्जानूपं पिशितम्+अबलं शुष्कशाकं तिलान्नं
गौडं पिष्टान्नं दधि सलवणं विज्जलं मद्यम्+अम्लम्।
धाना वल्लूरं समशनमथः+ गुर्वसात्म्यं विदाहि
स्वप्नं च+आरात्रौ श्वयथुगदवान् वर्जयेत्+मैथुनं च॥42॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने श्वयथुचिकित्सितं नाम सप्तदशः+अध्यायाः॥17॥
अष्टादशः+अध्यायाः।
अथ+अतः+ विसर्पचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
आदौ+एव विसर्पेषु हितं लङ्घनरूक्षणम्।
रक्तावसेकः+ वमनं विरेकः, स्नेहनं न तु॥1॥
प्रच्छर्दनं विसर्पघ्नं सयष्टीन्द्रयवं फलम्।
पटोलपिप्पलीनिम्बपल्लवैः+वा समन्वितम्॥2॥
रसेन युक्तं त्रायन्त्या द्राक्षायाः+त्रैफलेन वा।
विरेचनं त्रिवृच्चूर्णं पयसा सर्पिषा+अथवा॥3॥
योज्यं, कोष्ठगते दोषे विशेषेण विशोधनम्।
अविशोध्यस्य दोषे+अल्पे शमनं चन्दनोत्पलम्॥4॥
मुस्तनिम्बपटोलं वा पटोलादिकम्+एव वा।
सारिवामलकोशीरमुस्तं वा क्वथितं जले॥5॥

दुरालभां पर्पटकं गुडूचीं विश्वभेषजम्।
पाक्यं शीतकषायं वा तृष्णावीसर्पवान् पिबेत्॥6॥
दार्वीपटोलकटुकामसूरत्रिफलाः+तथा।
सनिम्बयष्टीत्रायन्तीः क्वथिता घृतमूर्च्छिताः॥7॥
शाखादुष्टे तु रुधिरे रक्तम्+एव+आदितः+ हरेत्।
त्वङ्मांसस्नायुसंक्लेदः+ रक्तक्लेदाद्धि जायते॥8॥
निरामे श्लेष्मणि क्षीणे वातपित्तोत्तरे हितम्।
घृतं तिक्तं महातिक्तं शृतं वा त्रायमाणया॥9॥
निर्हृते+अस्रे विशुद्धे+अन्तर्दोषे त्वङ्मांससन्धिगे।
बहिःक्रियाः प्रदेहाद्याः सद्यः+ वीसर्पशान्तये॥10॥
शताह्वामुस्तवाराहीवंशार्तगलधान्यकम्।
सुराह्वा कृष्णगन्धा च कुष्ठं च+आलेपनं चले॥11॥
न्यग्रोधादिगणः पित्ते तथा पद्मोत्पलादिकम्।
न्यग्रोधपादाः+तरुणाः कदलीगर्भसंयुताः॥12॥
बिसग्रन्थिः+च लेपः स्यात्+शतधौतघृताप्लुतः।
पद्मिनीकर्दमः शीतः पिष्टं मौक्तिकम्+एव वा॥13॥
शङ्खः प्रवालं शुक्तिः+वा गैरिकं वा घृतान्वितम्।
त्रिफलापद्मकोशीरसमङ्गाकरवीरकम्॥14॥
नलमूलानि+अनन्ता च लेपः श्लेष्मविसर्पहा।
धवसप्ताह्वखदिरदेवदारुकुरण्टकम्॥15॥
समुस्तारग्वधं लेपः+ वर्गः+ वा वरुणादिकः।
आरग्वधस्य पत्राणि त्वचः श्लेष्मातकोद्भवाः॥16॥
इन्द्राणिशाकं काकाह्वा शिरीषकुसुमानि च।
सेकव्रणाभ्यङ्गहविः+लेपचूर्णान् यथायथम्॥17॥
एतैः+एव+औधैः कुर्यात्+वायौ लेपा घृताधिकाः।
कफस्थानगते सामे पित्तस्थानगते+अथवा॥18॥
अशीतोष्णा हिता रूक्षां रक्तपित्ते घृतान्विताः।
अत्यर्थशीतास्तनवस्तनुवस्त्रान्तरास्थिताः॥19॥
योज्याः क्षणे क्षणे+अन्ये+अन्ये मन्दवीर्यास्तः+ एव च।
संसृष्टदोषे संसृष्टम्+एतत्+कर्म प्रशस्यते॥20॥
शतधौतघृतेन+अग्निं प्रदिह्यात्+केवलेन वा।
सेचयेत्+घृतमण्डेन शीतेन मधुकाम्बुना॥21॥

सिताम्भसा+अम्भोदजलैः क्षीरेणेक्षुरसेन वा।
पानलेपनसेकेषु महातिक्तं परं हितम्॥22॥
ग्रन्थ्याख्ये रक्तपित्तघ्नं कृत्वा सम्यक्+यथा+उदितम्।
कफानिलघ्नं कर्मेष्टं पिण्डस्वेदोपनाहनम्॥23॥
ग्रन्थिवीसर्पशूले तु तैलेनोष्णेन सेचयेत्।
दशमूलविपक्वेन तद्वत्+मूत्रैः+जलेन वा॥24॥
सुखोष्णया प्रदिह्यात्+वा पिष्ट्या कृष्णगन्धया।
नक्तमालत्वचा शुष्कमूलकैः कलिना+अथवा॥25॥
दन्ती चित्रकमूलत्वक् सौधार्कपयसी गुडः।
भल्लातकास्थि कासीसं लेपः+ भिन्द्यात्+शिलाम्+अपि॥26॥
बहिः+मार्गाश्रितं ग्रन्थिं किं पुनः कफसम्भवम्।
दीर्घकालस्थितं ग्रन्थिम्+एभिः+भिन्द्यात्+च भेषजैः॥27॥
मूलकानां कुलत्थानां यूषैः सक्षारदाडिमैः।
गोधूमान्नैः+यवान्नैः+वा ससीधुमधुशार्करैः॥28॥
सक्षौद्रैः+वारुणीमण्डैः+मातुलुङ्गरसान्वितैः।
त्रिफलायाः प्रयोगैः+च पिप्पल्याः क्षौद्रसंयुतैः॥29॥
देवदारुगुडूच्योः+च प्रयोगैः+गिरिजस्य च।
मुस्तभल्लातसक्तूनां प्रयोगैः+माक्षिकस्य च॥30॥
धूमैः+विरेकैः शिरसः पूर्वोक्तैः+गुल्मभेदनैः।
तप्तायोहेमलवणपाषाणादिप्रपीडनैः॥31॥
आभिः क्रियाभिः सिद्धाभिः+विविधाभिः+बले स्थितः।
ग्रन्थिः पाषाणकठिनः+ यदि न+एव+उपशाम्यति॥32॥
अथ+अस्य दाहः क्षारेण शरैः+हेम्ना+अपि वा हितः।
पाकिभिः पाचयित्वा वा पाटयित्वा तम्+उद्धरेत्॥33॥
मोक्षयेत्+बहुशः+च+अस्य रक्तम्+उत्क्लेशम्+आगतम्।
पुनः+च+अपहृते रक्ते वातश्लेष्मजित्+औषधम्॥34॥
प्रक्लिन्ने दाहपाकाभ्यां बाह्यान्तर्व्रणवत्+क्रिया।
दार्वीविडङ्गकम्पिल्लैः सिद्धं तैलं व्रणे हितम्॥35॥
दूर्वास्वरससिद्धं तु कफपित्तोत्तरे घृतम्।
एकतः सर्वकर्माणि रक्तमोक्षणम्+एकतः॥36॥
विसर्पः+ न हि+असंसृष्टं सः+अस्रपित्तेन जायते।
रक्तम्+एव+आश्रयः+च+अस्य बहुशः+अस्रं हरेत्+अतः॥37॥

न घृतं बहुदोषाय देयं यत्+न विरेचनम्।
तेन दोषः+ हि+उपस्तब्धः+त्वग्रक्तपिशितं पचेत्॥38॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटवरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने विसर्पचिकित्सितं नाम+अष्टादशः+अध्यायः॥18॥
एकोनविंशः+अध्यायः।
अथ+अतः कुष्ठचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
कुष्ठिनं स्नेहपानेन पूर्वं सर्वम्+उपाचरेत्।
तत्र वातोत्तरे तैलं घृतं वा साधितं हितम्॥1॥
दशमूलामृतैः+अण्डशार्ङ्गेष्टामेषशृङ्गिभिः।
पटोलनिम्बकटुकादार्वीपाठादुरालभाः॥2॥
पर्पटं त्रायमाणां च पलांशं पाचयेत्+अपाम्।
द्व्याढके+अष्टांशशेषेण तेन कर्षोन्मितैः+तथा॥3॥
त्रायन्तीमुस्तभूनिम्बकलिङ्गकणचन्दनैः।
सर्पिषः+ द्वादशपलं पचेत्+तत्+तिक्तकं जयेत्॥4॥
पित्तकुष्ठपरीसर्पपिटिकादाहतृड्भ्रमान्।
कण्डुपाण्ड्वामयान् गण्डान् दुष्टनाडीव्रणापचीः॥5॥
विस्फोटविद्रधीगुल्मशोफोन्मादमदान्+अपि।
हृद्रोगतिमिरव्यङ्गग्रहणीश्वित्रकामलाः॥6॥
भगन्दरम्+अपस्मारम्+उदरं प्रदरं गरम्।
अर्शः+अस्रपित्तम्+अन्यान्+च सुकृच्छ्रान् पित्तजान् गदान्॥7॥
सप्तच्छदः पर्पटकः शम्याकः कटुका वचा।
त्रिफला पद्मकं पठा रजन्यौ सारिवे कणे॥8॥
निम्बचन्दनयष्ट्याह्वविशालेन्द्रयवामृताः।
किराततिक्तकं सेव्यं वृषः+ मूर्वा शतावरी॥9॥
पटोलातिविषामुस्तात्रायन्तीधन्वयासकम्।
तैः+जले+अष्टगुणे सर्पिः+द्विगणामलकीरसे॥10॥
सिद्धं तिक्तात्+महातिक्तं गुणैः+अभ्यधिकं मतम्।
कफोत्तरे घृतं सिद्धं निम्बसप्ताह्वचित्रकैः॥11॥
कुष्ठोषणवचाशालप्रियालचतुरङ्गुलैः।
सर्वेषु चारुष्करजं तौवरं सार्षपं पिबेत्॥12॥
स्नेहं घृतं वा कृमिजित्पथ्याभल्लातकैः शृतम्।

आरग्वधस्य मूलेन शतकृत्वः शृतं घृतम्॥13॥
पिबन् कुष्ठं जयति+आशु भजन् सखदिरं जलम्।
एभिः+एव यथास्वं च स्नेहैः+अभ्यञ्जनं हितम्॥14॥
स्निग्धस्य शोधनं योज्यं विसर्पे यत्+उदाहृतम्।
ललाटहस्तपादेषु शिराः+च+अस्य विमोक्षयेत्॥15॥
प्रच्छानम्+अल्पके कुष्ठे शृङ्गाद्याः+च यथायथम्।
स्नेहैः+आप्याययेत्+च+एनं कुष्ठघ्नैः+अन्तरा+अन्तरा॥16॥
मुक्तरक्तविरिक्तस्य रिक्तकोष्ठस्य कुष्ठिनः।
प्रभञ्जनः+तथा हि+अस्य न स्यात्+देहप्रभञ्जनः॥17॥
वासामृतानिम्बवरापटोलव्याघ्रीकरञ्जोदककल्कपक्वम्।
सर्पिः+विसर्पज्वरकामलास्रकुष्ठापहं वज्रकम्+आमनन्ति॥18॥
त्रिफलात्रिकटुद्विकण्टकारीकटुकाकुम्भनिकुम्भराजवृक्षैः।
सवचातिविषाग्निकैः सपाठैः पिचुभागैः+नववज्रदुग्धमुष्ट्या॥19॥
पिष्टैः सिद्धं सर्पिषः प्रस्थम्+एभिः क्रूरे कोष्ठे स्नेहनं रेचनं च।
कुष्ठश्वित्रप्लीहवर्ध्मार्शमगुल्मान् हन्यात्+कृच्छ्रान्+तत्+महावज्रकाख्यम्॥20॥
दन्त्याढकम्+अपां द्रोणे पक्त्वा तेन घृतं पचेत्।
धामार्गवपले पीतं तत्+ऊर्ध्वाधः+ विशुद्धिकृत्॥21॥
आवर्तकीतुलां द्रोणे पचेत्+अष्टांशशेषितम्।
तन्मूलैः+तत्र निर्यूहे घृतप्रस्थं विपाचयेत्॥22॥
पीत्वा तत्+एकदिवसान्तरितं सुजीर्णे
भुञ्जीत कोद्रवम्+असंस्कृतकाञ्जिकेन।
कुष्ठं किलासम्+अपचीं च विजेतुम्+इच्छन्
इच्छन् प्रजां च विपुलां ग्रहणं स्मृतिं च॥23॥
यतेः+लेलीतकवसा क्षौद्रजातीरसान्विता।
कुष्ठघ्नी समसर्पिः+वा सगायत्र्यसनोदका॥24॥
शालयः+ यवगोधूमाः कोरदूषाः प्रियङ्गवः।
मुद्रा मसूराः+तुवरी तिक्तशाकानि जाङ्गलम्॥25॥
वरापटोलखदिरनिम्बारुष्करयोजितम्।
मद्यानि+औषधगर्भाणि मथितं च+इन्दुराजिमत्॥26॥
अन्नपानं हितं कुष्ठे, न तु+अम्ललवणोषणम्।
दधिदुग्धगुडानूपतिलमाषान्+त्यजेत्+तराम्॥27॥
पटोलमूलत्रिफलाविशालाः पृथक्+त्रिभागापचितत्रिशाणाः।

स्युः+त्रायमाणा कटुरोहिणी च भागार्धिके नागरपादयुक्ते॥28॥
एतत्+पलं जर्जरितं विपक्वं जले पिबेत्+दोषविशोधनाय।
जीर्णे रसैः+धन्वमृगद्विजानां पुराणशाल्योदनम्+आददीत॥29॥
कुष्ठं किलासं ग्रहणीप्रदोषम्+अर्शांसि कृच्छ्राणि हलीमकं च।
षड्रात्रयोगेन निहन्ति च+एतद् हृद्वस्तिशूलं विषमज्वरं च॥30॥
विडङ्गसारामलकाभयानां पलत्रयं, त्रीणि पलानि कुम्भात्।
गुडस्य च द्वादश, मासम्+एषः+ जितात्मनां हन्ति+उपयुज्यमानः॥31॥
कुष्ठश्वित्रश्वासकासोदरार्शोमेहप्लीहग्रन्थिरुग्जन्तुगुल्मान्।
सिद्धं योगं प्राह यक्षः+ मुमुक्षोः+भिक्षोः प्राणान् माणिभद्रः किलेमम्॥32॥
भूनिम्बनिम्बत्रिफलापद्मकातिविषाकणाः।
मूर्वापटोलीद्विनिशापाठातिक्तेन्द्रवारुणीः॥33॥
सकलिङ्गवचाः+तुल्या द्विगुणाः+च यथा+उत्तरम्।
लिह्यात्+दन्तीत्रिवृद्ब्राह्मीः+चूर्णिता मधुसर्पिषा॥34॥
कुष्ठमेहप्रसुप्तीनां परमं स्यात्+तत्+औषधम्।
वराविडङ्गकृष्णा वा लिह्यात्+तैलाज्यमाक्षिकैः॥35॥
काकोदुम्बरिकावेल्लनिम्बाब्दव्योषकल्कवान्।
हन्ति वृक्षकनिर्यूहः पानात्+सर्वान्+त्वगामयान्॥36॥
कुटजाग्निनिम्बनृपतरुखदिरासनसप्तपर्णनिर्यूहे।
सिद्धा मधुघृतयुक्ताः कुष्ठघ्नीः+भक्षयेत्+अभयाः॥37॥
दार्वीखदिरनिम्बानां त्वक्क्वाथः कुष्ठसूदनः॥37 1/2 ॥
निशोत्तमानिम्बपटोलमूलतिक्तावचालोहितयष्टिकाभिः।
कृतः कषायः कफपित्तकुष्ठं सुसेवितः+ धर्म इव+उच्छिनत्ति॥38॥
एभिः+एव च शृतं घृतमुख्यं भेषजैः+जयति मारुतकुष्ठम्।
कल्पयेत्+खदिरनिम्बगुडूचीदेवदारुरजनीः पृथक्+एवम्॥39॥
पाठादार्वीवह्निघुणेष्टाकटुकाभिः+मूत्रं युक्तं शक्रयवैः+च+उष्णजलं वा।
कुष्ठी पीत्वा मासम्+अरुक् स्यात्+गुदकीली मेही शोफी पाण्डुरजीर्णी कृमिमान्+च॥40॥
लाक्षादन्तीमधुरसवराद्वीपिपाठाविडङ्गप्रत्यक्पुष्पीत्रिकटुरजनीसप्तपर्णाटरूषम्।
रक्ता निम्बं सुरतरु कृतं पञ्चमूल्यौ च चूर्णं पीत्वा मासं जयति हितभुक्+गव्यमूत्रेण कुष्ठम्॥41॥
निशाकणानागरवेल्लतोवरं सवह्नितार्प्यं क्रमशः+ विवर्धितम्।
गवाम्बुपीतं वटकीकृतं तथा निहन्ति कुष्ठानि सुदारुणानि+अपि॥42॥
त्रिकटूत्तमातिलारुष्करराज्यमाक्षिकसितोपलाविहिता।
गुलिका रसायनं कुष्ठजित्+च वृष्या च सप्तसमा॥43॥

चन्द्रशकलाग्निरजनीविडङ्गतुवरास्थ्यरुष्करत्रिफलाभिः।
वटका गुडांशक्लृप्ताः समस्तकुष्ठानि नाशयन्ति+अभ्यस्ताः॥44॥
विडङ्गभल्लातकबाकुचीनां सद्वीपिवाराहिहरीतकीनाम्।
सलाङ्गलीकृष्णतिलोपकुल्या गुडेन पिण्डी विनिहन्ति कुष्ठम्॥45॥
शशाङ्कलेखा सविडङ्गसारा सपिप्पलीका सहुताशमूला।
सायोमला सामलका सतैला कुष्ठानि कृच्छ्राणि निहन्ति लीढा॥46॥
पथ्यातिलगुडैः पिण्डी कुष्ठं सारुष्करैः+जयेत्।
गुडारुष्करजन्तुघ्नसोमराजीकृता+अथवा॥47॥
विडङ्गाद्रिजतुक्षौद्रसर्पिष्मत्खादिरं रजः।
किटिभश्वित्रदद्रुघ्नं खादेत्+मितहिताशनः॥48॥
सितातैलकृमिघ्नानि धात्र्ययोमलपिप्पलीः।
लिहानः सर्वकुष्ठानि जयति+अतिगुरूणि+अपि॥49॥
मुस्तं व्योषं त्रिफला मञ्जिष्ठा दारु पञ्चमूले द्वे।
सप्तच्छदनिम्बत्वक् सविशाला चित्रकः+ मूर्वा॥50॥
चूर्णं तर्पिणभागैः+नवभिः संयोजितं समध्वंशम्।
नित्यं कुष्ठनिबर्हणम्+एतत्+प्रायोगिकं खादन्॥51॥
श्वयथुं सपाण्डुरोगं श्वित्रं ग्रहणीप्रदोषम्+अर्शांसि।
वर्ध्मभगन्दरपिडकाकण्डूकोठापचीः+हन्ति॥52॥
रसायनप्रयोगेण तुवरास्थीनि शीलयेत्।
भल्लातकं बाकुचिकां वह्निमूलं शिलाह्वयम्॥53॥
इति दोषे विजिते+अन्तः+त्वक्स्थे शमनं बहिः प्रलेपादि हितम्।
तीक्ष्णालेपोत्क्लिष्टं कुष्ठं हि विवृद्धिम्+एति मलिने देहे॥54॥
स्थिरकठिनमण्डलानां कुष्ठानां पोटलैः+हितः स्वेदः।
स्विन्नोत्सन्नं कुष्ठं शस्त्रैः+लिखितं प्रलेपनैः+लिम्पेत्॥55॥
येषु न शस्त्रं क्रमते स्पर्शेन्द्रियनाशनेषु कुष्ठेषु।
तेषु निपात्यः क्षारः+ रक्तं दोषं च विस्राव्यः॥56॥
लेपः+अतिकठिनपरुषे सुप्ते कुष्ठे स्थिरे पुराणे च।
पीतागदस्य कार्यः+ विषैः समन्त्रः+अगदैः+च+अनु॥57॥
स्तब्धानि सुप्तसुप्तानि+अस्वेदनकण्डुलानि कुष्ठानि।
घृष्टानि शुष्कगोमयफेनकशस्त्रैः प्रदेह्यानि॥58॥
मुस्ता त्रिफला मदनं करञ्ज आरग्वधः कलिङ्गयवाः।
सप्ताह्वकुष्ठफलिनीदार्व्यः सिद्धार्थकं स्नानम्॥59॥

एषः+ कषायः+ वमनं विरेचनं वर्णकः+तथा+उद्धर्षः।
त्वग्दोषकुष्ठशोफप्रबाधनः पाण्डुरोगघ्नः॥60॥
करवीरनिम्बकुटजाच्छम्याकात्+चित्रकात्+च मूलानाम्।
मूत्रे दर्वीलेपी क्वाथः+ लेपेन कुष्ठघ्नः॥61॥
श्वेतकरवीरमूलं कुटजकरञ्जात्+फलं त्वचः+ दार्व्याः।
समुनःप्रवालयुक्तः+ लेपः कुष्ठापहः सिद्धः॥62॥
शैरीषी त्वक् पुष्पं कार्पास्या राजवृक्षपत्राणि।
पिष्टा च काकमाची चतुर्विधः कुष्ठहा लेपः॥63॥
व्योषसर्षपनिशागृहधूमैः+यावशूकपटुचित्रककुष्ठैः।
कोलमात्रगुटिका+अर्धविषांशा श्वित्रकुष्ठहरणः+ वरलेपः॥64॥
निम्बं हरिद्रे सुरसं पटोलं कुष्ठाश्वगन्धे सुरदारु शिग्रुः।
ससर्षपं तुम्बरुधान्यवन्यं चण्डा च चूर्णानि समानि कुर्यात्॥65॥
तैः+तक्रपिष्टैः प्रथमं शरीरं तैलाक्तम्+उद्वर्तयितुं यतेत।
तथा+अस्य कण्डूः पिटिकाः सकोठाः
कुष्ठानि शोफाः+च शमं व्रजन्ति॥66॥
मुस्तामृतासङ्गकटङ्कटेरीकासीसकम्पिल्लककुष्ठरोध्राः।
गन्धोपलः सर्जरसः+ विडङ्गं मनःशिलाले करवीरकत्वक्॥67॥
तैलाक्तगात्रस्य कृतानि चूर्णानि+एतानि दद्यात्+अवचूर्णनार्थम्।
दद्रूः सकण्डूः किटिभानि पामा विचर्चिका च+इति तथा न सन्ति॥68॥
स्नुग्गण्डे सर्षपात्+कल्कः कुकूलानलपाचितः।
लेपात्+विचर्चिकां हन्ति रागवेगः+ इव त्रपाम्॥69॥
मनःशिलाले मरिचानि तैलम्+आर्कं पयः कुष्ठहरः प्रदेहः।
तथा करञ्जप्रपुन्नाटबीजं कुष्ठान्वितं गोसलिलेन पिष्टम्॥70॥
गुग्गुलुमरिचविडङ्गैः सर्षपकासीससर्जरसमुस्तैः।
श्रीवेष्टकालगन्धैः+मनःशिलाकुष्ठकम्पिल्लैः॥71॥
उभयहरिद्रासहितैः+चाक्रिकतैलेन मिश्रितैः+एभिः।
दिनकरकराभितप्तैः कुष्ठं घृष्टं च नष्टं च॥72॥
मरिचं तमालपत्रं कुष्ठं समनःशिलं सकासीसम्।
तैलेन युक्तम्+उषितं सप्ताहं भाजने ताम्रे॥73॥
तेन+अलिप्तं सिध्मं सप्ताहात्+घर्मसेविनः+अपैति।
मासात्+नवं किलासं स्नानेन विना विशुद्धस्य॥74॥
मयूरकक्षारजले सप्तकृत्वः परिस्रुते।

सिद्धं ज्योतिष्मतीतैलम्+अभ्यङ्गात्+सिध्मनाशनम्॥75॥
वायसजङ्घामूलं वमनीपत्राणि मूलकात्+बीजम्।
तक्रेण भौमवारे लेपः सिध्मापहः सिद्धः॥76॥
जीवन्ती मञ्जिष्ठा दार्वी कम्पिल्लकं पयः+तुत्थम्।
एषः+ घृततैलपाकः सिद्धः सिद्धे च सर्जरसः॥77॥
देयः समधूच्छिष्टः+ विपादिका तेन नश्यति हि+अक्ता।
चर्मैककुष्ठकिटिभं कुष्ठं शाम्यति+अलसकं च॥78॥
मूलं सप्ताह्वात्+त्वक् शिरीषाश्वमारात्+अर्कान्+मालत्याः+चित्रकास्फोतनिम्बात्।
ब्रीजं कारञ्जं सार्षपं प्रापुनाटं श्रेष्ठा जन्तुघ्नं त्र्यूषणं द्वे हरिद्रे॥79॥
तैलं तैलं साधितं तैः समूत्रैः+त्वग्दोषाणां दुष्टनाडीव्रणानाम्।
अभ्यङ्गेन श्लेष्मवातोद्भवानां नाशाय+अलं वज्रकं वज्रतुल्यम्॥80॥
एरण्डताक्ष्यर्घननीपकदम्बभार्गीकम्पिल्लवेल्लफलिनीसुरवारुणीभिः।
निर्गुण्ड्यरुष्करसुराह्वसुवर्णदुग्धाश्रीवेष्टगुग्गुलुशिलापटुतालविश्वैः॥81॥
तुल्यस्नुगर्कदुग्धं सिद्धं तैलं स्मृतं महावज्रम्।
अतिशयितवज्रकगुणं श्वित्रार्शोग्रन्थिमालाघ्नम्॥82॥
कुष्ठाश्वमारभृङ्गार्कमूत्रस्नुक्क्षीरसैन्धवैः।
तैलं सिद्धं विषावापम्+अभ्यङ्गात् कुष्ठजित्+परम्॥83॥
सिद्धं सिक्थकसिन्दूरपुरतुत्थकताक्ष्र्यजैः।
कच्छूं विचर्चिकां च+आशु कटुतैलं निबर्हति॥84॥
लाक्षा व्योषं प्रापुनाटं च बीजं सश्रीवेष्टं कुष्ठसिद्धार्थकाः+च।
तक्रोन्मिश्रः स्यात्+धरिद्रा च लेपो दद्रूघ्नः+ मूलकोत्थं च बीजम्॥85॥
चित्रकसोभाञ्जनकौ, गुडूच्यपामार्गदेवदारूणि।
खदिरः+ धवः+च लेपः, श्यामा दन्ती द्रवन्ती च॥86॥
लाक्षारसाञ्जनैलाः, पुनर्नवा च+इति कुष्ठिनां लेपाः।
दधिमण्डयुताः पादैः षट् प्रोक्ता मारुतकफघ्नाः॥87॥
जलवाप्यलोहकेसरपत्रप्लवचन्दनमृणालानि।
भागोत्तराणि सिद्धं प्रलेपनं पित्तकफकुष्ठे॥88॥
तिक्तघृतैः+धौतघृतैः+अभ्यङ्गः+ दह्यमानकुष्ठेषु।
तैलैः+चन्दनमधुकप्रपौण्डरीकोत्पलयुतैः+च॥89॥
क्लेदे प्रपतति च+अङ्गे दाहे विस्फोटके च चर्मदले।
शीताः प्रदेहसेका व्यधनविरेकौ घृतं तिक्तम्॥90॥
खदिरवृषनिम्बकुटजाः श्रेष्ठाकृमिजित्पटोलमधुपर्ण्यः

अन्तर्बहिः प्रयुक्ताः कृमिकुष्ठनुदः सगोमूत्राः॥91॥
वातोत्तरेषु सर्पिः+वमनं श्लेष्मोत्तरेषु कुष्ठेषु।
पित्तोत्तरेषु मोक्षः+ रक्तस्य विरेचनं च+अग्रे॥92॥
ये लेपाः कुष्ठानां युज्यन्ते निर्हृतास्रदोषाणाम्।
संशोधिताशयानां सद्यः सिद्धिः+भवति तेषाम्॥93॥
दोषे हृतः+अपनीते रक्ते बाह्यान्तरे कृते शमने।
स्नेहे च कालयुक्ते न कुष्ठम्+अतिवर्तते साध्यम्॥94॥
बहुदोषः संशोध्यः कुष्ठी बहुशः+अनुरक्षता प्राणान्।
दोषे हि+अतिमात्रहृते वायुः+हन्यात्+अबलम्+आशु॥95॥
पक्षात्+पक्षात्+छर्दनानि+अभ्युपेयात्+मासात्+मासात्+शोधनानि+अपि+अधस्तात्।
शुद्धिः+मूर्ध्नि स्यात्+त्रिरात्रात्+त्रिरात्रात् षष्ठे षष्ठे मास्यसृङ्मोक्षणं च॥96॥
यः+ दुर्वान्तः+ दुर्विरिक्तः+अथवा स्यात् कुष्ठी दोषैरुद्धतैः+व्याप्यते+असौ।
निःसन्देहं याति+असाध्यत्वम्+एवं तस्मात् कृत्स्नात्+निर्हरेत्+अस्य दोषान्॥97॥
व्रतदमयमसेवा त्यागशीलाभियोगः+ द्विजसुरगुरुपूजा सर्वसत्त्वेषु मैत्री।
शिवशिवसुतताराभास्कराराधनानि प्रकटितमलपापं कुष्ठम्+उन्मूलयन्ति॥98॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने कुष्ठचिकित्सितं नाम+एकोनविंशः+अध्यायः॥19॥
विंशः+अध्यायः।
अथ+अतः श्वित्रकृमिचिकित्सितं व्याख्यास्यामः।
इति ह समाहुरात्रेयादयः+ महर्षयः।
कुष्ठात्+अपि बीभत्सं यत्+शीघ्रतरं च याति+असाध्यत्वम्।
श्वित्रम्+अतः+तत्+शान्त्यै यतेत दीप्ते यथी भवने॥1॥
संशोधनं विशेषात्+प्रयोजयेत्+पूर्वम्+एव देहस्य।
श्वित्रे स्रंसनमग्र्यं मलयूरसः+ इष्यते सगुडः॥2॥
तं पीत्वा+अभ्यक्ततनुः+यथाबलं सूर्यपादसन्तापम्।
सेवेत विरिक्ततनुः+त्र्यहं पिपासुः पिबेत्+पेयाम्॥3॥
श्वित्रे+अङ्गे ये स्फोटा जायन्ते कण्टकेन तान् भिन्द्यात्।
स्फोटेषु निःस्रुतेषु प्रातः प्रातः पिबेत् त्रिदिनम्॥4॥
मलयूमसनं प्रियङ्गूं शतपुष्पां च+अम्भसा समुत्क्वाथ्य।
पालाशं वा क्षारं यथाबलं फाणितोपेतम्॥5॥
फल्गवक्षवृक्षवल्कलनिर्यूहेणेन्दुराजिकाकल्कम्।
पीत्वा+उष्णस्थितस्य जाते स्फोटे तक्रेण भोजनं निर्लवणम्॥6॥

गव्यं मूत्रं चित्रकव्योषयुक्तं सर्पिःकुम्भे स्थापितं क्षौद्रमिश्रम्।
पक्षात्+ऊर्ध्वं श्वित्रिणा पेयम्+एतत् कार्यं च+अस्मै कुष्ठदृष्टं विधानम्॥7॥
मार्कवम्+अथवा स्वादेत्+भृष्टं तैलेन लोहपात्रस्थम्।
बीजकशृतं च दुग्धं तत्+अनु पिबेत्+श्वित्रनाशाय॥8॥
पूतीकार्कव्याधिघातस्नुहीनां मूत्रे पिष्टाः पल्लवा जातिजाः+च।
घ्नन्ति+आलेपात्+श्वित्रदुर्नामदद्रूपामाकोठान् दुष्टनाडीव्रणान्+च॥9॥
द्वैपं दग्धं चर्म मातङ्गजं वा श्वित्रे लेपः+तैलयुक्तः+ वरिष्ठः।
पूतिः कीटः+ राजवृक्षोद्भवेन क्षारेण+आक्तः श्वित्रम्+एकः+अपि हन्ति॥10॥
रात्रौ गोमूत्रे वासितान् जर्जराङ्गान्+अह्नि च्छायायां शोषयेत्+स्फोटहेतून्।
एवं वारान्+त्रीन्+तैः+ततः श्लक्ष्णपिष्टैः स्नुह्याः क्षीरेण श्वित्रनाशाय लेपः॥11॥
अक्षतैलद्रुता लेपः कृष्णसर्पोद्भवा मषी।
शिखिपित्तं तथा, दग्धं ह्रीबेरं वा तत्+आप्लुतम्॥12॥
कुडवः+अवल्गुजबीजाद्धरितालचतुर्थभागसम्मिश्रः।
मूत्रेण गवां पिष्टः सवर्णकरणं परं श्वित्रे॥13॥
क्षारे सुदग्धे गजलिण्डजे च गजस्य मूत्रेण परिस्रुते च।
द्रोणप्रमाणे दशभागयुक्तं दत्त्वा पचेत्+वीजम्+अवल्गुजानाम्॥14॥
श्वित्रं जयेत्+चिक्कणतां गतेन तेन प्रलिम्पन् बहुशः प्रघृष्टम्।
कुष्ठं मषं वा तिलकालकं वा यत्+वा व्रणे स्यात्+अधिमांसजातम्॥15॥
भल्लातकं द्वीपिसुधार्कमूलं गुञ्जाफलं त्र्यूषणशङ्खचूर्णम्।
तुत्थं सकुष्ठं लवणानि पञ्च क्षारद्वयं लाङ्गलिकां च पक्त्वा॥16॥
स्नुक्+अर्कदुग्धे घनम्+आयसस्थं शलाकया तत्+विदधीत लेपम्।
कुष्ठे किलासे तिलकालकेषु मषेषु दुर्नामसु चर्मकीले॥17॥
शुद्ध्या शोणितमोक्षैः+विरूक्षणैः+भक्षणैः+च सक्तूनाम्।
श्वित्रं कस्यचित्+एव प्रशाम्यति क्षीणपापस्य॥18॥
स्निग्धस्विन्ने गुडक्षीरमत्स्याद्यैः कृमिणा+उदरे।
उत्क्लेशितकृमिकफे शर्वरीं तां सुखोषिते॥19॥
सुरसादिगणं मूत्रे क्वाथयित्वा+अर्धवारिणि।
तं कषायं कणागालकृमिजित्कल्कयोजितम्॥20॥
सतैलस्वर्जिकाक्षारं युञ्ज्यात्+बस्तिं ततः+अहनि।
तस्मिन्+एव निरूढं तं पाययेत विरेचनम्॥21॥
त्रिवृत्कल्कं फलकणाकषायालोडितं ततः।
ऊर्ध्वाधः शोधिते कुर्यात्+पञ्चकोलयुतं क्रमम्॥22॥

कटुतिक्तकषायाणां कषायैः परिषेचनम्।
काले विडङ्गतैलेन ततः+तम्+अनुवासयेत्॥23॥
शिरोरोगनिषेधोक्तम्+आचरेत्+मूर्धगेषु+अनु।
उद्रिक्ततिक्तकटुकम्+अल्पस्नेहं च भोजनम्॥24॥
विडङ्गकृष्णामरिचपिप्पलीमूलशिग्रुभिः।
पिबेत्+सस्वर्जिकाक्षारैः+यवागूं तक्रसाधिताम्॥25॥
रसं शिरीषकिणिहीपारिभद्रककेम्बुकात्।
पलाशबीजपत्तरपूतिकात्+वा पृथक् पिबेत्॥26॥
सक्षौद्रं, सुरसादीन् वा लिह्यात्+क्षौद्रयुतान् पृथक्।
शतकृत्वः+अश्वविट्चूर्णं विडङ्गक्वाथभावितम्॥27॥
कृमिमान् मधुना लिह्यात्+भावितं वा वरारसैः।
शिरोगतेषु कृमिषु चूर्णं प्रधमनं च तत्॥28॥
आखुकर्णीकिसलयैः सुपिष्टैः पिष्टमिश्रितैः।
पक्त्वा पूपलिकां खादेत्+धान्याम्लं च पिबेत्+अनु॥29॥
सपञ्चकोललवणमसान्द्रं तक्रम्+एव वा।
नीपमार्कवनिर्गुण्डीपल्लवेषु+अपि+अयं विधिः॥30॥
विडङ्गचूर्णमिश्रैः+वा पिष्टैः+भक्ष्यान् प्रकल्पयेत्।
विडङ्गतण्डुलैः+युक्तम्+अर्धांशैः+आतपे स्थितम्॥31॥
दिनम्+आरुष्करं तैलं पाने बस्तौ च योजयेत्।
सुराह्वसरलस्नेहं पृथक्+एवं च कल्पयेत्॥32॥
पुरीषजेषु सुतरां दद्यात्+वस्तिविरेचने।
शिरोविरेकं वमनं शमनं कफजन्मसु॥33॥
रक्तजानां प्रतीकारं कुर्यात्+कुष्ठचिकित्सितात्।
इन्द्रलुप्तविधिः+च+अत्र विधेयः+ रोमभोजिषु॥34॥
क्षीराणि मांसानि घृतं गुडं च दधीनि शाकानि च पर्णवन्ति।
समासतः+अम्लान्मधुरान् रसान्+च कृमीन् जिहासुः परिवर्जयेत॥35॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने
श्वित्रकृमिचिकित्सितं नाम विंशः+अध्यायः॥20॥
एकविंशः+अध्ययाः।
अथ+अतः+ वातव्याधिचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
केवलं निरुपस्तम्भम्+आदौ स्नेहैः+उपाचरेत्।

वायुं सर्पिर्वसामज्जतैलपानैः+नरं ततः॥1॥
स्नेहक्लान्तं समाश्वास्य पयोभिः स्नेहयेत्+पुनः।
यूषैः+ग्राम्योदकानूपरसैः+वा स्नेहसंयुतैः॥2॥
पायसैः कृसरैः साम्ललवणैः सानुवासनैः।
नावनैः+तर्पणैः+च+अन्नैः सुस्निग्धैः, स्वेदयेत्+ततः॥3॥
स्वभ्यक्तं स्नेहसंयुक्तैः शङ्कराद्यैः पुनः पुनः।
स्नेहाक्तं स्विन्नम्+अङ्गं तु वक्रं स्तब्धं सवेदनम्॥4॥
यथेष्टम्+आनामयितुं सुखम्+एव हि शक्यते।
शुष्काणि+अपि हि काष्ठानि स्नेहस्वेदोपपादनैः॥5॥
शक्यं कर्मण्यतां नेतुं किमु गात्राणि जीवताम्।
हर्षतोदरुगायामशोफस्तम्भग्रहादयः॥6॥
स्निन्नस्य+आशु प्रशाम्यन्ति मार्दवं च+उपजायते।
स्नेहः+च धातून् संशुष्कान् पुष्णाति+आशु+उपयोजितः॥7॥
बलम्+अग्निबलं पुष्टिं प्राणान्+च+अस्य+अभिवर्धयेत्।
असकृत्+तं पुनः स्नेहैः स्वेदैः+च प्रतिपादयेत्॥8॥
तथा स्नेहमृदौ कोष्ठे न तिष्ठन्ति+अनिलामयाः।
यद्येत्+एन सदोषत्वात्+कर्मणा न प्रशाम्यति॥9॥
मृदुभिः स्नेहसंयुक्तैः+भेषजैः+तं विशोधयेत्।
घृतं तिल्वकसिद्धं वा सातलासिद्धम्+एव वा॥10॥
पयसैः+अण्डतैलं वा पिबेत्+दोषहरं शिवम्।
स्निग्धाम्ललवणोष्णाद्यैः+आहारैः+हि मलः+चितः॥11॥
स्रोतः+ बद्ध्वा+अनिलं रुन्ध्यात्+तस्मात्+तम्+अनुलोमयेत्।
दुर्बलः+ यः+अविरेच्यः स्यात्+तं निरूहैः+उपाचरेत्॥12॥
दीपनैः पाचनीयैः+वा भोज्यैः+वा तत्+युतैः+नरम्।
संशुद्धस्य+उत्थिते च+अग्नै स्नेहस्वेदौ पुनर्हितौ॥13॥
आमाशयगते वायौ वमितप्रतिभोजिते।
सुखाम्बुना षड्धरणं वचादिं वा प्रयोजयेत्॥14॥
सन्धुक्षिते+अग्नौ परतः+ विधिः केवलवातिकः।
मत्स्यान्नाभिप्रदेशस्थे सिद्धान्+बिल्वशलाटुभिः॥15॥
बस्तिकर्म तु+अधोनाभेः शस्यते च+अवपीडकः।
कोष्ठगे क्षारचूर्णाद्या हिताः पाचनदीपनाः॥16॥
हृत्स्थे पयः स्थिरासिद्धम् शिरोबस्तिः शिरोगते।

स्नैहिकं नावनं धूमः श्रोत्रादीनां च तर्पणम्॥17॥
स्वेदाभ्यङ्गनिवातानि हृद्यं च+अन्नं त्वगाश्रिते।
शीताः प्रदेहा रक्तस्थे विरेकः+ रक्तमोक्षणम्॥18 ष॥
विरेकः+ मांसमेदःस्थे निरूहाः शमनानि च।
बाह्याभ्यन्तरतः स्नेहैः+अस्थिमज्जगतं जयेत्॥19॥
प्रहर्षः+अन्नं च शुक्रस्थे बलशुक्रकरं हितम्।
विबद्धमार्गं दृष्ट्वा तु शुक्रं दद्यात्+विरेचनम्॥20॥
विरिक्तं प्रतिभुक्तं च पूर्वोक्तां कारयेत्+क्रियाम्।
गर्भे शुष्के तु वातेन बालानां च विशुष्यताम्॥21॥
सिताकाश्मर्यमधुकैः सिद्धम्+उत्थापने पयः।
स्नावसन्धिशिराप्राप्ते स्नेहदाहोपनाहनम्॥22॥
तैलं सङ्कुचिते+अभ्यङ्गः+ माषसैन्धवसाधितम्।
आगारधूमलवणतैलैः+लेपः स्रुते+असृजि॥23॥
सुप्ते+अङ्गे वेष्टयुक्ते तु कर्तव्यम्+उपनाहनम्।
अथ+अपतानकेन+आर्तम्+अस्रस्ताक्षम्+अवेपनम्॥24॥
अस्तब्धमेढ्रम्+अस्वेदं बहिः+आयामवर्जितम्।
अखट्वाघातिनं च+एनं त्वरितं समुपाचरेत्॥25॥
तत्र प्राक्+एव सुस्निग्धस्विन्नाङ्गे तीक्ष्णनावनम्।
स्रोतोविशुद्धये युञ्ज्यात्+अच्छपानं ततः+ घृतम्॥26॥
विदार्यादिगुणक्काथदधिक्षीररसैः शृतम्।
न+अतिमात्रं तथा वायुः+व्याप्नोति सहसा+एव वा॥27॥
कुलत्थयवकोलानि भद्रदार्वादिकं गणम्।
निःक्वाथ्यानूपमांसं च तेन+अम्लैः पयसा+अपि च॥28॥
स्वादुस्कन्धप्रतीवापं महास्नेहं विपाचयेत्।
सेकाभ्यङ्गावगाहान्नपाननस्यानुवासनैः॥29॥
स हन्ति वातं, ते ते च स्नेहस्वेदाः सुयोजिताः।
वेगान्तरेषु मूर्धानम्+असकृत्+च+अस्य रेचयेत्॥30॥
अवपीडैः प्रधमनैः+तीक्ष्णैः श्लेष्मनिबर्हणैः।
श्वसनासु विमुक्तासु तथा संज्ञां सः+ विन्दति॥31॥
सौवर्चलाभयाव्योषसिद्धं सर्पिः+चले+अधिके॥31 1/2॥
पलाष्टकं तिल्वकतः+ वरायाः प्रस्थं पलांशं गुरुपञ्चमूलम्।
सैः+अण्डसिंहीत्रिवृतं घटे+अपां पक्त्वा पचेत्+पादशृतेन तेन॥32॥

दध्नः पात्रे यावशूकात्+त्रिबिल्वैः सर्पिःप्रस्थं हन्ति तत्+सेव्यमानम्।
दुष्टान् वातान्+एकसर्वाङ्गसंस्थान् योनिव्यापद्गुल्मवर्ध्मोदरं च॥33॥
विधिः+तिल्वकवत्+ज्ञेयः+ रम्यकाशोकयोः+अपि॥34॥
चिकित्सितम्+इदं कुर्यात्+शुद्धवातापतानके।
संसृष्टदोषे संसृष्टं चूर्णयित्वा कफान्विते॥35॥
तुम्बरूण्यभया हिङ्गु पौष्करं लवणत्रयम्।
यवक्वाथाम्बुना पेयं हृत्पार्श्वार्त्यपतन्त्रके॥36॥
हिङ्गु सौवर्चलं शुण्ठी दाडिमं साम्लवेतसम्।
पिबेत्+वा श्लेष्मपवनहृद्रोगोक्तं च शस्यते॥37॥
आयामयोः+अर्दितवद्बाह्याभ्यन्तरयोः क्रिया।
तैलद्रोण्यां च शयनम्+आन्तरः+अत्र सुदुस्तरः॥38॥
विवर्णदन्तवदनः स्रस्ताङ्गः+ नष्टचेतनः।
प्रस्विद्यन्+च धनुष्कम्भी दशरात्रं न जीवति॥39॥
वेगेषु+अतः+अन्यथा जीवेत्+मन्देषु विनतः+ जडः।
खञ्जः कुणिः पक्षहतः पङ्गुलः+ विकलः+अथवा॥40॥
हनुस्रंसे हनू स्निग्धस्विन्नौ स्वस्थानम्+आनयेत्।
उन्नामयेत्+च कुशलः+चिबुकं विवृते मुखे॥41॥
नामयेत्+संवृते शेषम्+एकायामवत्+आचरेत्।
जिह्वास्तम्भे यथावस्थं कार्यं वातचिकित्सितम्॥42॥
अर्दिते नावनं मूर्ध्नि तैलं श्रोत्राक्षितर्पणम्।
सशोफे वमनं, दाहरागयुक्ते सिराव्यधः॥43॥
स्नेहनं स्नेहसंयुक्तं पक्षाघाते विरेचनम्।
अवबाहौ हितं नस्यं स्नेहः+च+उत्तरभक्तिकः॥44॥
ऊरुस्तम्भे तु न स्नेहः+ न च संशोधनं हितम्।
श्लेष्माममेदोबाहुल्यात्+युक्त्या तत्+क्षपणान्यतः॥45॥
कुर्यात्+रूक्षोपचारः+च यवश्यामाककोद्रवाः।
शाकैः+अलवणैः शस्ताः किञ्चित्+तैलैः+जलैः शृतैः॥46॥
जाङ्गलैः+अघृतैः+मांसैः+मध्वम्भोरिष्टपायिनः।
वत्सकादिः+हरिद्रादिः+वचादिः+वा ससैन्धवः॥47॥
आढ्यवाते सुखाम्भोभिः पेयः षड्धरणः+अथवा।
लिह्यात्+क्षौद्रेण वा श्रेष्ठाचव्यतिक्ताकणाघनात्॥48॥
कल्कं समधु वा चव्यपथ्याग्निसुरदारुजम्।

मूत्रैः+वा शीलयेत्+पथ्यां गुग्गुलुं गिरिसम्भवम्॥49॥
व्योषाग्निमुस्तत्रिफलाविडङ्गैः+गुग्गुलुं समम्।
खादन् सर्वान् जयेत्+व्याधीन् मेदः श्लेष्मामवातजान्॥50॥
शाम्यति+एवं कफाक्रान्तः समेदस्कः प्रभञ्जनः।
क्षारमूत्रान्वितान् स्वेदान् सेकान्+उद्वर्तनानि च॥51॥
कुर्यात्+दिह्यात्+च मूत्राढ्यैः करञ्जफलसर्षपैः।
मूलैः+वा+अपि+अर्कतर्कारीनिम्बजैः ससुराह्वयैः॥52॥
सक्षौद्रसर्षपापक्वलोष्टवल्मीकमृत्तिकैः।
कफक्षयार्थं व्यायामे सह्ये च+एनं प्रवर्तयेत्॥53॥
स्थलानि+उल्लङ्घयेत्+नारीः शक्तितः परिशीलयेत्।
स्थिरतोयं सरः क्षेमः प्रतिस्रोतः+ नदीं तरेत्॥54॥
श्लेष्ममेदःक्षये च+अत्र स्नेहादीन्+अवचारयेत्।
स्थानदूष्यादि च+आलोच्य कार्या शेषेषु+अपि क्रिया॥5॥
सहचरं सुरदारु सनागरं क्वथितम्+अम्भसि तैलविमिश्रितम्।
पवनपीडितदेहगतिः पिबन् द्रुतविलम्बितगः+ भवति+इच्छया॥56॥
रास्नामहौषधद्वीपिपिप्पलीशठिपौष्करम्।
पिष्ट्वा विपाचयेत्+सर्पिः+वातरोगहरं परम्॥57॥
निम्बामृतावृषपटोलनिदिग्धिकानां
भागान् पृथक् दश पलान् विपचेत्+धटे+अपाम्।
अष्टांशशेषितरसेन पुनः+च तेन
प्रस्थं घृतस्य विपचेत्+पिचुभागकल्कैः॥48॥
पाठाविडङ्गसुरदारुगजोपकुल्याद्विक्षारनागरनिशामिशिचव्यकुष्ठैः।
तेजोवतीमरिचवत्सकदीप्यकाग्निरोहिण्यरुष्करवचाकणमूलयुक्तैः॥59॥
मञ्जिष्ठया+अतिविषया विषया यवान्या
संशुद्धगुग्गुलुपलैः+अपि पञ्चसङ्ख्यैः।
तत्+सेवितं विधमति प्रबलं समीरं
सन्ध्यस्थिमज्जगतम्+अपि+अथ कुष्ठम्+ईदृक्॥60॥
नाडीव्रणार्बुदभगन्दरगण्डमालाजत्रूर्ध्वसर्वगदगुल्मगुदोत्थमेहान्।
यक्ष्मारुचिश्वसनपीनसकासशोफहृत्पाण्डुरोगमदविद्रधिवातरक्तम्॥61॥
बलाबिल्वशृते क्षीरे घृतमण्डं विपाचयेत्।
तस्य शुक्तिः प्रकुञ्चः+ वा नस्यं वाते शिरोगते॥62॥
तद्वत्+सिद्धा वसा नक्रमत्स्यकूर्मचुलूकजा।

विशेषेण प्रयोक्तव्या केवले मातरिश्वनि॥63॥
जीर्णं पिण्याकं पञ्चमूलं पृथक् च क्वाथ्यं क्वाथाभ्याम्+एकतः+तैलम्+आभ्याम्।
क्षीरात्+अष्टांशं पाचयेत्+तेन पानाद्वता नश्येयुः श्लेष्मयुक्ता विशेषात्॥64॥
प्रसारिणीतुलाक्वाथे तैलप्रस्थं पयःसमम्।
द्विमेदामिशिमञ्जिष्ठाकुष्ठरास्नाकुचन्दनैः॥65॥
जीवकर्षभकाकोलीयुगुलामरदारुभिः।
कल्कितैः+विपचेत्+सर्वमारुतामयनाशनम्॥66॥
समूलशाखस्य सहाचरस्य तुलां समेतां दशमूलतः+च।
पलानि पञ्चाशदभीरुतः+च पादावशेषं विपचेत्+वहे+अपाम्॥67॥
तत्र सेव्यनखकुष्ठहिमैलास्पृक्प्रियङ्गुनलिकाम्बुशिलाजैः।
लोहितानलदलोहसुराह्वैः कोपनामिशितुरुष्कनतैः+च॥68॥
तुल्यक्षीरं पालिकैः+तैलपात्रं सिद्धं कृच्छ्रान् शीलितं हन्ति वातान्।
कम्पाक्षेपस्तम्भशोषादियुक्तान् गुल्मोन्मादौ पीनसं योनिरोगान्॥69॥
सहाचरतुलायाः+तु रसे तैलाढकं पचेत्।
मूलकल्कात्+दशपलं पयः+ दत्त्वा चतुर्गुणम्॥70॥
अथवा नतषड्ग्रन्थास्थिराकुष्ठसुराह्वयात्।
सैलानलदशैलेयशताह्वारक्तचन्दनात्॥71॥
सिद्धे+अस्मिन् शर्कराचूर्णात्+अष्टादशपलं क्षिपेत्।
भेडस्य सम्मतं तैलं तत्+कृच्छ्रान्+अनिलामयान्॥72॥
वातकुण्डलिकोन्मादगुल्मवर्ध्मादिकान् जेयत्।
बलाशतं छिन्नरुहापादं रास्नाष्टभागिकम्॥73॥
जलाढकशते पक्त्वा शतभागस्थिते रसे।
दधिमस्त्विक्षुनिर्यासशुक्तैः+तैलाढकं समैः॥74॥
पचेत्+साजपयोर्धांशं कल्कैः+एभिः पलोन्मितैः।
शठीसरलदार्वेलामञ्जिष्ठागुरुचन्दनैः॥75॥
पद्मकातिबलामुस्ताशूर्पपर्णीहरेणुभिः।
यष्ट्याह्वसुरसव्याघ्रनखर्षभकजीवकैः॥76॥
पलाशरसकस्तूरीनलिकाजातिकोशकैः।
स्पृक्काकुङ्कुमशैलेयजातीकटुफलाम्बुभिः॥77॥
त्वक्कुन्दरुककर्पूरतुरुष्कश्रीनिवासकैः।
लवङ्गनखकङ्कोलकुष्ठमांसीप्रियङ्गुभिः॥78॥
स्थौणेयतगरध्यामवचामदनकप्लवैः।

सनागकेसरैः सिद्धे दद्यात्+चात्रावतारिते॥79॥
पत्रकल्कं ततः पूतं विधिना तत्+प्रयोजितम्।
कासं श्वासं ज्वरं छर्दिं मूर्च्छां गुल्मक्षतक्षयान्॥80॥
प्लीहशोषावपस्मारम्+अलक्ष्मीं च प्रणाशयेत्।
बलातैलम्+इदं श्रेष्ठं वातव्याधिविनाशनम्॥81॥
पाने नस्ये+अन्वासने+अभ्यञ्जने च स्नेहाः काले सम्यगेते प्रयुक्ताः।
दुष्टान् वातान्+आशु शान्तिं नयेयुः+वन्ध्या नारीः पुत्रभाजः+च कुर्युः॥82॥
स्नेहस्वेदैः+द्रुतः श्लेष्मा यदा पक्वाशये स्थितः।
पित्तं वा दर्शयेत्+रूपं बस्तिभिः+तं विनिर्जयेत्॥83॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने
वातव्याधिचिकिस्तितं नाम एकविंशः+अध्यायः॥21॥
द्वाविंशः+अध्यायः।
अथ+अतः+ वातशोणितचिकित्सितं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
वातशोणितिनः+ रक्तं स्निग्धस्य बहुशः+ हरेत्।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबल्॥1॥
रुग्रागतोददाहेषु जलौकोभिः+विनिर्हरेत्।
शृङ्गतुम्बैः+चिमिचिमाकण्डूरुग्दूयनान्वितम्॥2॥
प्रच्छानेन सिराभिः+वा देशात्+देशान्तरं व्रजत्।
अङ्गग्लानौ तु न स्राव्यं रूक्षे वातोत्तरे च यत्॥3॥
गम्भीरं श्वयथुं स्तम्भं कम्पं स्नायुसिरामयान्।
ग्लानिम्+अन्यान्+च वातोत्थान् कुर्यात्+वायुः+असृक्क्षयात्॥4॥
विरेच्यः स्नेहयित्वा तु स्नेहयुक्तैः+विरेचनैः।
वातोत्तरे वातरक्ते पुराणं पाययेत्+घृतम्॥5॥
श्रावणीक्षीरकाकोलीक्षीरिणीजीवकैः समैः।
सिद्धं सर्षभकैः सर्पिः सक्षीरं वातरक्तनुत्॥6॥
द्राक्षामधूकवारिभ्यां सिद्धं वा ससितोपलम्।
घृतं पिबेत्+तथा क्षीरं गुडूचीस्वरसे शृतम्॥7॥
तैलं पयः शर्करां च पाययेत्+वा सुमूर्च्छितम्।
बलाशतावरीरास्नादशमूलैः सपीलुभिः॥8॥
श्यामैः+अण्डस्थिराभिः+च वातार्तिघ्नं शृतं पयः।
धारोष्णं मूत्रयुक्तं वा क्षीरं दोषानुलोमनम्॥9॥

पैत्ते पक्त्वा वरीतिक्तापटोलत्रिफलामृताः।
पिबेत्+घृतं वा क्षीरं स्वादुतिक्तकसाधितम्॥10॥
क्षीरेणैः+अण्डतैलं च प्रयोगेण पिबेत्+नरः।
बहुदोषः+ विरेकार्थं जीर्णे क्षीरौदनाशनः॥11॥
कषायमभयानां वा पाययेत्+घृतभर्जितम्।
क्षीरानुपानं त्रिवृताचूर्णं द्राक्षारसेन वा॥12॥
निर्हरेत्+वा मलं तस्य सघृतैः क्षीरबस्तिभिः।
न हि बस्तिसमं किञ्चित्+वातरक्तचिकित्सितम्॥13॥
विशेषात्+पायुपार्श्वोरुपर्वास्थिजठरार्तिषु।
मुस्तधात्रीहरिद्राणां पिबेत्+क्वाथं कफोल्बणे॥14॥
सक्षौद्रं त्रिफलाया वा गुडूचीं वा यथातथा।
यथार्हस्नेहपीतं च वामितं मृदु रूक्षयेत्॥15॥
त्रिफलाव्योषपत्रैलात्वक्क्षीरीचित्रकं वचाम्।
विडङ्गं पिप्पलीमूलं लोमशां वृषकं त्वचम्॥16॥
ऋद्धिं लाङ्गलिकीं चव्यं समभागानि पेषयेत्।
कल्ये लिप्त्वा+आयसीं पात्रीं मध्याह्ने भक्षयेत्+इदम्॥17॥
वातास्रे सर्वदोषे+अपि परं शूलान्विते हितम्।
कोकिलाक्षकनिर्यूहः पीतः+तत्+शाकभोजिनाः॥18॥
कृपाभ्यासः+ इव क्रोधं वातरक्तं नियच्छति।
पञ्चमूलस्य धात्र्या वा रसैः+लेलीतकीं वसाम्॥19॥
खुडं सुरूढम्+अपि+अङ्गे ब्रह्मचारी पिबन् जयेत्
इति+आभ्यन्तरम्+उद्दिष्टं कर्म बाह्यम्+अतः परम्॥20॥
आरनालाढके तैलं पादसर्जरसं शृतम्।
प्रभूते खजितं तोये ज्वरदाहार्तिनुत्परम्॥21॥
समधूच्छिष्टमञ्जिष्ठं ससर्जरससारिवम्।
पिण्डतैलं तत्+अभ्यङ्गात्+वातरक्तरुजापहम्॥22॥
दशमूलशृतं क्षीरं सद्यः शूलनिवारणम्।
परिषेकः+अनिलप्राये तद्वत्+कोष्णेन सर्पिषा॥23॥
स्नेहैः+मधुरसिद्धैः+वा चतुर्भिः परिषेचयेत्।
स्तम्भाक्षेपकशूलार्तं कोष्णैः+दाहे तु शीतलैः॥24॥
तद्वत्+गव्याविकच्छागैः क्षीरैः+तैलविमिश्रितैः।
निःक्वाथैः+जीवनीयानां पञ्चमूलस्य वा लघोः॥25॥

द्राक्षेक्षुरसमद्यानि दधिमस्त्वम्लकाञ्जिकम्।
सेकार्थं तण्डुलक्षौद्रशर्कराम्भः+च शस्यते॥26॥
प्रियाः प्रियंवदा नार्यः+चन्दनार्द्रकरस्तनाः।
स्पर्शशीताः सुखस्पर्शा घ्नन्ति दाहं रुजं क्लमम्॥27॥
सरागे सरुजे दाहे रक्तं हृत्वा प्रलेपयेत्।
प्रपौण्डरीकमञ्जिष्ठादार्वीमधुकचन्दनैः॥28॥
सितोपलैः+अकासक्तुमसूरोशीरपद्मकैः।
लेपः+ रुग्दाहवीसर्परागशोफनिबर्हणः॥29॥
वातघ्नैः साधितः स्निग्धः कृशरः+ मुद्गपायसः।
तिलसर्षपपिण्डैः+च शूलघ्नम्+उपनाहनम्॥30॥
औदकप्रसहानूपवेसवाराः सुसंस्कृताः।
जीवनीयौषधैः स्नेहयुक्ताः स्युः+उपनाहने॥31॥
स्तम्भतोदरुगायामशोफाङ्गग्रहनाशनाः।
जीवनीयौषधैः सिद्धा सपयस्का वसा+अपि वा॥32॥
घृतं सहचरान्मूलं जीवन्ती छागलं पयः।
लेपः पिष्टाः+तिलाः+तद्वत्+भृष्टाः पयसि निर्वृताः॥33॥
क्षारपिष्टक्षुमां लेपम्+एरण्डस्य फलानि वा।
कुर्यात्+शूलनिवृत्त्यर्थं शताह्वां वा+अनिले+अधिके॥34॥
मूत्रक्षारसुरापक्वं घृतम्+अभ्यञ्जने हितम्।
सिद्धं समधु शुक्तं वा सेकाभ्यङ्गे कफोत्तरे॥35॥
गृहधूमः+ वचा कुष्ठं शताह्वा रजनीद्वयम्।
प्रलेपः शूलनुत्+वातरक्ते वातकफोत्तरे॥36॥
मधुशिग्रोर्हितं तद्वत्+बीजं धान्याम्लसंयुतम्।
मुहूर्त्तलिप्तम्+अम्लैः+च सिञ्चेत्+वातकफोत्तरे॥37॥
उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः।
विरेकास्थापनस्नेहपानैः+गम्भीरम्+आचरेत्॥38॥
वातश्लेष्मोत्तरे कोष्णा लेपाद्याः+तत्र शीतलैः।
विदाहशोफरुक्कण्डूविवृद्धिः स्तम्भनात्+भवेत्॥39॥
पित्तरक्तोत्तरे वातरक्ते लेपादयः+ हिमाः।
उष्णैः प्लोषोषरुग्रागस्वेदावदरणोद्भवः॥40॥
मधुयष्ट्याः पलशतं कषाये पादशेषिते।
तैलाढकं समक्षीरं पचेत्+कल्कैः पलोन्मितैः॥41॥

स्थिरातामलकीदूर्वापयस्याभीरुचन्दनैः।
लोहहंसपदीमांसीद्विमेदामधुपर्णिभिः॥42॥
काकोलीक्षीरकाकोलीशतपुष्पर्द्धिपद्मकैः।
जीवकर्षभजीवन्तीत्वक्पत्रनखवालकैः॥43॥
प्रपौण्डरीकमञ्जिष्ठासारिवैन्द्रीवितुन्नकैः।
चतुष्प्रयोगं वातासृक्पित्तदाहज्वरार्तिनुत्॥44॥
बलाकषायकल्काभ्यां तैलं क्षीरसमं पचेत्।
सहस्रशतपाकं तत्+वातासृग्वातरोगनुत्॥45॥
रसायनं मुख्यतमम्+इन्द्रियाणां प्रसादनम्।
जीवनं बृंहणं स्वर्यं शुक्रासृग्दोषनाशनम्॥46॥
कुपिते मार्गसंरोधान्+मेदसः+ वा कफस्य वा।
अतिवृद्ध्या+अनिले शस्तं नादौ स्नेहनबृंहणम्॥47॥
कृत्वा तत्र+आढ्यवातोक्तं वातशोणितिकं ततः।
भेषजं स्नेहनं कुर्यात्+यत्+च रक्तप्रसादनम्॥48॥
प्राणादिकोपे युगपत्+यथा+उद्दिष्टं यथामयम्।
ग्रथासन्नं च भैषज्यं विकल्प्यं स्यात्+यथाबलम्॥49॥
नीते निरामतां सामे स्वेदलङ्घनपाचनैः।
रूक्षैः+च+आलेपसेकाद्यैः कुर्यात्+केवलवातनुत्॥50॥
शोषाक्षेपणसङ्कोचस्तम्भस्वपनकम्पनम्।
हनुस्रंसः+अर्दितं खाञ्ज्यं पाङ्गुल्यं खुडवातता॥51॥
सन्धिच्युतिः पक्षवधः+ मेदोमज्जास्थिगा गदाः।
एते स्थानस्य गाम्भीर्यात्+सिध्येयुः+यत्नतः+ नवाः॥52॥
तस्मात्+जयेत्+नवान्+एतान् बलिनः+ निरुपद्रवान्।
वायौ पित्तावृतेशीताम्+उष्णां च बहुशः क्रियाम्॥53॥
व्यत्यासात्+योजयेत्+सर्पिः+जीवनीयं च पाययेत्।
धन्वमांसं यवाः शालिः+विरेकः क्षीरवान् मृदुः॥54॥
सक्षीरा बस्तयः क्षीरं पञ्चमूलबलाशृतम्।
काले+अनुवासनं तैलैः+मधुरौषधसाधितैः॥55॥
यष्टीमधुबलातैलघृतक्षीरैः+च सेचनम्।
पञ्चमूलकषायेण वारिणा शीतलेन वा॥56॥
कफावृते यवान्नानि जाङ्गला मृगपक्षिणः।
स्वेदाः+तीक्ष्णा निरूहाः+च वमनं सविरेचनम्॥57॥

पुराणसर्पिः+तैलं च तिलसर्षपजं हितम्।
संसृष्टे कफपित्ताभ्यां पित्तम्+आदौ विनिर्जयेत्॥58॥
कारयेत्+रक्तसंसृष्टे वातशोणितिकीं क्रियाम्।
स्वेदाभ्यङ्गरसाः क्षीरं स्नेहः+ मांसावृते हितम्॥59॥
प्रमेहमेदोवातघ्नम्+आढ्यवाते भिषग्जितम्।
महास्नेहः+अस्थिमज्जस्थे पूर्वोक्तं रेतसा+आवृते॥60॥
अन्नावृते पाचनीयं वमनं दीपनं लघु।
मूत्रावृते मूत्रलानि स्वेदाः+च+उत्तरबस्तयः॥61॥
एरण्डतैलं वर्चःस्थे बस्तिस्नेहाः+च भेदिनः।
कफपित्ताविरुद्धं यद्यत्+च वातानुलोमनम्॥62॥
सर्वस्थानावृते+अपि+आशु तत्+कार्यं मातरिश्वनि।
अनभिष्यन्दि च स्निग्धं स्रोतसां शुद्धिकारणम्॥63॥
यापना बस्तयः प्रायः+ मधुराः सानुवासनाः।
प्रसमीक्ष्य बलाधिक्यं मृदु कार्यं विरेचनम्॥64॥
रसायनानां सर्वेषाम्+उपयोगः प्रशस्यते।
शिलाह्वस्य विशेषेण पयसा शुद्धगुग्गुलोः॥65॥
लेहः+ वा भार्गवः+तद्वत्+एकादशसिताशितः।
अपाने तु+आवृते सर्वं दीपनं ग्राही भेषजम्॥66॥
वातानुलोमनं कार्यं मूत्राशयविशोधनम्।
इति सङ्क्षेपतः प्रोक्तम्+आवृतानां चिकित्सितम्॥67॥
प्राणादीनां भिषक्+कुर्यात्+वितर्क्य स्वयम्+एव तत्।
उदानं योजयेत्+ऊर्ध्वम्+अपानं च+अनुलोमयेत्॥67॥
समानं शमयेत्+विद्वान्+त्रिधा व्यानं तु योजयेत्।
प्राणः+ रक्ष्यः+चतुर्भ्यः+अपि तत्स्थितौ देहसंस्थितिः॥69॥
स्वं स्वं स्थानं नयेत्+एव वृतान् वातान् विमार्गगान्।
सर्वं च+आवरणं पित्तरक्तसंसर्गवर्जितम्॥70॥
रसायनविधानेन लशुनः+ हन्ति शीलितः।
पित्तावृते पित्तहरं मरुतः+च+अनुलोमनम्॥71॥
रक्तावृते+अपि तद्वत्+च खुडोक्तं यत्+च भेषजम्।
रक्तपित्तानिलहरं विविधं च रसायनम्॥72॥
यथानिदानां निर्दिष्टम्+इति सम्यक् चिकित्सितम्।
आयुर्वेदफलं स्थानम्+एतत्+सद्यः+अर्तिनाशनात्॥73॥

चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम्।

भेषजं शमनं शस्तं पर्यायैः स्मृतम्+औषधम्॥74॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां चतुर्थे चिकित्सितस्थाने वातशोणितचिकित्सितं नाम द्वाविंशः+अध्यायः॥22॥

समाप्तं चेदं चतुर्थं चिकित्सितस्थानम्।